306

Skanda Purāṇa	Title
	Author
	Editor
	Year, Vols.
	Publisher
306 Incomplete	Remarks

मना

स्क॰सं॰ श्रीगणेशायनमः॥ श्रीशिवरंपरमंतत्त्वमादिमध्यांतवर्जितं आधारंसर्वलोकानामाधारमविक्रियं १ अनंतानंदबोधांबुनिधिमद्भुतविक्रमं अंबिकाप
१ तिमीशानमनीशंप्रणमाम्यहं २ सत्रावसानेमुनयोविशुद्धहृदयाभृशं नैमिषीयामहात्मानमागतंरोमहर्षणं ३ दृष्ट्वायथार्हंसंपूज्यप्रसन्नेंद्रियमा
नसाः पप्रच्छुःसंहितांपुण्यांसूतंपौराणिकंमुदा ४ एवंपृष्टोमुनिश्रेष्ठैःसूतःसर्वार्थदायिनं महादेवंमहात्मानंध्यात्वाव्यासंचभक्तितः ५
समाहितमनाभूत्वाविलोक्यमुनिसत्तमान् वक्तुमारभतेसूतःसंहितांश्रुतिसंमितां ६ सूतउवाच ब्राह्मंपुराणंप्रथमंद्वितीयंपाद्ममुच्यते तृती
यंवैष्णवंप्रोक्तंचतुर्थंशैवमुच्यते ७ ततोभागवतंप्रोक्तंभविष्याख्यंततःपरं सप्तमंनारदीयंचमार्कंडेयंतथाष्टमं ८ आग्नेयंनवमंपश्चाद्ब्रह्म
वैवर्तमेवच ततोलैंगंवराहंचततस्कांदमनुत्तमं ९ वामनाख्यंततःकौर्मंमात्स्यंततउच्यते गारुडाख्यंततःप्रोक्तंब्रह्मांडंतत्परंविदुः
१० ग्रंथतश्चचतुर्लक्षंपुराणंमुनिपुंगवाः अष्टादशपुराणानांकर्तासत्यवतीसुतः ११ कामिकादिप्रभेदानांयथादेवोमहेश्वरः अष्टादशपुरा
णानिश्रुत्वासत्यवतीसुतात् १२ अन्यान्युपपुराणानिमुनिभिःकीर्तितानितु आद्यंसनत्कुमारेणप्रोक्तंवेदविदांवराः १३ द्वितीयंनारसिंहा
ख्यंतृतीयंनांदमेवच चतुर्थंशिवधर्माख्यंदौर्वासंपंचमंविदुः १४ षष्ठंतुनारदीयाख्यंकापिलंसप्तमंविदुः अष्टमंमानवंप्रोक्तंततश्चोश हे॰सं॰ १

नसैरिनं १५ ततोब्रह्मांडसंज्ञंतुवारुणाख्यंततःपरं ततःकालीपुराणाख्यंविशिष्टंमुनिपुंगवाः १६ ततोवासिष्ठलैंगाख्यंप्रोक्तंमाहेश्वरंप
रं ततःसांबपुराणाख्यंततःसौरंमहाद्भुतं १७ पराशरंततःप्रोक्तंमारीचाख्यंततःपरं भार्गवाख्यंततःप्रोक्तंसर्वधर्मार्थसाधकं १८ ल
क्षेनुग्रंथसंख्याभिःसर्वविज्ञानसागरं स्कांदं[illegible]पुराणंश्रुतिसंमितं १९ षड्विधंसंहिताभेदैःपंचाशत्खंडमंडितं आद्यासन
त्कुमारोक्ताद्वितीयासूतसंहिता २० तृतीयाशांकरीविप्राश्चतुर्थीवैष्णवीमता पंचमीसंहितासौरातत्सराःसंहितामता २१ ग्रंथ
तःपंचाशत्सहस्रेणोपलक्षिता आद्यातुसंहिताविप्राद्वितीयाषट्सहस्रिका २२ तृतीयाग्रंथतस्त्रिंशत्सहस्रेणोपलक्षिता तुरीया
संहितापंचसहस्रेणोपलक्षिता २३ ततोन्यात्रिसहस्रेणग्रंथेनैवविनिर्मिता अन्यासहस्रतःस्रष्टाग्रंथतःपंडितोत्तमाः २४ द्वितीयांसंहि
५ तांवक्ष्येसर्वपापप्रणाशिनीं मुनिभिर्देवतैःपूजितामतिशोभनां २५ चतुर्खंडितासापिपवित्रावेदसंमिता शिवमाहात्म्यखंडा
ख्यःप्रथमःपरिकीर्तितः २६ द्वितीयोज्ञानयोगाख्यःसर्ववेदांतसंग्रहः तृतीयोमुक्तिखंडाख्यश्चतुर्थोयज्ञवैभवः २७ आद्यःसप्तशतंप्रो
क्तंग्रंथतःपंडितोत्तमाः द्वितीयोग्रंथतःसप्तशतंत्रिंशत्ततोधिकं २८ ततोधिकंचसप्तैवमुनयःपरिकीर्तितः तृतीयःषट्शतंविप्रा

धो
सप्तविंशाद्विवर्जितः २९ चतुर्थस्तु मुनिश्रेष्ठाः सहस्राणां चतुष्टयं उपर्यंभागभेदाद्धि धाम्नतः स उच्यते ३० आद्यस्तयोः दशाध्यायो द्वितीयो विं
शतिस्तथा तृतीयो नव विप्रेंद्राश्चतुर्थस्तु तथैव च ३१ सप्तवर्गैः समस्तानां वेदानामर्थ आस्तिकाः अस्यामेव स्थितः सा सा संहितायां न संशयः
३२ सर्गश्च प्रतिसर्गश्च वंशो मन्वंतराणि च वंशानुचरितं चैव पुराणं पंचलक्षणं ३३ यश्चतुर्वेदविद्विप्रः पुराणं वेत्ति नार्थतः तं दृष्ट्वा भयमा
प्नोति वेदो मां प्रतरिष्यति ३४ इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् वेदाः प्रमाणं प्रथमं स्मृतय एव ततः परं ३५ स्मृतयश्च पुराणानि भा
रतं मुनिपुंगवाः अन्यान्यपि मुनिश्रेष्ठाः शास्त्राणि सुबहूनि च ३६ सर्वं वेदाविरोधेन प्रमाणं नान्यवर्त्मना एक एव द्विजा वेदो वेदार्थश्चैक
एव तु ३७ तथापि मुनिशार्दूलाः शाखाभेदेन भेदितः अनंता वै द्विजा वेदा वेदार्थो वै द्विजोत्तमाः ३८ अनंतो वेदवेद्यस्य शंकरस्य शिवस्य तु
मायया न स्वरूपेण द्विजा हादेववैभवं ३९ ब्रह्माणं मुनयः पूर्वं सृष्टवान्स महेश्वरः दत्तवानखिलान्वेदानात्मन्येव स्थितानिमान् ४० ब्रह्मा सर्व
जगत्कर्ता शिवस्य परमात्मनः प्रसादादेव रुद्रस्य स्मृतीः सस्मार सुव्रताः ४१ विष्णुर्विश्वजगत्त्राता विश्वेशाय शिवस्य तु आज्ञया पर
या युक्तो व्यासो जज्ञे गुरुर्मम ४२ स पुनर्देवदेवस्य प्रसादादविकापतेः संक्षिप्य सकलान्वेदांश्चतुर्धा कृतवान्द्विजाः ४३ ऋग्वेदः प्रथमः
देव

प्रोक्तो यजुर्वेदस्ततापरः तृतीयः सामवेदाख्यश्चतुर्थोऽथर्व उच्यते ४४ एकविंशतिभेदेन ऋग्वेदो भेदितोऽमुना यजुर्वेदो द्विजा एकशतभेदेन भेदितः
४५ नवधा भेदितोऽथर्वा वेदः साम सहस्रधा व्यस्तवेदतया व्यास इति लोके श्रुतो मुनिः ४६ अयं साक्षान्महायोगी व्यासः सर्वज्ञ ईश्वरः महाभा
रतमाश्चर्यं निर्ममे भगवान्मुनिः ४७ तस्य शिष्या महाभागाश्चत्वारो मुनिसत्तमाः अभवन्स मुनिस्तेभ्यः पैलादिभ्यो ददौ श्रुतीः तेभ्योऽधी
ताः श्रुतिः सर्वैः साध्वी विप्राः सनातनी तथा वर्णाश्रमाचाराः प्रोक्ता वेदविनमाः पुराणानां प्रवक्तारं स मुनिर्मां न्ययोजयत् तस्मादेव मुनिश्रेष्ठाः पु
राणं प्रवदाम्यहं ५० श्रद्धया परया युक्ताः शृणुध्वं मुनिपुंगवाः इति श्रुत्वा मुनिश्रेष्ठाः नैमिषीयाः सनातनाः प्रणम्य सूतमव्यग्रं पूजया
म्भुरादयत् सोऽपि सर्वं जगद्धेतुं शंकरं परमेश्वरं अंबिकापतिमीशानं अनंतानंदविग्रहं ध्यात्वा तु सुचिरं कालं भक्त्या परवशोऽभवत्
५२ नमः सोमाय रुद्राय शंकराय महात्मने ब्रह्मविष्णुसुरेंद्राणां ध्यानगम्याय शूलिने ५४ भक्तिगम्याय ज्ञानाविदुषामात्मरूपि भ
णे स्वात्मानुभूतिमत्सिद्धाय नमस्ते सर्वसाक्षिणे ५५ इति श्रीस्कांदे सूतसंहितायां शिवमाहात्म्यखंडे प्रथमोऽध्यायः नैमिषा ऊचुः सर्वं जगदिदं
विद्वन्विभक्तं केन हेतुना उत्पन्नं केन चित्तस्मादनित्यं च ततः परं १ अज्ञत्वाच्चैव हेतुः स्यान्न च प्रकृतिरेव च अतः सर्वजगद्धेतुरन्य

सू०सं० एवन्तपोधन २ नमस्साकंमहाभागब्रूहिपुण्यवतांवर सूत उ० पुराविष्वादयोदेवाःसर्वेसंशयकारणं विचार्यजगतोविप्राःसंशयाविष्ट
३ चेतसः अनावसुखदंशुद्धंरौद्रंलोकेसमागमन् तेषामध्येमहादेवःसंसारार्णवकोहरः रुद्रःपरमकारुण्यःस्वयमाविरभूद्द्विजा अदृष्टपूर्वं
तंदृष्ट्वादेवाविष्णुपुरोगमाः प्रणिपत्यमहादेवमपृच्छंकोभवानिति ६ सोऽब्रवीद्भगवान्रुद्रःपशूनांपतिरीश्वरः सर्वज्ञःसर्वतत्वानां
त्वमन्तःसनातनः ७ अहमेकोजगद्धेतुरासंप्रथममीश्वरः वर्तामिचभविष्यामिनमत्तोन्योस्तिकश्चन ८ मन्मायाशक्तिसंक्लृप्तंज
गत्सर्वंचराचरं सापिमत्तःपृथङ्नास्त्येवपरमार्थतः ९ मामेवंवेदवाक्येभ्योज्ञात्वात्माचार्यपूर्वकं यःपशुःसविमुच्येतज्ञाना
देतेनवाक्यजात् १० इत्युक्त्वाभगवान्रुद्रस्वंप्रत्यग्रूपमाविशत् नापश्यंततनोरुद्रंदेवाविष्णुपुरोगमाः ११ अथर्वशिरसादेव
मस्तुवंश्चोर्ध्वबाहवः अन्यैर्नानाविधैःसूक्तैःश्रौमत्वचाक्षरेणच १२ पुनःसाक्षाच्छिवज्ञानसिध्यर्थंमुनिपुंगवाः अग्निहोत्रसमु
त्पन्नंभस्मादायादरेणतु १३ निधायपात्रेशुद्धेतत्सद्योमस्याल्पवारिणा हिरण्मयमुनिश्रेष्ठाःसपवित्राःसमाहिताः ओमापःसर्वं
मित्येतन्मंत्रमुच्चार्यभक्तितः ध्यात्वाविष्णुंजलाधस्संस्थीत्वाभस्मवारिणा १५ विसृज्यंमंत्रैर्जाबालैरग्निरित्यादिसप्तभिः स ३

मर्दितधियामुद्राःशिवंध्यात्वाशिवामपि समुद्धृत्यमुनिश्रेष्ठाआपादतलमस्तकं सितेनभस्मनातेनस्नात्वाभूतेनभावनात् ल
लाटेहृदयेकुक्षौदोर्द्वंद्वेचसुरेत्तमाः त्रिपुंड्रधारणंकृत्वाब्रह्मविष्णुशिवात्मकं १८ एवंकृत्वाव्रतंदेवाअथर्वशिरसिस्थितं शांता
दांताविरक्ताश्चत्यक्तकामाश्रिसुव्रताः वालाग्रमात्रंविभ्रेशंज्ञानवेदस्वरूपिणं हृत्पद्मकर्णिकामध्येध्यात्वावेदविदांवराः २०
सर्वज्ञंसर्वकर्तारंसमस्ताधारमद्भुतं प्रणवेनैवमंत्रेणपूजयामासुरीश्वरं अथतेषांप्रसादार्थंपशूनांपतिरीश्वरः उमार्द्धवि
ग्रहःश्रीमान्सोमार्द्धकृतशेखरः २२ नीलकंठोनिराधारोनिर्मलोनिरुपप्लवः ब्रह्मविष्णुमहेशानैरुपास्यःपरमेश्वरः २३ सांनि
ध्यमकरोद्रुद्रःसाक्षात्संसारनाशकः यंपश्यंतिवेदांतैःस्वरूपंसर्वसाक्षिणं तमेवशंकरंसाक्षाद्ददृशुःसुरसत्तमाः यंनपश्यंतिदुर्वृ
त्ताःश्रौतस्मार्तविवर्जिताः २४ तमेवशंकरंसाक्षाद्ददृशुर्देवपुंगवाः यत्वात्यर्थंद्विजैर्वेदाअधीयंतेसमाहितैः तमेवरुद्रमीशानं
ददृशुस्त्रिदशाम्बरे यंयजंतेमुनिश्रेष्ठाःश्रद्धयाब्राह्मणोत्तमाः तमेवपरमंदेवंददृशुःस्वर्गवासिनः यंप्रपश्यंतिदेवेशंयोगिनोदग्ध
किल्बिषाः २८ तमेवसर्वमानंदंददृशुर्लोकनायकाः यस्यप्रसादाद्भगवान्विष्णुर्विश्वजगत्पतिः तमेवसर्वलोकेशंददृशुःपुरा

सू॰सं॰ धिकाः यत्प्रसादाद्द्विजाब्रह्मा सृष्टा सर्वस्य सुव्रताः ३० तमेव सत्यमीशानं द्रष्टुं सत्त्वसंयुताः अथ तं तुष्टुवुर्देवाः सोऽब्रवीत्सर्वफलप्र
दं ३१ संसाररोगदुःखस्य भेषजं जगदुद्धरः अथ देवो महादेवः सान्द्रैर्देवैरभिष्टुतः ३२ विलोक्य देवानखिलान्प्रीतोस्मीत्यब्रवीद्धरः
४ पुनर्देवान्समालोक्य करुणाविष्टपरोगमान् माहगंभीरया वाचा भवावाक्कलनिधिः ३३ अहमेव परं तत्त्वं मत्तो जातं जगत्सुराः मय्येव संस्थि
तं नष्टं मत्तो नान्याधिकः सदा मत्स्वरूपपरिज्ञानादेव संसारनिर्वृतिः ३५ मम ज्ञानं च वेदान्तश्रवणादेव जायते मुमुक्षोर्मेनतनिष्ठस्य प्रयतस्य
महात्मनः त्यक्तकर्मकलापस्य ध्याननिष्ठस्य शूलिनः यज्ञदानादिभिः साम महापापापालीवेश्यच एवं मां यो विजानाति स सर्वं वेदने नरः उक्तं वे
दान्तविज्ञानं युष्माकं सुरपुंगवाः व्रतं पाशुपतं चीर्णं ये द्विजैराहरेण च ते पामेवापरे श्व्यमिति वेदानुशासनं ३९ सूत उ० इत्युक्त्वा भगवान्
रुद्रस्तत्रैवान्तरधीयत ततो देवा मुनिश्रेष्ठा देवदेवस्य वैभवं विदित्वानंजगद्धेतुमनन्यं नानस्त्यपरः तस्माद्यूयमपि श्रेष्ठाः सर्वज्ञं परमे
श्वरं ४१ जगतः कारणं बुध्वा भजध्वं सर्वकारणं सोपि सर्वं जगद्धेतुः सोमः सोमार्द्धशेखरः ४२ प्रसादाभिमुखो भूत्वा ब्रह्मविष्ण्वादिभिः
सह सान्निध्यं वेदविश्रेष्ठाः करिष्यत्यखिलेश्वरः ४३ इति श्रुत्वा महात्मानो नैमिषारण्यवासिनः महादेवस्य माहात्म्यं श्रीमत्पाशुप ४

२

तस्य च ४४ हृष्टचित्ता महात्मानं सूतं सर्वार्थसागरं प्रणम्य पूजयामासुर्भक्त्या विज्ञप्तिसिद्धये ४५ इति श्रीसूतसंहितायां शिवमाहात्म्य
खण्डे द्वितीयोऽध्यायः नैमिषा ऊ० भगवन्कः सुरेशैर्वै सुरैः सिद्धकिन्नरैः मुनिभिर्यक्षगन्धर्वैस्तथान्यैः सर्वजंतुभिः १ मुक्त्यर्थं विमुक्त्य च
र्थेऽपूज्यः पुण्यवतां वर तमस्माकं महाभाग ब्रूहि सर्वार्थवित्तम २ सूत उ० साधु साधु महाप्राज्ञाः एतमेव जगद्धितं वक्ष्ये तं श्रद्धयोपे
ताः शृणुध्वं मुनिपुंगवाः ३ पुरा विष्णुर्जगन्नाथः पुराणः पुरुषोत्तमः मायया मोहितः साक्षाच्छिवस्य परमात्मनः ४ अहमेव जगत्कर्ता म
य्येवेदं जगत्स्थितं मत्तः समस्त्वाधिकस्त्वापि नास्ति सर्वत्र सर्वदा ५ मम शक्तिविलासोयं जगत्सर्वं चराचरं अहमेव समाराध्यः सर्वदा स
र्वजंतुभिः ६ इत्यहंमानसंछन्नः स्वात्मभूतं महेश्वरं अविज्ञायाम्बिकानाथमनंतानंदचिद्घनं ७ अतीवाज्ञापयामास ब्रह्मादीनखि
लान्हरिः अथ देवो महादेवः सर्वात्मा सर्वभासकः तस्य शक्तिं समाहृत्य मोहयामास शंकरः ततस्तत्प्रमुखाः सर्वे ब्रह्माद्याः पशवोऽभ
शं मोहिता मायया शंभोर्विवशाश्चाविशेषतः एतस्मिन्नंतरे श्रीमान्नंदी शंकरवल्लभः सर्वविज्ञानरत्नानामाकरः करुणालयः
समागत्य हरिं ब्रह्मसुरानमराधिपान् ११ बोधयामास सर्वज्ञः परं भावं शिवस्य तु नंदिकेश्वर उ० विष्णो विश्वजगन्नाथ शंक

शपरमेश्वरः सर्वसाक्षी महानंदः सर्वात्मा तेन संस्थितः सत्वसर्वजंतुनां सदा सा सर्वभावकः अस्य संसारलेशस्य लवलेशलवेन तु इ
दं विश्वमुत्थरं लब्धं त्वया नान्येन हेतुना १६ अन्येषामपि सर्वेषामेवमस्य प्रसादतः अनेनेदं जगत्सर्वं विना न भवति स्वयं अयं धाता
विधाता च सर्वदा सर्ववस्तूनां यथा वैश्वानरेणेदमयोरहति भाति च तथानेन भवत्वेन जगत्सर्वं विभाति च अस्यानंदस्य भक्ता
निलेशमन्यानि सर्वदा १७ लब्ध्वा संतोषमापन्ना न्यतीव ब्रह्मवित्तमाः अस्यैवाज्ञालवाद्धि जगन्नित्यं प्रवर्तते १८ अविज्ञायै
नमात्मानं भवान्त्वं न मोहितः अहंकाराभिभूतश्च भवता मोहितं जगत् अतस्त्वं भ्रांतिमुत्सृज्य स्वात्मभूतं महेश्वरं आराधयाद
रेणैव सह देवैरुमापतिं २० सूत उ० इत्युक्त्वा मुनयः श्रीमान्नंदी शंकरवल्लभः अगमद्यमारुह्य श्रीमत्कैलासपर्वतं ततो विश्वाधि
करुणं महर्षिं सर्वसाक्षिणं ब्रह्मविष्णवादयो देवाः पूजयामासुरादरात् तथा लक्ष्म्यादयो देव्यास्तथान्ये सर्वजंतवः पूजयामासुरीशानं
पुरुषं हल्लपिंगलं अथैषां पुरतः श्रीमानंबिकापतिरीश्वरः आविर्बभूव सर्वज्ञः शंकरो वृषवाहनः दृष्ट्वा तं ब्रह्मविष्णुमुख्याः पश्
नां पतिमीश्वरं ब्रह्मविष्णवादयः सर्वे प्रणम्य भुवि दंडवत् २५ शिरस्यंजलिमाधाय सन्नेन्द्रियमानसाः अस्तुवन्मुक्तिदं

५

ति

भक्त्या मुक्तिदं भवभेषजं २६ देवा ऊचुः नमस्ते देवदेवेश नमस्ते करुणालय नमस्ते सर्वजंतूनां भुक्तिमुक्तिफलप्रद नमस्ते सर्वलोकानां सृष्टि
स्थित्यंतकारण नमस्ते भवभीतानां भवभीतिविमर्दन नमस्ते वेदवेदांतैरर्चनीय द्विजोत्तमैः नमस्ते शूलहस्ताय नमस्ते वह्निपाणये नमस्ते
विश्वनाथाय नमस्ते विश्वयोनये नमस्ते नीलकंठाय नमस्ते कृत्तिवाससे नमस्ते सोमरूपाय नमस्ते सूर्यरूपिणे नमस्ते वह्निरूपाय
नमस्ते जलमूर्तये नमस्ते भूमिरूपाय नमस्ते वायुमूर्तये नमस्ते व्योमरूपाय नमस्ते ह्यात्मरूपिणे नमस्ते सत्यरूपाय नमस्ते सत्यरू
पिणे नमस्ते बोधरूपाय नमस्ते बोधरूपिणे ३३ नमस्ते सुखरूपाय नमस्ते सुखरूपिणे नमस्ते पूर्णरूपाय नमस्ते पूर्णरूपिणे नमस्ते
ब्रह्मरूपाय नमस्ते ब्रह्मरूपिणे नमस्ते जीवरूपाय नमस्ते जीवरूपिणे नमस्ते व्यक्तरूपाय नमस्ते व्यक्तरूपिणे नमस्ते शब्दरूपाय नम
स्ते शब्दरूपिणे नमस्ते स्पर्शरूपाय नमस्ते स्पर्शरूपिणे नमस्ते रूपरूपाय नमस्ते रूपरूपिणे ३७ नमस्ते रसरूपाय नमस्ते रसरूपिणे ५
नमस्ते गंधरूपाय नमस्ते गंधरूपिणे ३८ नमस्ते देहरूपाय नमस्ते देहरूपिणे नमस्ते प्राणरूपाय नमस्ते प्राणरूपिणे नमस्ते श्रोत्ररूपा
य नमस्ते श्रोत्ररूपिणे नमस्ते त्वक्स्वरूपाय नमस्ते त्वक्स्वरूपिणे ४० नमस्ते दृष्टिरूपाय नमस्ते दृष्टिरूपिणे नमस्ते रसनारूपन

सू॰सं॰ मस्तेरसनात्मने ४१ नमस्तेघ्राणरूपायनमस्तेघ्राणरूपिणे नमस्तेपादरूपायनमस्तेपादरूपिणे ४२ नमस्तेपाणिरूपायनमस्ते
पाणिरूपिणे नमस्तेवाक्स्वरूपायनमस्तेवाक्स्वरूपिणे ४३ नमस्तेलिंगरूपायनमस्तेलिंगरूपिणे नमस्तेपायुरूपायनमस्तेपायुरू
६ पिणे ४४ नमस्तेचित्तरूपायनमस्तेचित्तरूपिणे नमस्तेमातृरूपायनमस्तेमातृरूपिणे ४५ नमस्तेमानरूपायनमस्तेमानरूपिणे न
मस्तेमेयरूपायनमस्तेमेयरूपिणे ४६ नमस्तेमितिरूपायनमस्तेमितिरूपिणे नमस्तेसर्वरूपायनमस्तेसर्वरूपिणे ४७ रक्षर
क्षमहादेवक्षमस्वकरुणालय भक्तचित्तसमासीनब्रह्मविष्णुशिवात्मक ४८ सूतउ॰ इतिब्रह्मादयःस्तुत्वाप्रणम्यभुविदंडवत् भक्तिपा
रंगतादेवावभूवुःपरमेश्वरे ४९ देवदेवोमहादेवःसर्वभूतहितेरतः अनुग्रहायदेवानांविकापतिरीश्वरः ५० प्रत्यक्षपरमंभावंस्वकं
सम्यक्प्रदर्शयत् ब्रह्मविष्ण्वादिभिःसाकंश्रीमद्याग्रपुरंगतः ५१ तत्रसर्वेसुराविप्राःश्रद्धयाद्दृष्टमिद्धया अवर्तंताखिलेशस्य
नर्तनंभुक्तिमुक्तिदं ५२ भवंतोपिमहादेवप्रसादायमुनीश्वराः पूजयध्वंमहाभक्त्यामहादेवंघृणानिधिं ५३ इतिश्रुत्वामुनिश्रेष्ठाने
मिषीयास्तपोधनाः प्रणम्यदंडवद्भूमौस्तुत्वामास्तहितप्रदं ५४ जज्ञिरेदेवदेवोसौशंकरस्त्वंविकापतिः पूजनीयइतिश्रीमान्सर्व ६

दासर्वजंतुभिः ५५ तेषांशिष्याःप्रशिष्याश्चतथान्येसर्वजंतवः महादेवःसदासर्वैःपूज्यइत्येवजज्ञिरे ५६ इतिश्रीस्कंदपुराणेसूत
संहितायांशिवमाहात्म्यखंडेतृतीयोध्यायः नैमिषीयाऊचुः भगवन्देवदेवस्यनीलकंठस्यशूलिनः पूजाविधिंविदन्पयाभुक्तिमु
क्तिदं १ सूतउ॰ वक्ष्येपूजाविधिंविप्राःशृणुध्वंभुक्तिमुक्तिदं श्रुतिस्मृत्युदितंकर्मकृत्वाऽऽदरःसरं २ स्नात्वाशुद्धेसमेदेशेगोमयेनोपलेपि श्री
ते समासीनःसदामौनीनिश्चलोदङ्मुखःसुखी ३ विचित्रमासनंतत्रनिधायब्रह्मवित्तमाः आगस्त्येनैवशास्त्रेणप्रोक्तलक्षणल
क्षितं ४ आराध्यश्रद्धयाविप्राःशिवलिंगंसमाहितः तत्रैवावाहयेद्देवंप्रणवेनतदास्थितं अर्घंदत्वामुनिश्रेष्ठाःपूर्वोक्तेनैवमंत्र
तः पाद्यमाचमनंचैवपुनःपूर्वोक्तमंत्रतः ६ पुनःस्नाप्यमहादेवमापोहिष्ठादिभिस्त्रिभिः तथापुरुषसूक्तेनश्रीमत्पंचाक्षरेणच ७
पुनराचमनंदत्वाप्रतिष्ठाप्यासनेहरं दत्वावस्त्रंमुनिश्रेष्ठाःप्रणवेनसमाहितः ८ उपवीतंपुनर्दत्वाभूषणानिचसादरं गंधंपुष्पंतथा
धूपंदीपंचैवादरेणच ९ श्रीमत्पंचाक्षरेणैवप्रणवेनयुतेनच हविर्निवेद्यदेवायपानीयेनसहादरात् १० पुनराचमनंदत्वातांबूलंसो
पदंशकं माल्यंदत्वानुलेपंचप्रणम्यभुविदंडवत् ११ लौकिकैर्वैदिकैस्तोत्रैःस्तुत्वाहृदिविसर्जयेत् प्रणवेनमहादेवंसर्वज्ञंसर्वकारणं

सू॰सं॰ १३ ब्रह्मचारिगृहस्थश्च वानप्रस्थश्च सुव्रताः एवं दिने दिने देवं पूजयेदंबिकापतिं सन्यासी देवदेवेशं प्रणवेनैव पूजयेत् नमोंतं
नशिवेनैव स्त्रीणां पूजाविधीयते विरक्तानांतु शूद्राणामेवं पूजा प्रकीर्तिता अन्येषामपि सर्वेषां नराणां मुनिपुंगवाः १५ पूजनादंबि
७ केशं दृष्ट्वा प्रणामस्तस्य कीर्तितः एवं पूजा कृता येन सफलं तस्य जीवितं १६ पूजया मुक्तिमाप्नोति पूजया मुक्तिमाप्नुयात् पुरा कश्चित्स्व
हापापी पुल्कसपुरुषाधमः ब्राह्मणानां कुलं हत्वा गवां वेदविदां वराः अपहृत्य धनं मार्गे प्राणिहिंसापुरःसरं स्वबंधूनिर्घृणो नि-विशा
८ श्चचार पृथिवीतले तस्य मित्रमभूत्कश्चिद्ब्राह्मणो गाणिकापतिः तस्मै दत्वा धनं किंचित्पुल्कसेतु द्विजोत्तमाः सपुनर्ब्राह्मणस्तं शोभ
तिनस्मै प्रदत्तवान् २० ब्राह्मण उ॰ सुबंधो मम हृद्बुद्धे त्वया पापानि निर्घृण कृतानि सर्वदा मत्त्व हो किं तेन फलिष्यति इत्येवं बहुधा विप्रः पु
ल्कसं प्रत्यभाषत सोपि विप्रवचः श्रुत्वा बहुशः पंडितोत्तमः कालेन महता दांतः पुल्कसः पुरुषाधमः जन्मांतरसहस्रेषु कृतपुण्यवा
शेन च प्रणम्य दंडवद्विप्रं पप्रच्छ ब्रह्मवित्तमाः पुल्कस उ॰ देवविप्र सुबंधो मे मया सर्वत्र सर्वदा महाघोराणि किं किं करोम्यहमथास्मिन्
लोके मूढो निनिर्घृणः २५ तद्दहाति भयाद्विप्र मानसं मम संततं ब्राह्मण उ॰ साधु साधु त्वया प्रोक्तं तव वक्ष्ये हितं शृणु २६ पुण्यक्षेत्रेषु ७

पापानि कृतानि मम नाथ २

हातीर्थे पुराणेषु वसुधातले मुनिभिः सिद्धगंधर्वैरमरैश्च सुसेविते श्रीमद्व्याघ्रपुरे यत्र मन्त्रस्त्वंबिकापतिः तत्र भक्तिपराभूत्वा स्नात्वा
प्रातःसमाहितः दृष्ट्वा दभ्रसभां दूरे प्रणम्य भुवि दंडवत् योगिनां भोगिनां नृणां दत्वा सर्वस्वमर्जितं स्थानस्यास्य भये जाते रक्षणं
कुरु यत्नतः सूत उ॰ एवं द्विजोत्तमेनोक्तः पुल्कसः पुरुषाधमः ३७ श्रीमद्व्याघ्रपुरं गतः श्रद्धापुरःसरं ब्राह्मणोपि सहानेन श्रद्धया मुनि
पुंगवाः प्राप्तवानेन दृष्ट्वा श्रद्धया स्थानमुत्तमं पुल्कसः श्रद्धया स्नात्वा ब्राह्मणवेदवित्तमाः योगिभ्यश्च तथा तेभ्यो दत्वा सर्वस्वमर्जितं
श्रीमद्दभ्रसभां नित्यं ब्राह्मणवेदपारगाः हरेर्दर्शनमस्कृत्वा पंचक्रोशाद्बहिर्द्विजाः उवास स सुचिरं कालमेवं कृत्वा दिने दिने एवं चिरगतका
ले पुल्कसः पुण्यगौरवात् स्थानसंरक्षणाध्या जात्त्वैवमरणं गतः ३५ स पुनर्मरणादूर्ध्वं भुक्त्वा भोगाननेकशः श्रीमद्व्याघ्रपुरेस्य प्रसा
७ दादंबिकापतेः अवाप परमां मुक्तिमविघ्नेन द्विजोत्तमाः ब्राह्मणोपि तथैवास्मिन्स्थाने मतिसमाहितः स्नानं कृत्वा महादेवमंबिकापतिमं
रं पूजयामास पूर्वोक्तप्रकारेण महेश्वरं तस्यापि ब्रह्मविद्श्रेष्ठाः पूजया परमेश्वरः श्रीमद्दभ्रसभानाथः प्रददौ मुक्तिमीश्वरः बहवो वेदविच्छ्रे
ष्ठाः पूर्वे केनैव वर्त्मना शिवलिंगार्चनं कृत्वा विमुक्ता भवबंधनात् ४० केचिद्वाराणसीं गत्वा ह्यपूर्वेण वर्त्मना महादेवं महात्मानं विमु

स्कं.सं. मुक्तः भवबंधनात् केचिच्छ्रीसोमनाथाख्यं केचित्केदारमद्भुतं केचिच्छ्रीपर्वतं सुरम्यं केचिद्गोपर्वतं नराः केचिद्दक्षिणकैलासं केचिद्रत्नाम्र
शभिधं केचिच्छ्रीहरतीर्थाख्यं केचिद्वृद्धाचलाभिधं केचित्सीकमाश्चर्यं केचित्कालस्य संज्ञितं केचिद्रामेश्वरं पुण्यं केचित्कांतारमादरात्
८ मार्गप्रवर्त्तिकमार्गेण शिवं पूज्य द्विजोत्तमाः अनायासेन संसाराद्विमुक्ता वेदवित्तमाः केचित्त्वै गृहे देवं समाराध्य यथाबलं पूर्वोक्ते त्वै
नैव मार्गेण विमुक्ता भवबंधनात् केचिद्योगेश्वयादेव पूर्वोक्तेनैव वर्त्मना श्रद्धया पूज्य देवेशं मुक्तवंतो महासुरं ४७ किमत्र बहुनोक्तेन श्रू मुक्तिप
यतां मुनिपुंगवाः पूजया सर्वजंतूनां भोगमोक्षौ च नान्यथा तस्माद्वर्णोप्यमुनर्वाक्तेनैव वर्त्मना पूजयध्वं महादेवं भुक्तिफलप्रदं इति श्रुत्वा पू.
मुनिश्रेष्ठाः सूतं सर्वार्थसागरं प्रणम्य पूजयामासुरीशं करशिरःप्रयत्नं ५० ते च पुत्राश्च पौत्राश्च ज्ञातयः जुहरो जनाः पूजयामासुरीशानं
मुनिभिस्तैः प्रचोदिताः पूजया सदृशं पुण्यं नास्ति लोकत्रयेष्वपि पूजयैव महादेवः शंकरः परमेश्वरः नीलकंठो विरूपाक्षः शिवो नित्यं
प्रसीदति पूजितो देववरो देवेशो पुराणे सर्वकारणं पूजिता देवताः सर्वा इति वेदांतनिश्चयः भोगमोक्षं च लभते नात्र कार्या विचारणा ५४ इति
श्रीस्कंदपुराणे सूतसंहितायां शिवमाहात्म्यखंडे चतुर्थोध्यायः नैमिषीया ऊचुः भगवन् सर्वशास्त्रार्थपरिज्ञानवतां वर अहि पूजाविधिं श ८

भुक्ति

केः परायाः संग्रहेण तु १ सूत उवाच वक्ष्ये पूजाविधिं शक्तेः परायाश्चास्तिकोत्तमाः अत्यंतश्रद्धया सर्वे शृणुध्वं मुक्तिदं २ पूजा शक्तेः परायास्त
द्विविधा परिकीर्तिता बाह्याभ्यंतरभेदेन वा स्यात्तु द्विविधा मता ३ वैदिकी तांत्रिकी चेति द्विजेंद्रास्तांत्रिकी तु सा तांत्रिकस्यैव नान्यस्य वैदिकी वैदि
कस्य हि ४ इत्थं समस्तदेवानां पूजाविधिर्व्यवस्थिता अविज्ञायान्यथा पूजां कुर्वन्याति मानवः आसनावाहने चार्घ्यं पाद्यमाचमनं तथा
स्नानं वासोत्तरीयं च भूषणानि च सर्वशः ६ गंधं पुष्पं तथा धूपं दीपमन्नेन तर्पणं माल्यानुलेपनं चैव नमस्कारं विसर्जनं सर्वमात्
कया कुर्यान्मातृका मंत्रनायिका मातृकाव्यतिरेकेण मंत्रा नैव हि सत्तमाः ८ मातृका च त्रिधा स्थूला सूक्ष्मा सूक्ष्मतरापि च गुरूप
देशतो ज्ञेया नान्यथा शास्त्रकोटिभिः ९ अथाभ्यंतरपूजायामधिकारे भवेद्यदि त्यक्त्वा बाह्यां स्वामिमां पूजामाश्रयेत् परां बुधः १० पू
जाभ्यंतरा सापि द्विविधा परिकीर्तिता साधारा च निराधारा निराधारा महत्तरा ११ साधारा या तु साधारे निधारा तु संविदि आधारे वर्णसं
ज्ञस्तु विग्रहे परमेश्वरी आराधयेदतिप्रीत्या गुरुणोक्तेन वर्त्मना या पूजा संविदि प्रोक्ता सा तु तस्यां मनोलयः १२ संविदेव पराशक्तिर्नेत
रा परमार्थतः अतः संविदितां नित्यं पूजयेन्मुनिसत्तमाः १४ संविद्रूपातिरेकेण यत्किंचित्प्रतिभासते ह्यसंसार आख्यातः सर्वेषामात्मना

स्कं.सं.
८

मपि अतः संसारनाशाय सा शिलीमात्मरूपिणी आराधयेत्सदा शक्तिं प्रपंचोल्लासवर्जितां संविदा चक्रशब्देन संविद्रूपा मनाकुला अर्चये
दादरेणैव शिवामादौ महामते: १७ पुनः समस्तमुरुज्यस्वरूपं परसंविदं स्वात्मनैवानुसंधाय पुनस्तत्र विसर्जयेत् स्वानुभूत्या स्वयं साक्षात्सा
क्षात्तां महेश्वरीं पूजयेदादरेणैव पूजा सा पुरुषार्थदा पूजाविधिर्मया प्रोक्तः प्रोक्तो वेदैकदर्शिनः पूजयध्वं भवंतोपि मुदानामुक्तवर्त्मना २०
इति श्रीस्कं॰सं॰ शिवमाहा॰ पंचमोध्यायः नैमिषीया ऊचुः भगवन् शिवभक्तस्य कथं पूजा प्रकीर्तिता फलं च कीदृशं प्रोक्तं पूजायास्तद्वदादरात्
१ सूत उ॰ वक्ष्ये पूजाविधिं विप्राः शिवभक्तस्य सादरं शृणुध्वं श्रद्धयोपेताः कुरुध्वं यत्नतः सदा येन केन प्रकारेण शिवभक्तस्य जा
यते मनस्तुष्टिस्तथा कुर्यात्पूजां सेव प्रयोदिता मुदं नोयं समाराध्य शिवभक्तस्य सादरं पादं प्रक्षालयेत्सापि पूजाविभाग ईयसी तैलाभ्यंगं तथा
पूजां प्रवदंति मनीषिणः गात्रप्रमर्दनं प्रथमस्य शिवभक्तस्य सुव्रताः अन्नपानप्रदानं च भोक्ता पूजा गरीयसी अर्घदानं च पूजा स्यात् वस्त्रदा
नमपि द्विजाः स्रक्चंदनादिदानं च वनितादानमेव च भूमिदानं च गोदानं तिलदानमपि द्विजाः जलपात्रप्रदानं च गृहदानं तथैव च ताल
वृंतप्रदानं च पात्रदानं तथैव च छत्रपादुकयोर्दानं शय्यादानं तथैव च शिवभक्तस्य पूजेति प्रवदंति विपश्चितः ८ पुरा कश्चित् द्विजा वै ८

श्यः समृद्धो भून्महीतले तस्य पुत्राः समुत्पन्नाश्चत्वारो वेदवित्तमाः १० तेषां ज्येष्ठतमः पुत्रः सत्यवादी महाधनः सर्वभूतानुकंपी च ब्रह्म
चर्यपरायणः शिवभक्तः सदा विप्राः प्रसन्नो नियताशनः जन्ममृत्युभयाक्रांतस्तरमाण विमुक्तये श्रीमहारण्यश्री मेस्तवज्ञ विधावाप्तिं सं वि
तां स्वधनं शिवभक्तेभ्यः प्रदत्वा श्रद्धया सह १३ पूजया शिवभक्तानां विमुक्तः कर्मबंधनात् द्वितीयो वैश्यपुत्रस्तु धनिकोतीव सुव्रताः १४ सोम
नाथं महास्थानं सर्वकामफलप्रदं समागत्य सह स्वस्य भार्यया वेदवित्तमाः १५ सर्वस्वं शिवभक्तेभ्यः प्रदत्वा श्रद्धया सह पूजया शिवभक्तानां त
स्प थामुक्तिमवाप्तवान् पुत्रस्तृतीयो वैश्यस्य मोक्षितां शेषबांधवैः अन्यायेनैव मार्गेण वर्तमानश्चिरं द्विजाः महाधनपतिर्भूत्वा एवं पुण्यबलेन सः
श्रीमद्व्याघ्रपुरं पुण्यं समागत्य द्विजोत्तमाः अन्नपानं तथा वस्त्रं चंदनं पुष्पमेव च तांबूलं शिवभक्तेभ्यः प्रदत्वा श्रद्धया सह संवत्सरत्रयं त
स्या पूजामेवं द्विजोत्तमाः पूजया शिवभक्तानां विमुक्तः कर्मबंधनात् वैश्यपुत्रश्चतुर्थोपि बालत्वानविचारतः हृत्वा सर्वधनं तेषां स्व
मादाय मु[illegible]निश्वराः विटानां च नटानां च गायकानां तथैव च मत्तानामपि तद्दत्वा सदा वेश्यापरो भवत् स पुनः सर्वरोगार्तो गृहहीनो
ब्रह्मरक्षसा एवं चिरगते काले पिता तस्य महाधनः २० पुत्रस्नेहेन संतप्तः सत्वरं द्विजपुंगव सर्वशास्त्रार्थतत्वज्ञं समागत्य मुनीश्वराः

४

सू·सं· २४ प्रणम्य दंडवद्धिमं दत्वा तस्मै महाधनं पुनर्विज्ञापयामास पुत्रवृत्तमशेषतः श्रुत्वा तत्तं द्विजस्तस्य ब्राह्मणैः पंडितोत्तमैः विचार्य
सुचिरं कालं विनिश्चित्याब्रवीद्द्विजाः ब्राह्मण उ० श्रीमद्वृद्धाचलं नाम स्थानं सर्वैर्निषेवितं सर्वोपद्रवनाशाय शंकरेण विनिर्मितं ब्रह्मविष्ण्वा
१० दिभिर्नित्यं संसेवितं सर्वदादरात् तत्रास्ति दर्शनादेव वत्सराद्भुक्तिमुक्तिदं अल्पदानेन सर्वेषां महादानफलप्रदं ब्रह्महत्यासुरापानस्वर्णस्ते
यादिनाशनं अगस्त्येन चरन्स्वार्थे लोकानां पूजितं पुरा मणिमुक्तानदीनीरे सर्वतीर्थसमावृते अस्ति तत्र हि पुत्रेण समागत्य ममाधि
य नद्यामस्यां स्वपुत्रेण सहस्नात्वा दिने दिने श्रीमद्वृद्धाचलेशानं दंडवत्प्रणिपत्य वै च कृत्वा प्रदक्षिणं भक्त्या शतमष्टोत्तरं हरं प्रसाद
यित्वा सदैतस्य ब्राह्मणं चान्यमेव च शिवभक्तं समाराध्य स्थानेस्मिन् श्रद्धया सह पूजया शिवभक्तस्य पुत्रमुद्धरयत्वतः सूत उ० एवमु
क्तस्तु वैश्योपि ब्राह्मणेन समाहितः सह पुत्रेण चार्थेन भार्यया बंधुबांधवैः श्रीमद्वृद्धाचलं पुण्यं समागत्य मुनीश्वराः मणिमुक्तानदीतो
येमहापापविनाशने स्नात्वा नत्वा महादेवं श्रीमद्वृद्धाचलेश्वरं ३६ भक्त्या प्रदक्षिणीकृत्य नित्यमष्टोत्तरं शतं मनोरमं मंडपं कृत्वा तत्र छिन्ने दत्वा
गिने नित्यमपूजयामास शिवभक्ताननतिप्रियः धनेन नवधान्येन तिलैर्नतंदुलैस्तथैव तैलेन तथोदकेन दुकूलैर्नीरमलपुष्पाभि १०

ता५

रणैरपि द्विजान्मनोनुकूलेन च पूजनेन ३७ एवं संवत्सरे नीते पुत्रो नीरोगतां गतः पूजया शिवभक्तानां निर्गतो ब्रह्मराक्षसः ३८ स पुनः शि
वभक्तेभ्यः प्रदत्वा धनमर्जितं अस्मिन्देशे विमुक्तोभूत्पूजयापरयानया पिता तस्य महाधीमान्देशस्यास्य तपोधनाः ज्ञात्वा माहात्म्यमाह्लादा
त्सर्वस्वं वेदवित्तमाः प्रदत्वा देवभक्तानां विमुक्ताः कर्मबंधनात् तस्य बंधुजनाश्चैव शिवभक्तस्य पूजया अनायासेन संसाराद्विमुक्ता
स्तत्र सुव्रताः अस्मिन्देशे प्रदत्तं यत्तु णिमात्रमपि द्विजाः तदनंतं भवत्येव नात्र कार्या विचारणा अस्त्वाणुमात्रं योदेशेस्मिन्मुनिसत्तमाः
योभुंक्ते तस्य संसारान्न हि मुक्तिः कदाचन अगस्त्यशिष्यो धर्मिष्ठः श्वेताख्यो भगवान्मुनिः वैश्यपुत्रस्य वैश्यस्य बंधनामपि सुव्रताः श्रु
त्वा मुक्तिमगस्त्येन प्रेरितो मुनिसत्तमाः प्राप्येतत् श्रद्धया स्थानं श्रीमद्वृद्धाचलाभिधं मणिमुक्तानदीतोये स्नानं कृत्वा समाहितः ४७
अर्कवारे तथा रम्ये पर्वण्यार्द्रादिने तथा मघर्क्षे च महादेवं श्रीमद्वृद्धाचलेश्वरं पूजयामास धर्मात्मा मणिमुक्तानदीजलैः तज्जलं पू
जितं तेन श्वेतेनैवाभवन्नदी ४८ नाम्ना श्वेतनदी सुक्ता सर्वपापविनाशिनानी पुनः श्वेतो मुनिः श्रीमान् श्रद्धयापरया सह ५· पू
जयामास स धर्मज्ञः शिवभक्ताननेकधा देवदेवो महादेवः श्रीमद्वृद्धाचलेश्वरः सान्निध्यमकरोत्तस्य भक्तानां पूजया तथा मुनिश्र

सं॰सं॰ देवदेवेशं श्रीमद्वृद्धाचलेश्वरं पूजयामासुः पुष्पेण पंचेनोदकेन च एतस्मिन्नंतरे विप्राः शिवस्य परमात्मनः प्रसादाच्छिवभक्तानां पूजया
११ परयातथा अवाप परमां मुक्तिं मुनिः श्वेतो महामतिः बहुनात्र किमुक्तेन ब्राह्मणा वेदवित्तमाः पूजया शिवभक्तानां भोगमोक्षौ न चान्यतः
इति श्रुत्वा माहात्म्यं ते नैमिषारण्यवासिनः सादरं पूजयामासुः शिवभक्ताननेकधा पूजया शिवभक्तानां प्रसन्नः परमेश्वरः ननर्त पुर
तस्तेषां मुनीनामंबिकापतिः मुनयो देवदेवस्य शंकरस्य शिवस्य तु दृष्ट्वानंदं महान्तं तमवशा अभवन्मुदा ५८ इति श्रीसूतसंहि
तायां शिवमाहात्म्यखंडे षष्ठोऽध्यायः नैमिषीया ऊचुः भगवन् श्रोतुमिच्छामः सर्वतत्त्वविशारद केचित्केवलविज्ञानं प्रशंसंति वि
मुक्तये १ केचित्सुचिरं कर्मज्ञानेन ब्रह्मवित्तम केचिद्दानं प्रशंसंति तथा केचिद्व्रतं बुधाः २ केचिद्यज्ञं प्रशंसंति तपः केचित्तपो दा
धनाः ब्रह्मचर्याश्रमं केचिद्गार्हस्थ्यं भुवि केचन ३ वानप्रस्थाश्रमं केचित्संन्यासं भुवि केचन तीर्थसेवां प्रशंसंति स्वाध्यायं भुवि केच
न ४ केचित्स्थाने महेशस्य विशिष्टे वर्तनं सदा एवमन्यानि केचिच्च शंसंति हि विमुक्तये ५ एषां यत्सर्वजंतूनां कर्तुं शक्यं वि
मुक्तिदं तदस्माकं महाभाग वद सूत हिते रत सूत उ॰ शृणुध्वं मुनयः सर्वे समाधाय मनः सदा पुरा नारायणो व्यासः श्रीवैकुंठनिवा ११

सिनं प्रणम्य दंडवद्भक्त्या पर्यपृच्छदिदं बुधाः सोऽपि नारायणः श्रीमाननंतो वर्णनमानसः समुत्थाय महालक्ष्म्या ब्रह्मणा च सुरैः सह वेदव्यासे
न कैलासमगमत्परमर्षयः तत्र देवासमासीनं नीलकंठमुमापतिं तेजसा भासयन्सर्वं चतुर्वक्त्रं चतुर्वर्गफलप्रदं १० ईश्वराणां च सर्वेषामीश्व
रं परमेश्वरं पतिं पतीनां परमं दैवतानां च दैवतं स्मृतिमात्रेण सर्वेषामभीष्टफलदायिनं सत्यविज्ञानमानंदं संपूर्णं सर्वसाक्षिणं प्रणम्य
परया भक्त्या पप्रच्छेदं जगद्धितं महादेवोऽपि सर्वज्ञः सर्वभूतहिते रतः प्राह सर्वामरेशानो वाचा मधुरया बुधाः ईश्वर उ॰ साधु साधु महा
विष्णो भवता पृष्टमच्युत १४ पुरा देवी जगन्माता सर्वभूतहिते रता मामपृच्छदिदं भक्त्या प्रणम्य परमेश्वरी १५ तदिदं कृपया वक्ष्ये
तव सर्वजगद्धितं ज्ञानमेव महाविष्णो मोक्षसाधनमच्युत ज्ञानं वेदशिरोद्भूतमिति मे निश्चिता मतिः अनेकजन्मसुकृतानां श्रौतस्मार्ता
नुवर्तिनां जायते तच्छिवज्ञानं प्रसादादेव मे हरे निवृत्तिधर्मनिरतो ब्राह्मणः पंकजेक्षण १८ उक्तो मुख्याधिकारीति ज्ञानाभ्यासे मया
हरे अन्ये च ब्राह्मणा विष्णो [illegible] ज्ञानश्च तथैव च १९ वैश्याश्च तारतम्येनाभ्यासेऽधिकारिणः द्विजस्त्रीणामपि श्रौतज्ञानाभ्यासेऽधिका
रिता २० अस्त्येव शूद्रस्य शुश्रूषोः पुराणेनैव वेदनं वदंति केचिद्विद्वांसः स्त्रीणां शूद्रसमानतां अन्येषामपि सर्वेषां ज्ञानाभ्यासो विधीयते

टीना

भाषांतरेण कालेनतेषांसोप्युपकारकः येषामस्तिपरिज्ञानंविनेहज्ञानसाधनं कल्प्यंनत्साधनंतेषांपूर्वजन्मसुकृतैर्मितःसुखीधिकं
तृणां रिणांमतिर्नैवविवर्जितं ज्ञानमुत्पद्यतेन्येषांमतिवदंविजायते २४ मतिवदंपरिज्ञानंनेहमुक्तिंमयछति विशुद्धंब्रह्मविज्ञानंविशु
द्धस्यैवसिध्यति २५ अतःसर्वमनुष्याणांनहिमुक्तिरयत्नतः यज्ञदानादिकर्मोलिनसाक्षान्मुक्तिसिद्धये २६ तस्मादयत्नतोमुक्तिःस
र्वेषांयेनहेतुना तंवदामिमहाविष्णोहितायजगतांश्रृणु २७ संतिलोकेविशिष्टानिस्थानानिर्मसाधव तेषामन्यतमेस्थानेवर्तनंभुक्तिमु
क्तिदं श्रीमद्वाराणशीपुण्यापुरीनित्यंनमस्त्रिया यस्यामुत्क्रमणस्यमालेः जंतोःकृपाबलात् तारकंब्रह्मविज्ञानंदास्यामिश्रेमसेहरेन
स्यामेवमहाविष्णोमरणात्यागोविमुक्तिदः २ स्थानंदक्षिणकैलाससमाख्यंसत्कृतंमया यत्रसर्वाणितीर्थानिसर्वलोकगतानितु सु
वर्णमुखरीतोयेपवित्रेपापनाशने मासिमासिव्रतीषानेमघर्क्षेमाघमासिच अर्कवारेथमाघस्यांस्नात्वानत्वामहेश्वरं श्रीकालहस्तिशै
लेशंपूजयामासुरीश्वरं यत्रसंवत्सरंभक्त्यायोवाश्विकोवाद्दिनेदिने दक्षिणकैलासवासिनंकरुणाधिंधिंभुंक्तेतस्यमहाविष्णो सि
ज्ञानंतस्यविमुक्तिदं जायतेमरणेकालेतेनसुक्तोभवेन्नरः ३१ श्रीमद्व्याघ्रपुरेनित्यंयोवाकेवामहेश्वरं मणम्यदंडवद्भूमौमासद्वादशकं

मुदा तस्यसिद्धापरामुक्तिर्नहिसंशयकारणं श्रीमद्वृद्धाचलेभक्त्यावर्तनेवत्सरद्वयं योवाकोवामहादेवंश्रीमद्वृद्धाचलेश्वरं मदक्षिणत्र
यंकृत्वाप्रणम्यपरमेश्वरं तस्यमुक्तिरयत्नेनसिद्ध्यत्येवनसंशयः स्थानेवर्तनमात्रेणविशिष्टेमानवोच्युत अयत्नेनविमुच्येतससंसारमहद्भया
त् स्मादिमुक्तिमन्विछन्नयत्नेनैवमानवः ४० भजेदन्यतमंस्थानमेतेषांश्रद्धयासह सूतउ० इतिश्रुत्वाहरिब्रह्ममुखैरमरैरपि वेदव्यासे
नलक्ष्म्याचसहवेदविदांवराः मणम्यपरयाभक्त्याभवंभक्तप्रियेश्वरं विहायपद्मसंभूतंपाराशर्यंसुरानपिश्रीमद्दक्षिणकैलासंसर्वदेशोत्त
मोत्तमं पंचयोजनविस्तीर्णंदशयोजनमायतं ब्रह्मणाचसरस्वत्यावज्रिणानीलयातथा कालेनहस्तिनाचान्यैर्देवगंधर्वराक्षसैः सुनिभिः
पूजितंस्थानंभुक्तिमुक्तिफलप्रदं ४१ अवापपद्मयाविष्णुःसहसर्वजगत्पतिः ब्रह्मावेदविदांमुख्याःश्रीमद्वृद्धाचलंमुदा माधवानाशुभा
स्त्यामसत्रंपापनाशनं वेदव्यासोमुनिःश्रीमान्विश्वविज्ञानसागरः माधवानादरेणैवश्रीमद्वाराणसीपुरीं तथासर्वेसुराविमान
मस्त्रान्मुक्तिमुक्तिदं श्रीमद्व्याघ्रपुरंभक्त्यामाप्तवंतोमुनीश्वराः तथान्येमुनयोव्याघ्रपुरंसर्वेतपोबलात् अगात्सुर्यत्रदेवेशःश्रीनट त्र
राजंविकापतिः अहंव्यासवचःश्रुत्वाश्रद्धयापरयासह श्रीमद्दक्षिणकैलासेपुष्पित्वावत्सरंबुधाः पुंडरीकपुरेतद्वच्छ्रीमद्वृद्धाचलंतथा ४२

स्कं·सं· वाराणस्याममविज्ञानं लब्धवाननिरोभवन्मुनिः । ततो विधियथाश्रद्धं वर्ते ध्येयं पंडितोत्तमाः ५२ एषामन्यतमे स्थाने विशिष्टे मुक्तिसिद्धये वहवोवर्तना
देषु विमुक्ताभवबंधनात् ५३ इति श्रीसूतसंहितायां शिवमाहात्म्यखंडे सप्तमोध्यायः नैमिषीया ऊचुः कालसंख्या कथं विद्भिः कथिता
१३ कालवेदिभिः केन कालेन नन्वाब्धिर्जीवः कारण्यतेनघ १ सूत उ० कालसंख्यामयावक्तुं न शक्या जन्मकोटिभिः मुनींद्रैरपि देवैश्च
शिवेनापि महात्मना २ तथापि संग्रहेणाहं वक्ष्ये युष्माकमादरात् काष्ठा पंचदश प्रोक्ता निमेषाः पंडितोत्तमाः ३ तासां त्रिंशत्कला
तासां त्रिंशन्मौहूर्तिकी गतिः मुहूर्तानां द्विजास्त्रिंशदहोरात्रं तु मानवं ४ अहोरात्राणि विंशद्यापक्षः चंदशः स्मृतः पक्षद्वयेन मासः
स्यान्मासैः षड्भिर्द्विजोत्तमाः ५ अयनं द्वयनं वर्षं क्रमान्नेरक्षिणोत्तरे रात्रिर्दिवौकसां प्रोक्तं दिवा चैवोत्तरायणं ६ मनुष्याणां यथा तद्वद्देवा
नामपि सूरिभिः पक्षमासायनाद्यानां विभागः कथितो द्विजाः ७ दिव्यैर्द्वादशसाहस्रैः वर्षैः प्रोक्तं चतुर्युगं कृतं त्रेतायुगं विप्राः सहस्राणां त
चतुष्टयं ८ तस्य संध्या च संध्यांशः प्रोक्ता श्चाष्टशतानघाः त्रिभिर्वर्षसहस्रैस्तु त्रेता दिव्यैः प्रकीर्तिता कृताद्द्वापरः प्रोक्तं तदर्द्धं कलि
रुच्यते क्रमात्संध्या च संध्यांशः स्वकीयांशविवर्जितः १० त्रेताद्वापरतिष्याणां युगानां मुनिपुंगवाः एवं द्वादशसाहस्रं प्रोक्तं विप्राश्च
१३

तुर्युगं युगानामेकसप्तत्या मन्वंतरमिहोच्यते मनवो ब्रह्मणः प्रोक्ता दिवसे तु चतुर्दश आसन्मेकमहर्विप्राः कल्प इत्युच्यते बुधैः ताव
ती रात्रिरप्युक्ता ब्रह्मणः पंडितोत्तमाः १३ त्रिंशतैः पक्षिभिः कुल्पैर्ब्रह्मणो वर्षमीरितं वर्षाणां च शतं तस्य द्विपरार्द्धमिहोच्यते ब्रह्मणोन्ते मु
निश्रेष्ठा मायायां लीयते जगत् तथा विष्णुश्च रुद्रश्च महतो विलयं गतौ १५ ब्रह्मणश्च तथा विष्णोस्तथा रुद्रस्य सुव्रताः स्मृता ये विविधाः
स्वेषु कारणेषु लयं ययुः १६ माया च प्रलये काले परस्मिन्परमेश्वरे सत्यबोधसुखानंतब्रह्मरुद्रादि संज्ञिते अभेदेन स्थितिं प्राप्ति हेतु
स्तत्र सुदुर्गमः अन्यथाभानहेतुत्वादियं मायेति कीर्तिता १८ आत्मतत्त्वनिरस्कारात्तमइत्युच्यते बुधैः विद्यानाश्यत्वतो विद्यामोह
स्तु कारणत्वतः सदैलक्षण्यदृष्ट्येयमसदित्युदिता बुधैः कार्यनिष्पत्तिहेतुत्वात्करणं प्रोच्यते बुधैः २० कार्यवद्व्यक्तताभावादव्यक्तमि
ति गीयते एषमाहेश्वरी शक्तिर्नस्वतंत्रा परात्मवत् अनपायेव देवस्य शिवस्य परमात्मनः उदितः परमः कालस्तद्वशाः सर्वजंतवः सोपि
साक्षान्महादेवे कल्पितो मायया सह सर्वे काले विलीयंते न कालो लीयते सुरै २३ कालो माया च तत्कार्यं शिवेनैवाहतं बुधाः शिवः काला
नवच्छिन्नः कालतत्त्वं यथा तथापि कालो सत्वान्मायया सह त्रीयते शिवो न विलयं याति द्विजाः सत्यस्वभावतः २५ अस्य ज्ञानां प्रनष्टाना

तथा ~

सू.सं.
१४

सुखाद्यानां तथैव च शिवः कालानवच्छिन्नः कारणं त्विति कीर्तितः २६ मत्प्रसादस्य देवस्य ब्रह्मविद्यावादिकं परं तदधीनं जगत्सर्वं मित्ये
वाश्नन्ती श्रुतिः असंख्याविलयं याताः ब्रह्माणः पंडितोत्तमाः असंख्या विष्णवो रुद्रा असंख्यावासवादयः एक एव शिवः साक्षा
त्सच्चित्संनहेतवे ब्रह्मविष्णुशिवाख्याभिः कल्पनाभिर्विजृंभितः २८ रजोगुणेन संछन्नो ब्रह्माधिष्ठाय तं गुणं स्रष्टा भवति सर्वस्य ज
गतः पंडितोत्तमाः ३० गुणेन तमसा छन्नो विष्णुः सत्वगुणं बुधाः अधिष्ठाय भवेत्सर्वजगतः पालकः प्रभुः तथा सत्वगुणाछन्नो रुद्रो वि
मास्तमोगुणं अधिष्ठाय भवेद्धंता जगतः सत्सवादिनः ब्रह्मणो मूर्तयो नंता जायंते गुणभेदतः तथा विष्णोस्तथेशस्य गुणभेदेन सुव्रताः का
श्चित्सत्वगुणोद्रेकाद्विशिष्टा मूर्तयो द्विजाः काश्चित्तमोगुणोद्रेकाद्भिन्ना ब्योवेदवित्तमाः परस्परोपजीव्यास्तु हिताय जगतां द्विजाः सर्वमूर्ति
ष्वयं साक्षाच्छिवः सत्यादिलक्षणः ३५ अप्रच्युतात्मभावेन सदा तिष्ठति सुव्रताः तमहं प्रत्ययव्याजात्सर्वे जानंति जंतवः ३६ तथापि शिवरू
पेण न विजानंति मायया मत्प्रसादाद्देवदेवस्य श्रुत्युत्पन्नात्मविद्यया बहूनां जन्मनामंते जानंत्येव शिवं बुधाः ३७ मत्प्रसादहीनाः पापिष्ठा मोहि
ता मायया जनाः नैव जानंति देवेशं जन्मनाशादिपीडिताः ३८ यां यां मूर्तिं समाश्रित्य ब्रह्मभावनया जनाः आराधयंति ते सर्वे क्रमाज्जा १४

नंति शंकरं रुद्रस्य मूर्तिमाराध्य प्रसादात्क्रमवर्जिताः अयत्नेनैव जानंति शिवं सर्वत्र संस्थितं ४० रुद्रमूर्तिषु सर्वासु शिवो तीव प्रकाशते अन्या
सु तारतम्येन शिवः साक्षात्प्रकाशते आदर्शे निर्मले यद्वद्धरं भाति सुरवंदिताः तथातीव महादेवो भाति शुद्धासु मूर्तिषु कानिचिद्वेदवा
क्यानि ब्रह्मण्येव वेदवित्तमाः रुद्रमूर्तिं समाश्रित्य शिवे परमकारणे पर्यवस्यंति विप्रेंद्रास्तथा वाक्यानि कानिचित् विष्णुमूर्तिं समाश्रि
त्य ब्रह्ममूर्तिं च कानिचित् आग्नेयीं मूर्तिमाश्रित्य श्रुतिवाक्यानि कानिचित् सूर्यमूर्तिं तथान्येषां मूर्तिं चाश्रित्य कानिचित् ४५ पुराणे दश
भिर्विप्राः प्रोक्तः शंभुस्तथैव च चतुर्भिर्भगवान्विष्णुर्द्वाभ्यां ब्रह्मा प्रकीर्तितः अग्निरेकेन विप्रेंद्रास्तथैकेन दिवाकरः एवं मूर्तिभिधानेन
द्वारेणैव मुनीश्वराः प्रतिपाद्यो महादेवः स्थितः सर्वासु मूर्तिषु स एव मोचकः साक्षाच्छिवः सत्यादिलक्षणः ब्रह्मविष्णुमहादेवैरुपास्यः
ना सर्वदा द्विजाः अतोन्यदातं विप्रेंद्रा अविश्वस्योयमेव हि अयमात्मविदामात्मा स्वयमज्ञानिनामपि अस्मादेव समुत्पन्नं स्थितमस्मिन्द्विजो
त्तमाः ५० अस्मिन्नष्टमिदं सर्वं जगन्मायामयं बुधाः प्रतिकूलत्वं मुनिश्रेष्ठा ब्रह्मनारायणादयः अस्मादेव विजायंते विलीयंते यथा पुरा
अयमेको महादेवः साक्षात्सर्वांतरो हरः अंबिकासहितो नित्यं नीलकंठस्त्रिलोचनः चंद्रार्द्धशेखरः श्रीमान्श्रीमद्व्याघ्रपुरे तथा ५३ वा

स्कं·सं· राण्यांतथा सोमनाथे वृद्धाचलाभिधे वेदारण्ये च वल्मीके श्रीमत्केदारसंज्ञिते ५४ श्रीमद्दक्षिणकैलासे सर्वस्थानोत्तमोत्तमे नित्यं सन्नि
१५ हितो भक्तैरखिलैरमरेश्वरैः उपास्यः सर्वदा विप्राः सर्वैर्नित्यसुखकांक्षिभिः कोन्यः संसारमग्नानामुपास्यो मोचकः प्रभुः ५५ ऋते साम्बान्महा
देवमित्येषा शाश्वती श्रुतिः अतः सर्वप्रयत्नेन भवद्भिर्मुनिसत्तमैः कालपाशविनाशाय शंकरः शशिशेखरः उपासनीयः श्रोतव्यो मंतव्यश्च
द्विजोत्तमाः इति सूतवचः श्रुत्वा नैमिषारण्यवासिनः शिवः कालानवच्छिन्न इत्यजानंत वंदिताः ५९ इति श्रीस्कंदपुराणे सूतसंहिता
यां शिवमाहात्म्यखंडे अष्टमोध्यायः नैमिषीया ऊचुः भगवान्विष्णुनानेन कथं भूमिः समुद्धृता तदस्माकं समासेन वद सर्वार्थवित्त
म १ सूत उ॰ आसीदेकार्णवं घोरमविभागं तमोमयं शान्तानलादिकं सर्वं न प्रज्ञायत किंचन तदैवैकांबुधौ नष्टजगति स्थावरादिके विष्णुः
साक्षात्समुद्भूतस्तदा तस्मिन्महोदधौ स पुनर्वेदविच्छ्रेष्ठाः सहस्राक्षः सहस्रपात् सहस्रशीर्षा पुरुषो द्विजा नारायणाभिधः ४ सुष्वाप सलिले
साक्षाद्विष्णु र[illegible]मकारणं ऋतं सत्यं परं ब्रह्म पुरुषं सांबमीश्वरं ५ ऊर्ध्वरेतं विरूपाक्षं हृदि ध्यायन्महेश्वरं इमं चोदाहरंत्यत्र श्लो
कं नारायणं प्रति ६ आपो नारा इति प्रोक्ता आपो वै नरसूनवः तायदस्यायनं तेन प्रोक्तो नारायणः स्मृतः स्वयं स पुनर्देवदेवस्य शिवस्य परमात्मनः १५

नः आज्ञया सलिले मग्नां महीमुद्धर्तुमिच्छया वाराहं रूपमास्थाय महापर्वतसन्निभं अट्टहासं द्विजाः कृत्वा प्रविश्य च रसातलं दंष्ट्राभ्यां समुज्ज
हारैनां महीमंतर्गतां जले तस्य दंष्ट्राग्रविन्यस्तामणुप्रायां महीमिमां १० दृष्ट्वा विस्मयमापन्ना जनलोकनिवासिनः ते पुनर्वेदविच्छ्रेष्ठाः सिद्धा
ब्रह्मर्षयो हरिं अस्तुवन् श्रद्धया विष्णुं महाबलपराक्रमं ब्रह्मर्षय ऊचुः नमस्ते देवदेवानामादिभूत सनातनः पुरुषाय पुराणाय नमस्ते पर
मात्मने जरामरणरोगादिविहीनायामलात्मने ब्रह्मणां पतये तुभ्यं जगतां पतये नमः लोकालोकस्वरूपाय लोकानां पतये नमः शंखचक
क्रगदापद्मपाणये विष्णवे नमः नमो हिरण्यगर्भाय श्रीपते भूपते नमः १५ नमः स्वयंभुवे तुभ्यं सत्त्वात्मादिस्वरूपिणे विराट्प्रजापते
साक्षाज्जनकाय नमो नमः विश्वतैजसरूपाय प्राज्ञरूपाय ते नमः जाग्रत्स्वप्नस्वरूपाय नमः सुषुप्त्यात्मने परं अवस्थासाक्षिणे तुभ्य
मवस्थावर्जिताच्युत तुरीयाय विशुद्धाय तुर्यातीताय ते नमः प्रथमाय समस्तस्य जगतः परमात्मने ॐकारैकस्वरूपाय शिवाय शिव
दप्रभो सर्वविज्ञानरूपं त्वन्नमो विज्ञानदायिने जगतां योनये तुभ्यं वेधसे विश्वरूपिणे २० नित्यशुद्धप्रबुद्धाय मुक्ताय सुखरूपिणे नमो
वाचामतीताय नमो गम्याय ते नमः अप्रमेयाय शान्ताय स्वयंभानाय साक्षिणे नमः पुंसे पुराणाय श्रेयःप्राप्त्यैकहेतवे आकाशादिप्रपं

संकर्षणात्मने नमो निरुद्धरूपाय

स्कं॰सं॰ वायनमस्तुभ्यं शंकर मायारूपाय मायायाः सत्ताहेतो जनार्दन नमः प्रद्युम्नरूपाय नमः वासुदेवाय तेनमः २४ योगाय योगगम्याय यो
१६ गानामिष्टसिद्धिद नमस्ते मत्स्यरूपाय नमस्ते कूर्मरूपिणे २५ नमस्तुभ्यं वराहाय नारसिंहाय तेनमः नमो वामनरूपाय नमो रामत्र
यात्मने नमः कृष्णाय सर्वज्ञ नमस्ते कल्किरूपिणे कर्मिणां फलरूपाय कर्मरूपाय तेनमः कर्मकर्त्रे नमस्तुभ्यं नमस्ते कर्मसाक्षिणे न
मो विज्ञप्तिरूपाय नमो वेदांतरूपिणे गुणत्रयात्मने तुभ्यं नमो निर्गुणरूपिणे अद्भुताय मरेशाय शिवमौलिकहेतवे नमो नक्षत्ररूपाय न
मस्ते सोमरूपिणे नमः सूर्यात्मने तुभ्यं नमो वज्रधराय ते ३० नमस्ते पद्मनाभाय नमस्ते शार्ङ्गपाणये नमस्तुभ्यं विशालाक्ष नमः श्रीध
रनायक नमः संसारतप्तानां तापनाशैकहेतवे योनस्मान्नैकनिष्ठानां मचिराद्देवमुक्तिद अन्येषामपि सर्वेषां संसारैकमहाव्यय नमो
सुरविमर्दाय नमो विद्याधरार्चित क्षीरोदशायिने तुभ्यं नमो वैकुंठवासिने नमो रागाभिरक्तानां वैराग्यप्रदायिने सूत उ॰ इत्थं ब्रह्मर्षि
भिः सिद्धैः सनकाद्यैरभिष्टुतः प्रसादमकरोत्तेषां श्रीवाराहशरीरभृत् ३५ ततः पृथ्वीं वराहीयमहीं सा साक्षान्महीपतिः विसृज्य रूपं वाराहं
स्वयं ब्रह्माभवद्धरिः सा मही संस्थिता विप्रा जलस्योपरि नौरिव तस्यां ब्रह्मा महादेवप्रसादाद्देवसत्तमः पूर्वसर्गोद्भवं विश्वं स्थानमखिलान्मरप्रभुः १६
लं रिनौ

यथा पूर्वं द्विजाः सृष्टुं मतिं चक्रे प्रजापतिः इति श्रुत्वा मुनिश्रेष्ठा नैमिषारण्यवासिनः पूजयामासुरत्यर्थं सूतं सर्वहितप्रदं ३९ इति श्रीस्कंद
पुराणे सूतसंहितायां शिवमाहात्म्यखंडे नवमोध्यायः नैमिषीया ऊचुः कथं ब्रह्मासृजदिदं नूनं जगत्सर्वं चराचरं संग्रहेण तदस्माकं
ब्रूहि पुण्यवतां वर १ सूत उ॰ सिसृक्षोर्ब्रह्मणस्तस्य ब्राह्मणा वेदवित्तमाः अबुद्धिपूर्वकः सर्गः कल्पादिषु यथा पुरा २ प्रादुर्भूतो विका
भर्तुराज्ञयैव नमोमयः तमो मोहो महामोहस्तामिस्रोह्यंधसंज्ञितः अविद्या पंचपर्वैषा प्रादुर्भूता महात्मनः पंचधावस्थितः सर्गः
प्रवर्त्तस्तामसा द्विजाः अंतर्बहिश्चावेदज्ञास्तत्प्रकाशस्तथैव च स्तब्धोनिःसंज्ञ एवायं प्रभवन्मुनिपुंगवाः ५ तं दृष्ट्वा भगवान् ब्रह्मा सिसृक्षुः
सर्वमास्तिकाः असाधक इति ज्ञात्वा पुनः स परमेश्वरः ६ अमन्यत तस्य वेदज्ञा ब्रह्मणो ध्यायतः पुनः सर्गो वर्तत दुःखाद्यस्तिर्यक्स्रोतः
प्रजापतेः पश्वादिः स तु विज्ञेयस्तिर्यक्स्रोतः समासतः तं च साधकमित्येवं ज्ञात्वामन्यत्परं प्रभुः ८ पुनश्चिंतयतस्तस्य सात्त्विकोव
र्त्तत द्विजाः ऊर्ध्वस्रोत इति ख्यातः सर्गो नीव सुखावहः ९ देवसर्ग इति ख्यातः सत्यः सत्यपरायणाः तमप्यसाधकं मत्वा ब्रह्मा विदां
वराः १० अमन्यत परं सर्गं राजसं वेदिकोत्तमाः तस्य चिंतयतः स्रष्टुं प्रादुरासीद्धि वाज्ञया अर्वाक्स्रोत इति ख्यातः सर्गो विप्रा
ब्रह्मा

स्कं.सं

१७

स्वमानुषः पुनश्चिंतयतस्तस्य ब्रह्मणः परमेष्ठिनः महादेवाज्ञया विप्राः सर्गोभूतादिकोभवत् इति पंचविधास्सृष्टिः प्रवृत्ता परमेष्ठिनः
सर्गस्तु प्रथमोज्ञेयो महतो ब्रह्मणस्तु सः द्वितीयो वेद विज्ञेयः तन्मात्राणां च भौतिकः वैकारिकाख्यो वेदज्ञास्तृतीयः परिकी-
र्तितः सोयमैंद्रियकः सर्गइत्येते प्राकृतास्त्रयः १५ चतुर्थो मुख्यसर्गाख्यो मुख्यस्तु स्थावराभिधः तिर्यक्स्रोतस्तु पश्वादिः पंचमः
परिकीर्तितः षष्ठस्तु देवसर्गाख्यः सप्तमोर्वाक्प्रकीर्तितः अष्टमामुनिशार्दूला भूतप्रेतादिसंज्ञितः १७ कौमारो नवमः प्रोक्तः प्राकृ-
तो वैकृतश्च सः एषां मवांतरा भेदाः मया वक्तुं न शक्यते १८ अल्पत्वादुपयोगस्य द्विजानाघ वदाम्यहं सनकं च द्विजश्रेष्ठास्तथैव च सना-
तनं सनंदनं समाख्यं च तथैव ब्रह्मवित्तमाः ऋभुं सनत्कुमारं च ससर्जाग्रे प्रजापतिः २० ब्रह्मणो मानसाः पुत्रा इमे ब्रह्मसमा द्विजाः
महावैराग्यसंपन्ना अभवन्यं च सुव्रताः अकर्तात्मानुसंधानात्तु जातास्ते प्रजापतेः शिवध्यानैकमनसो नसृष्टौ चक्रुरे मतिं स्रष्ट्य श्रि
र्थं भगवान्ब्रह्मा लोकानामंबिकापतेः सुमोह मायया सद्यस्संदृष्ट्वा पुरुषोत्तमः बुबोधयत्तं ब्रह्माणं द्विजा नारायणः पिता प्रबोधितश्चतुर्व-
क्त्रो विष्णुना विश्वयोनिना महाघोरं तपश्चक्रे ध्यायन्विष्णुं सनातनं एवं चिरगते कालेनकिंचित्समपद्यत २१ ततः क्रोधो महानस्य १७

देव

ब्रह्मणो जायतात्तिकाः क्रोधेन तस्य नेत्राभ्यां प्रपतन्नश्रुबिंदवः एतस्मिन्समये तस्य ब्रह्मणः परमेश्वरः अदरात्कृपया बुद्धिं भगवान्करु-
णानिधिः सपुनर्देवस्य प्रसादार्दंबिकापतेः ततापपरं घोरं तपो विप्राश्चतुर्मुखः सृष्ट्यर्थं ब्रह्मणस्तस्य भ्रुवोर्घ्राणस्य मध्यतः अविमु-
क्ताभिधाद्देशात्स्वकीयात्तु विशेषतः त्रिमूर्तीनां महेशस्य द्विजा वेदार्थवित्तमाः प्रादुर्भूतो महादेवः सर्वदेवनमस्कृतः ३० अर्धनारी-
श्वरो भूत्वा प्रादुरासीद्दयानिधिः तमजं शंकरं साक्षात्तेजोराशिमुमापतिं सर्वज्ञं सर्वकर्तारं नीललोहितसंज्ञितं दृष्ट्वा नत्वा महाभक्त्या
स्तुत्वा हृष्टः प्रजापतिः उवाच देवदेवेशं सृजेमा विविधाः प्रजाः ब्रह्मणो वचनं देवः श्रुत्वा विश्वजगत्पतिः ससर्ज स्वात्मनात्तुल्यान्शिवो
रुद्रान्द्विजोत्तमाः तं पुनश्चाह देवेशं ब्रह्मा विश्वजगत्प्रभुः जन्ममृत्युभयाविष्टाः सृजदेवप्रजाइति एवं श्रुत्वा महादेवः प्रहस्य करुणा-
निधिः प्रोवाचाशोभनाः सृक्ष्ये नाहं ब्रह्मन्प्रजा इमाः अहं दुःखोदधौ मग्ना उद्धरामि प्रजाइमाः ३६ सम्यग्ज्ञानप्रदानेन गुरुमूर्ति- २
परिग्रहः त्वमेव सृज दुःखाद्याः प्रजाः सर्वाः प्रजापते ३७ इत्युक्त्वांतर्हितः श्रीमान्भगवान्नीललोहितः ततस्तस्य प्रसादेन नि-
वार्यकमलासनः रुद्रानस्यंतकल्पायत्र जास्त्रष्टोमवर्तकान् शब्दादीनि च भूतानि पंचीकृत्य द्विजोत्तमाः तेभ्यः स्थूलावरेवा

स्कं॰सं॰
१८
पुंवह्निं चैव जलं महीं पर्वतांश्च समुद्रांश्च वृक्षादीनपि सुव्रताः ४० कलादिद्युगपर्यंतान् कालानन्यान् विभुः सृष्ट्वावेरविरांसुख्यांसाध
कानसृजत्प्रभुः मरीचिं चस्वनेत्राभ्यां हृदयाद्भृगुमेव च शिरसोंगिरसं चैव तथोदानाद्द्विजोत्तमाः पुलस्त्यं पुलहं व्यानान्नाद्वानात्क्रतुमीश्वरः र
हंप्राणात्तथैवात्रिं श्रोत्राभ्यां मुनिपुंगवाः समानाच्च वसिष्ठाख्यं संकल्पाद्धर्मसंज्ञितं एवमेतानजः श्रीमानसृजत्साधकोत्तमान् पुनस्त
दाज्ञया विप्रा धर्मः संकल्पसंज्ञितः मानवं रूपमापन्नः साधकैस्तु प्रवर्तितः ४५ ततश्चतुर्मुखः स्वस्य जघनादसुरान् द्विजाः सृष्ट्वा मूर्तिं पु
नस्त्यक्त्वा शरीरांतरमाप्तवान् सा तनुर्ब्रह्मणस्त्यक्ता रात्रिरूपाभवत्क्षणं पुनर्ब्रह्मा स्वदेहस्य मुखात्सत्त्वविजृंभितात् सृष्ट्वा सुरानजस्त
२ च्छरीरं त्यक्तवान् पुनः तत्तनुर्वै द्विजश्रेष्ठाः अहरूपं दिनं शुभं पुनश्च सत्त्वसंयुक्तं शरीरं भगवानजः आस्थाय ब्रह्मविन्मुखाः पितॄन् सृ
ष्ट्वा विहाय तत् शरीरांतरमापन्नश्चतुर्वक्त्रः शिवाज्ञया सा त्यक्ता मूर्तिर्द्विजाः सा तु संध्या तेनाभवद्द्विजाः ५० ब्रह्मणो विप्रहादेव रजसा परि
वेष्टितात् जज्ञिरे मनुजाः सर्वे त्यक्तं तद्विप्रदेहं पुनः ५१ ज्योत्स्नारूपेण निष्पन्नं पुनर्देहांतरं गतः ब्रह्मा नस्य शरीरात्तु रजसा सहिताद्द्विजाः ५२
क्षुधितास्तामिस्रा ताश्च राक्षसाश्च समास्तया भूतगंधर्वरूपाश्च समुत्पन्ना बलान्विताः ५३ पुनर्देहांतरं गत्वा ततो विश्वजगत्पतिः वयां १८

सि गर्दभानश्वान्मातंगान् रासभान् मृगान् ससर्जान्यांश्च विश्वात्मा तथैवोष्ट्रानमेव च ऋचं चैव त्रिवृत्सोमं तथा चैव रथंतरं ५५ अग्निष्टोमादि
कं सर्वं सह गिरा प्रजापतिः तथैव सर्वनामानि निर्ममे वेदशब्दतः पंचीकृतानि भूतानि ब्रह्मणा मुनयः पुरा सर्वेषां कारणत्वेन प्रोक्तानि
ब्रह्मवादिभिः एवं विचित्रं जगदंतरात्मा प्रजापतिः स्वमसमं सृष्ट्वा प्रसादतस्तस्य महेश्वरस्य पुनस्तमोरूपमवाप सद्यः ५८ इति श्री
स्कंदपुराणे सूतसंहितायां शिवमाहात्म्यखंडे दशमोऽध्यायः नैमिषीया ऊ॰ एवं सृष्ट्वा पुनर्ब्रह्मा स्थावराणि चराणि च भगवन् भगवा
नीशः किं चकाराद्भुतं वद १ सूत उ॰ संहारहेतुभूतेन तमसा परिवेष्टितः विहाय तत्तमोरूपं स्वस्थानामभिहृदये २ हिरण्यगर्भसंज्ञस्य ब्र
ह्मणो रूपमाप सः हिरण्यगर्भं वक्ष्यामि तथान्यदपि सुव्रताः ३ पंचभूतेषु जातेषु शब्दस्पर्शादिषु द्विजाः विज्ञानात्तेषु सत्त्वेन गुणेन ज्ञानशक्त
यः तथा समष्टिभूतानां द्विजाः स्थानां रजोगुणात् शब्दस्पर्शादिभूतेषु विज्ञानाहृतिशक्तयः ५ भूतेषु संस्थिता ज्ञानशक्तयः पंच संयुताः
समष्टिभूतं सर्वेषां मानसं करणं भवेत् तद्युक्तो भगवान् ब्रह्मा त्रिमूर्तीनां द्विजर्षभाः हिरण्यगर्भ इत्युक्तो मुनिभिः सूक्ष्मदर्शिभिः तथैव ब्रह्मवि
श्रेष्ठाः संयुताः क्रियाशक्तयः समष्टिभूताः प्राणानां भवेत्प्राणः शिवाज्ञया ८ तत्रस्थो भगवान् विष्णुः सूत्रात्मेति मुनिः सूक्ष्मदर्शिभिः कीर्तितः उभयत्रा

सू. सं.
१९ स्थितः साक्षाच्छिवस्तीनां महेश्वरः ९ अंतर्यामीति वेदेषु गीयते वेदवि[illegible]त्तमाः हिरण्यगर्भरूपं यः प्राणः श्रुतिषु निश्चितः १० स पुनर्भग
वान्ब्रह्मा मायये वस्तकं पुनः द्विधाकृत्वा मुनिश्रेष्ठा अर्द्धेन पुरुषोभवत् ११ अर्द्धेन नारी तस्यां तु विराजमसृजत्पुनः पुनश्च भगवानस्यांसृ
ष्टा स्वांते पैवच संम्राडाख्याभिधं विप्रा असृजल्लोकनायकः तेषु नस्तेन विप्रेंद्रा ब्रह्मांडेनाहनारवपः प्राधान्येन विराड्ब्रह्मांडमभिम
न्यते स्वराट्स्वरूपमुभयं संम्राडित्यब्रवी श्रुतिः १७ विराट्स्वायंभुवं विप्रा असृजन्मनुमास्तिकाः असृजद्योगिनीं नारीं शतरूपां तप
स्विनीं सा पुनर्मनुना तेन गृहीता तीवशोभना तस्यां तेन समुत्पन्नः प्रियव्रतस्तथैव च उत्तानपादसंज्ञश्च तथा कन्याद्वयं पुनः उत्तानपाद
जां कन्यां द्विजा दक्षप्रजापतेः आकूतिं दत्तवान्मुख्यो मानसस्य प्रजापतेः आकूत्यां मानसस्यास्य यज्ञो विप्राश्च दक्षिणा १८ यज्ञस्य जज्ञिरे
पुत्राः सुनयो द्वादशास्तिकाः दक्षाज्जाताश्च तस्याश्च तथा पुत्र्यश्च विंशतिः १९ धर्मस्य दत्ता दक्षेण श्रद्धाद्यास्तत्रयोदश तथैव तेन संप्रभाःश्र
द्धायाः कन्यका दश २० ताभ्यः ख्यात्यादयो विप्राः वशिष्ठः पट्च पंचर्षी एवं कर्मानुरूपेण प्राणिनामंविकापतेः आज्ञया बहवो जाताः
संख्याता द्विजर्षभाः स्वभावादेव संभूवं समस्तमिति केचन तत्रासिध्यति विप्रेंद्रा देशकालाद्यपेक्षया २२ कर्मणैव समुत्पन्नं समस्तमिति १९

केचन तच्छ्रुतिस्मृतिवादस्य विरुद्धं मुनिपुंगवाः पुराहिमवतः पार्श्वे मुनिः सत्यवतीसुतः सुमंतुर्जैमिनिश्चैव वैशंपायन एव च पैलः कपि
लसंज्ञश्च तथा विप्राः पतंजलिः अक्षपादः कणादश्च तथैवांगिरसो मुनिः मुकुंदो मोचकश्चैव महाकालो महामतिः कालरूपः कलामाली
कामरूपः कपिध्वजः वेदज्ञो वैदिको विद्वान्विदेही वेणुवाहनः बाल्वलो वकुलो वह्निर्वज्रदंडः परंतपः पापनाशः पवित्रश्च तथान्ये च महर्षयः
परस्परं विचार्याथ श्रद्धया परमर्षयः संशयाविष्टमनसस्तपश्चेरुर्महत्तरं एतस्मिन्नंतरे रुद्रः सर्वज्ञः करुणानिधिः स्वयमाविरभूत्तेषां पुरतः प
रमेश्वरः तं दृष्ट्वा मुनयः सर्वे प्रसन्नेंद्रियबुद्धयः ३० प्रणम्य परया भक्त्या भगवंतं त्रिलोचनं कृतांजलिपुटाः सर्वे पप्रच्छुः परमेश्वरं देवदेवो
महादेवः सर्वज्ञः करुणानिधिः कपर्दी नीलकंठश्च कालकालो महेश्वरः ३२ [illegible]सोमार्द्धशेखरः सोमः [illegible] सोमसूर्याग्निलोचनः उवाच
मधुरं वाक्यं मुनीनां संशयापहं ३३ ईश्वर उ० न स्वभावाज्जन्मस्थितिध्वंसा मुनीश्वराः न प्रधानकेवलेनापि न च केवलकर्मणा प्राणिनां
कर्मपाकेन मया च मुनिसत्तमाः जगतः संभवो नाशः स्थितिश्च भवति द्विजाः एवं कर्मानुरूपेण जगज्जन्मादि यन्मया एष स्वभावो वि
प्रेंद्रा इति वेदार्थनिर्णयः एवमुक्त्वा महादेवः सर्वज्ञः करुणानिधिः अनुगृह्य मुनिश्रेष्ठांस्तत्रैवांतर्हितोऽभवत् मुनयश्च पुनर्विप्राः समाभा

ग.ज्ञो

सू॰सं॰ ध्यपरस्परं अतीवप्रीतिमापन्ना अगमन्वेदवित्तमाः भवंतोपि मुनिश्रेष्ठाः प्राणिकर्मानुरूपतः सृष्ट्वा संहरतीशान इति विज्ञ जगत्सदा ६
२० निश्रुत्वा मुनिश्रेष्ठा नैमिषीयास्तपोधनाः प्रसन्नहृदयाः शर्वं पूजयामासुरादरात ७ इति श्रीसूतसंहितायां शिवमाहात्म्यखंडे एकादशो
ध्यायः नैमिषीया ऊ॰ भगवन्सर्वशास्त्रार्थपरिज्ञानवतांवर जातिनिर्णयमस्माकं वद वेदैकदर्शिनं १ सूत उ॰ वक्ष्ये लोकोपकाराय जा
तिनिर्णयमादरात् अगस्त्योपि पुरा पृष्टः षण्मुखं वृषवाहनं २ पुरा सर्वे मुनिश्रेष्ठाः प्रलये विलयं गते अंधकारावृते लोके विश्वोरंशो महा
द्युतिः सहस्रशीर्षपुरुषो रूपो विष्णोर्नारायणाभिधः क्षीराब्धौ चिंतयन्रुद्रं सुष्वाप ब्रह्मवित्तमाः कदाचित्पंकजं विप्रास्तरुणादित्यस
न्निभं तस्य सुप्तस्य देवस्य नाभ्यां जातं महत्तरं ५ हिरण्यगर्भो भगवान्ब्रह्मा विश्वजगत्सृतिः आस्थाय परमां मूर्तिं तस्मिन्पद्मे समुद्भौ
तस्य वेदविदां श्रेष्ठाः ब्रह्मणः परमेष्ठिनः महादेवाज्ञया पूर्ववासनासहितान्मुखात् ब्राह्मणा ब्राह्मणस्त्रीभिः सह जाता तपोधनाः
तस्य हस्तात्सह स्त्रीभिर्जज्ञिरे पृथिवीभुजः ऊरुभ्यां सहिताः स्त्रीभिः जाता वैश्याः शिवाज्ञया पद्भ्यां शूद्राः सह स्त्रीभिर्जज्ञिरे वेदवि
त्तमाः ८ स्वस्त्रीषु स्वस्य वैधेन मार्गेण स्यः स्वयं भवेत् अवरास्तनमाज्जातस्त्वनुलोमः प्रकीर्तितः उत्तमास्त्ववराज्जातः प्रतिलो
२०

म इति स्मृतः वर्णस्त्वानुलोमेन जातः स्यादांतरालिकः ११ वर्णेषु प्रतिलोमेन जातो व्रात्य इति स्मृतः ब्राह्मण्यां सधवायां यो ब्राह्मणेन हि
जोत्तमाः १२ जातश्चौर्येण कुंडोसौ विधवायां तु गोलकः नृपायां ब्राह्मणाज्जातः सवर्ण इति कीर्तितः चौर्यादस्यामनेनोत्थो नाम्ना न
क्षत्रजीवनः वैश्यायां ब्राह्मणाज्जातो निषादो वेदवित्तमाः अस्यामनेन चौर्येण कुंभकारोभिजायते ऊर्ध्वनापित एवासौ नाम्ना वेदविदां
वराः १५ शूद्रायां ब्राह्मणेनोत्थो द्विजाः पारशवः स्मृतः चौर्येणास्यां निषादोभ आम्नावेदार्थवित्तमाः दौष्यंत्यां ब्राह्मणाज्जात आपीनाख्यो
भवेद्द्विजाः आयोगव्यां तु विप्रेण पिंगलो नाम जायते विप्रायां क्षत्रियाज्जातः सूत इत्युच्यते बुधैः चौर्येणास्यामनेनोत्थो रथकार इति
स्मृतः क्षात्रियस्त्रीषु वैश्यानुभोजश्चौर्याद्द्विजायते वैश्यायां क्षत्रियाज्जातो माहिष्यो वृद्धसंज्ञितः चौर्येणास्यामनेनोत्थो भवेद्विरसंज्ञितः
शूद्रायां क्षत्रियाज्जातो दौष्यंत्याख्यो भवेद्द्विजाः २० चौर्येणास्यामनेनोत्थः शूलिको भवति द्विजाः ब्राह्मण्यां वैश्यतो जातः क्षत्ता भवति
नामतः अस्यामनेन चौर्येण [illegible] विप्राः प्रजायते जातो वैश्यात्क्षत्रियायां यः शालिको मागधश्च सः अस्यामनेन चौर्येण पुलिंदो जायते बुधाः
मणिकारस्तु वैश्यायां चौर्याद्वैश्येन जायते शूद्रायां वैश्यतो जात उग्र इत्युच्यते बुधैः अस्यामनेन चौर्येण कटकारः प्रकीर्तितः शूद्रा

सू.सं द्विमांगनायांतु चंडालोनाम जायते अस्यामनेन चौर्येण वा परासरक्त जायते २५ जातः शूद्रेण राजान्यां वैदेहाख्यश्च पुल्कसः अस्या
२१ मनेन चौर्येण वेलवाख्यो विजायते जातः शूद्रेण वैश्यायां भवेत्तन्तुशालिकः अनेनास्यां भवेच्चक्री चौर्याद्बुम्बविरांवरा चौर्याच्छूद्रे
णशूद्रायां जातो माणविको भवेत् अंवष्ठायां समुत्पन्नः सवर्णेन द्विजोत्तमाः आग्नेयनर्तकाख्यः स इति प्रोक्तो महात्मभिः करणा
छो यांतु विप्रेंद्रा माहिष्यां वै विजायते सतक्षेरथकारश्च प्रोक्तः शिल्पी च वर्द्धकी लोहकारश्च कर्मार इति वेदार्थवेदिभिः ३० विप्राया
मुग्रतो जातस्तक्षा इति प्रकीर्त्तितः वैश्यायां तेन निष्ठंत्र्यसमुद्रो नाम जायते ३१ ब्राह्मण्यां योनिषादेन जनितः स तु नापितः क्षत्र
यां योनिषादेन जातो धोनापितः स्मृतः विप्रायां नापिताज्जातो वेणुकः परिकीर्त्तितः राज्ञ्यां यो जनितस्तेन कर्मकारः स उच्यते
द्विजोत्तमा यां दौष्यंत्याद्गलव्धः प्रजायते वैश्यायां तु निषादेन सुनिषादो भिजायते ब्राह्मण्यां यो मुनिश्रेष्ठा वैदेहेन प्रजायते स नाम्ना
रजको ज्ञेयः पंडितैः पंडितोत्तमाः ३५ द्विजोत्तमायां चंडालाद्यः पुमान् जायते भुवि श्वपचः स तु विज्ञेयः सर्वशास्त्रविशारदैः ३६ श्वपचा
द्विप्रकन्यायां गुहको जायते सुतः वैश्यायां यस्तु चंडालाज्जातो दैनकवैलकः जनितोनेन शूद्रायां विप्रा आश्रमकः स्मृतः प्रतिलो
२१

मनिषादाद्यः शूद्रायां स तु भैरवः शूद्रायां मागधाज्जातः कुकुंदः प्रोच्यते बुधैः नृपायां मागधाज्जातः खनकः परिकीर्त्तितः खनका
द्राजकन्यायां मुद्दंधो नाम जायते आयोगवेन ब्राह्मण्यां चर्मकारः प्रजायते ४० विप्रब्रात्यात्तु विप्रायां वंदिको नाम जायते क्षत्रव्रात्या
न्नृपायां तु खल्लो मल्लश्च मल्लकः मल्लात्तु पिच्छिलस्तेन नयाख्यो जायते भुवि नराः करणसंज्ञस्तु करण कर्मसंज्ञिनः तेन द्रमिलजस
ज्ञोनृपायां वेदवित्तमाः वैश्यव्रात्यात्तु वैश्यायां सुधन्वा जायते द्विजाः अनेनाचार्यसंज्ञस्तु भारुषो भारुषादपि द्विजन्मा जायते तस्मा
न्मैत्रो मैत्रात्तु सात्वतः मैत्राद्वैदेहको जातः समानंगश्च कीर्त्तितः मानंगाज्जायते सूतः सूताद्दस्युः प्रजायते ४५ दस्योर्जातो मुनिश्रेष्ठा
मालाकारः समाख्यया प्रतिलोमनिषादेन कैवर्ताख्यो विजायते तिलकारस्त्रियां जात आयोगेन द्विजोत्तमाः नीलादिवर्णविक्रेतानां
प्रावेदार्थवित्तमाः कारो चारुपमाख्यायां निषादेन मुनीश्वराः चर्मजीवी समुत्पन्नः सर्वविज्ञानसागराः पुष्पाकं संग्रहेणैवमयोक्तो
जातिनिर्णयः यथागस्त्यात्श्रुतः पूर्वं सहरेरनुशासनात् स्वजात्युक्तं यथाशक्ति कुरुते कर्म यः पुमान् मुक्तिस्तस्यैव संसारादिति वे
दानुशासनं ५० सर्वेषां जन्मना जातिर्नान्यथा कर्मकोटिभिः पश्वादीनां यथा जाति जन्मनैव न चान्यथा ५१ सापि स्थूलस्य देह
श्री

सू॰सं॰
२२

स्वभौतिकस्य न चात्मनः तथापि देहेऽहंमानाद् आत्मा विप्रादिसंज्ञितः स्वस्वरूपापरिज्ञानाद् देहेऽहंमान आत्मनः अपरिज्ञानमप्यस्य ब्राह्मणा
वेदवित्तमाः ५२ आदिमध्यभवस्यान्तस्तस्य ज्ञानेन तु स्वताः ज्ञानं वेदान्तविज्ञानमिति सद्गुरुनिर्णयः ५४ यस्यापरोक्षविज्ञानमस्ति वेदान्तवा
क्यजं तस्य नास्ति नियोज्यत्वमिति वेदार्थनिर्णयः वर्णिनामाश्रमाः प्रोक्ताः सर्वशास्त्रार्थवेदिभिः तेषां वर्णाश्रमस्थानां वेदकिंकरता सदा अ
स्ति चेद् ब्रह्मविज्ञानं स्त्रियो वा पुरुषस्य वा वर्णाश्रमसमाचारस्तयोर्नास्त्येव सर्वदा अविज्ञायात्मसद्भावं स्ववर्णाश्रममास्तिकाः जहाति
यः स मूढात्मा पतत्येव न संशयः तस्मात् सर्वप्रयत्नेन श्रद्धया सह सर्वदा कर्तव्यो वर्णिभिर्धर्मः श्रौतस्मार्तश्च मुक्तये ५८ इत्याकर्ण्य मुनी
श्वराः श्रुतिगतं सूतोपदिष्टं परं सत्यानन्तसुखप्रकाशपरमब्रह्मात्मविज्ञानदं श्रुत्वा जातिविनिर्णयं सकललोकाम्भोधिपारं सदा सत्यात्येयद
याज वादिमहितास्तस्य बभूवुर्भृशं ६७ इति श्रीसूतसंहितायां शिवमाहात्म्यखण्डे द्वादशोऽध्यायः नैमिषीया ऊचुः भगवंस्तीर्थमाहा
त्म्यं सर्वशास्त्रार्थवित्तम ब्रूहि कारुण्यतोऽस्माकं हिताय मणिनां मुदा १ सूत उ॰ वदामि तीर्थमाहात्म्यं संग्रहेण मुनीश्वराः शृणुध्वं सर्वशा
स्त्रोक्तं श्रद्धया परया महत् गंगाद्वारं महातीर्थं सर्वदेवनिषेवितं तत्र स्नात्वा रवौ मेषे स्थितेश्विन्यां मुनीश्वराः यथाशक्ति धनं दत्त्वा श्रद्धया शि २२

वयोगिने उपोष्य सर्वपापेभ्यो मुच्यते मानवो द्विजाः सोमतीर्थमिति ख्यातं सोमनाथस्य सन्निधौ समुद्रपश्चिमे विप्राः स्थितं योजनमायतं ५
विस्तीर्णं योजनं विप्रा विश्वेदेवैर्निषेवितं पर्वण्यादौ दिने रम्यां व्यतीपाते तथा द्विजाः अर्कवारे चतुर्दश्यां स्नात्वा दत्त्वात्र भोजनं प्रणम्य सो
मनाथाख्यं सोमं सोमविभूषणं उपोष्य रजनीमेकां भस्मदिग्धतनूरुहः सर्वपापविनिर्मुक्तः शंकरं याति मानवः वाराणस्यां महातीर्थं नाम्ना
तु मणिकर्णिका तत्र स्नात्वा महाभक्त्या मातरेव समाहितः दृष्ट्वा विश्वेश्वरं लिंगं करुणासागरं हरं यथाशक्त्यान्नपानादि दत्त्वा मुक्तो भवेन्नरः
१० प्रयागाख्यं महातीर्थं भवरोगस्य भेषजं भरण्यां कृत्तिकायां वा रोहिण्यां वा विशेषतः ११ तत्र स्नात्वा रवौ मेषे वर्तमाने मुनीश्वराः यथाश
क्ति धनं दत्त्वा विमुक्तो मानवो भवेत् आर्द्रायां मार्गशीर्षे वा गंगासागरसंगमे स्नात्वा मध्यंदिने दत्त्वा यथाशक्ति धनं मुदा सर्वपापविनिर्मुक्तः
शिवसायुज्यमाप्नुयात् नर्मदा च महातीर्थं नरकद्वारनाशनं ब्रह्मविष्ण्वादिभिर्नित्यं सेवितं शंकरेण च तत्र स्नात्वा यथाशक्ति धनं दत्त्वा
दरेण च १५ ब्रह्मलोकमवाप्नोति नरो नात्र विचारणा यमुना च महातीर्थं यमेनापि निषेवितं तत्र स्नात्वा नरो भक्त्या रवौ वृषभसंस्थिते
विशाखे सूर्यवारे वा दत्त्वा विप्राय भोजनं सर्वपापविनिर्मुक्तः शिवेन सह मोदते सरस्वतीति विख्याता नदी सर्ववरप्रदा यस्यां वागीश्वरी देवी च

स्कं·सं तेनेसर्वदारस्थत् तस्मामार्द्रादिनेस्नात्वायक्तिंचिच्छिवयोगिने दत्वापुत्रादिभिःसार्द्धंनरःस्वर्गमवाप्नुयात् गोदावरीनिपालोकेसुप्रसिद्धामहान
२३ दी२० सिंहस्थेगोस्थितेसूर्येसिंहयुक्तेबृहस्पतौ तस्यांस्नात्वायथाशक्तिधनंदत्वातुमानवः गंगायांद्वादशाब्दस्यनित्यंस्नानफलंलभेत् हस्तवे
लीतिपालोकेप्रोक्ताविप्रामहानदी सर्वयोगीश्वराराध्यासदादेवोद्भवाशुभा इंद्रनीलगिरिर्यस्यांस्नात्वाभूद्वंकरासनं नित्यंयस्यांमहा
देवःस्नात्वाविष्ण्वादिभिःसह तस्मिन्गिरिवरेश्रीमान्वर्ततेशिवयासह स्नात्वातस्यांनरःपर्वण्युपोष्यब्रह्मवित्तमाः यथाशक्तिधनंदत्वा
सा मुच्यतेभवबंधनात् २५ सुवर्णमुखरीनामनदीसंसारनाशिनी समस्तप्राणिनांभुक्तिसिध्यर्थमास्तिकाः केवलं[illegible]तेनपरमा मुक्ति
त्मना निर्मितामघनक्षत्रेमाघमासिद्विजोत्तमाः यस्यास्तीरेमहादेवःशंकरःशशिभूषणः श्रीमद्दक्षिणकैलासेशिवयापरयासह
वर्ततेतांसमालोक्यसुवर्णमुखरींनदीं यस्यांसंभूयतीर्थानिस्वपापध्वस्तिसिद्धये स्नानंकृत्वामहाभक्त्यामघर्क्षेमाघमासिच यथाश
क्तिधनंदत्वाश्रद्धयाशिवयोगिने ३० श्रीकालहस्तिशैलेशंशिवकरंनृणां श्रीमद्दक्षिणकैलासवासिनंवासवार्चितं प्रणम्यदंडवद्भक्त्या
विमुक्ताघपंजरात् स्नात्वातस्यांनरोभक्त्यामघर्क्षेमाघमासिच सर्वपापविनिर्मुक्तःशिवसायुज्यमाप्नुयात् कंपानामनदीपुण्या

कमलासननिर्मिता यस्यांद्विजोत्तमास्नात्वाशंकरंशशिशेखरं दृष्ट्वाभक्त्यानरःसद्योमुच्यतेभवबंधनात् ३४ आदिलिंगेमहाविष्णुर्यस्यांस्ना
त्वामहेश्वरं समाराध्यस्थितस्तत्रदेवदेवस्यसन्निधौ ३५ निरीक्ष्यश्रद्धयाविमानदीनामच्युतोहरिः तस्यांस्नात्वार्कवारेचब्राह्मणैःश्रद्ध
यासह दत्वेवाभगवत्स्वत्वेनयापर्वण्यपिद्विजाः विमायात्रादिकंदत्वानरः स्वर्गेमहीयते कुटिलानामयालोकेप्रसिद्धामहतीनदी यस्या
स्तीरेमुनिश्रेष्ठावीरारव्यावेदवित्तमाः श्रावण्यांपौर्णमास्यांतुभद्रकालीदृढव्रता अधिकासंज्ञितांरम्यांपुरीमादित्यनिर्मितां अप्सरोगण
संकीर्णांमाश्रितामसुरैःसुरैः अभ्येत्याशेषदेवानामादिभूतंमहेश्वरं ४० प्रतिष्ठाप्यजलेनास्याःस्नाप्यश्रद्धापुरःसरं मार्गयामासधर्मज्ञादेवदे
वंघृणानिधिं यःपुमान्देवदेवास्यांस्नात्वाश्रद्धापुरःसरं श्रावण्यांपौर्णमास्यांवाद्दृष्टास्तत्वामिवंघच ददातिविद्वत्स्ववस्त्रंधनंधान्यंय
थावलं तस्यभुक्तिंचमुक्तिंचप्रयच्छामिगणनायक ४३ सूतउ० वीरयाप्रार्थितोदेवोविप्रैंद्राब्रह्मवित्तमाः तथाभवत्तितिप्राहशिवोगं
भीरयागिरा तस्यांस्नात्वार्कवारेयः श्रद्धयांसहददातिधनमन्यदासमुक्तोनात्रसंशयः ४५ माणिमुक्तानदीदिव्यामहादेवे
नानिर्मितायस्यांविष्णुश्वरुद्रश्चब्रह्मावाक्छ्रिग्मारुत विश्वेदेवाश्चवसवःसूर्योदेवःपुरंदरः आदित्येचापसंयुक्तेश्रद्धयाशोदिनेद्धि

सू.सं.
२४

जाः स्नानं कृत्वा धनं दत्वा श्रीमद्रुद्राचलेश्वरं प्रणम्य दंडवद्भूमौ लोकानां हितकाम्यया प्रार्थयामास सुरश्रेष्ठं श्रीमद्रुद्राचलेश्वरं दुर्द्दृष्टो वा सुदृष्टो वा मूर्खो वा पंडितोपि वा ब्राह्मणो वाथ शूद्रो वा चंडालो वान्य एव वा अस्यामस्मिन्दिने स्नात्वा श्रद्धया शिवयोगिने ५० यथाशक्ति धनं दत्वा धान्यं वा वस्त्रमेव वा श्रीमद्रुद्राचलेशाय ब्राह्मणा वेदवित्तमाः उपोष्य प्रातरेवेशं श्रीमद्रुद्राचलेश्वरं यो नमस्कुरुते तस्य प्रयच्छ परमां गतिं इत्येवं प्रार्थितः सर्वैः श्रीमद्रुद्राचलेश्वरः तथैवास्त्विति संतुष्टः प्राह गंभीरया गिरा तस्मान्मार्गदिने स्नाति श्रद्धया मानवो द्विजाः तस्य संसारविच्छित्तिः सिद्धा नात्र विचारणा श्रीमद्व्याघ्रपुरे रम्ये महालक्ष्म्या निषेविते शिवगंगेति विख्यातं तटाकं तीर्थमुत्तमं ५५ भवानीसंहितं शिं तस्य दक्षिणतीरे श्रीशंकरः शशिशेखरः नृत्यति परानंदमनुभूयैव यस्मिन्स्नात्वा हयो देवा मुनयश्च दिने दिने स्नानं कृत्वा प्रनृत्यंतं भवानीसहितं शिवं ५७ प्रणमंति महाभक्त्या भवरोगनिवृत्तये यस्मिन्स्नात्वा महादेवो भवानीसहितो हरः ५८ ब्रह्मविष्णुवादिभिः सार्द्धं मघर्क्षे माघमासि च स्नानं करोति रक्षार्थं प्राणिनामीश्वरेश्वरः ५९ तस्मिन्भक्त्या नरः स्नात्वा ददाति धनमादरात् सर्वसमतां मे स्यु ब्रह्माद्येति द्विजोत्तमाः ६० गुप्ततीर्थमिति ख्यातं सत्सु देवेद्र वित्तमाः श्रीमद्व्याघ्रपुरस्यास्य नागुदीच्यां दिशि स्थितं ६१

यानुक्रम

श्रियश्चि

एकयोजनविस्तीर्णमेकयोजनमायतं समुद्रतीरमारभ्य ब्रह्मणा विष्णुना तथा ६२ रुद्रेणाशेषदेवाद्यैर्मुनिभिः सेवितं पुरा वेदविद्भिः सुरव्या वरुणो जलनायकः ६३ प्रमादाद्ब्राह्मणं हत्वा तत्पापविनिवृत्तये व्याघ्रपादवचः श्रुत्वा त्वरया परया सह ६४ गुप्ततीर्थमिदं गत्वा मघर्क्षे माघमासि च तत्र स्नात्वा महाभक्त्या वरुणो हरधकल्मषः ६५ एतस्मिन्नंतरे श्रीमान्नीलकंठोम्बिकापतिः प्रसादमकरोत्तस्य वरुणस्य कृपावलात् ६६ वरुणोपि महादेवं वांछितार्थप्रदायिनं प्रार्थयामास धर्मात्मा लोकानां हितकाम्यया ६७ वरुण उवाच भगवन्देव मत्सृजां मघर्क्षे माघमासि च हत्वायः श्रद्धयैवास्मिंस्तीर्थे स्नात्वा ददाति च ६८ तस्य मुक्तिं प्रयच्छाशु ब्राह्मणस्यांत्यजस्य वा सूत उवाच देवदेवो महादेवो वाङ्मनो गोचरो हरः ६९ तथैवास्त्विति विप्रेंद्राः प्राह गंभीरया गिरा अत्र पर्वणि यः स्नात्वा ददाति धनमादरात् ७० समस्तपापनिर्मुक्तः स याति परमां गतिं बहवोत्र मुनिश्रेष्ठाः स्नात्वा पर्वणि पर्वणि ७१ विहाय सर्वपापानि विमुक्ता भवबंधनात् ब्रह्मतीर्थमिति ख्यातं तत्तटाकं ब्रह्मणा कृतं ७२ श्रीमद्ब्रह्मपुरारण्यस्य मध्ये सुप्रतिष्ठितं रोमशो भगवान्यस्मिंस्तटाके वेदवित्तमाः ७३ स्नात्वा नित्यं महाभक्त्या तताप सुमहत्तपः यस्मिन्ब्रह्मादिजाः स्नात्वा कृत्वा सेपरमेश्वरं ७४ पूजयामास लोकानां सृष्टिस्थित्यर्थमादरा

स्क.सं. तत्रस्नात्वार्कवारेस्मिन् ग्रहणे चैव पर्वणि पर्वणि ७५ यो ददाति धनं भक्त्या स याति परमेश्वरं सूर्यपुष्करिणीनाम तीर्थमस्ति तच्छोभनं ७६
श्रीमद्वृद्धपुरस्यास्य पश्चिमस्यां दिशि स्थितं यत्रस्नात्वार्कवारेस्मिन् ग्रहणे चंद्रसूर्ययोः ७७ विषुवायनकालेषु पर्वण्यां वा दिनेन पौष्का
२५ दक्षाध्वरध्वंसरतान् लब्ध्वा प्रियं गतः ७८ पुरा रावणपुत्रस्तु विजित्य सकलं जगत् इंद्रजिद्यमारुह्य मनत्तः पंडितोत्तमाः ७९
गच्छन्नंतवेगेन व्योम्नि लंकां मति द्विजाः तीर्थस्यास्योपरि यस्तीरे दक्षिणे पुस्थितो भवत् ८० सोपि नत्वेस्य विप्रेंद्रा विचार्य सुचिरं सुधीः
पूजयामास तत्रैव श्रद्धया परमेश्वरं ८१ देवदेवो महादेवो राक्षसानां महाधनं तत्रैवासेस्वयं प्रीत्या भवानीसहितो हरः ८२ इंद्र
जित्सु नरा दातुं नरा शशकत मीश्वरं स पुनः सुचिरं कालं विचार्य परमेश्वरं ८३ प्रदक्षिणत्रयं कृत्वा समारुह्य रथोत्तमं विचलो विव
शोतीवद्विजालंकापुरीं गतः ८४ अस्मिन् पर्वणि यः स्नात्वा भोजयेद् ब्राह्मणं मुदा सर्वपापविनिर्मुक्तः शिवलोकं स गच्छति ८५
यः स्नाति वेदविच्छ्रेष्ठाः कावेर्युदधिसंगमे तस्य सर्वाणि पापानि विनश्यंति न संशयः ८६ श्वेतारण्ये तथा कुंभकोणे मध्यार्जुने
द्विजाः अश्वनीर्थे इति स्थाने तथा मंगलवंशके त्रिकोटिहाख्ये कावेरी वरिष्ठा सर्वकामदा एषु स्थानेषु कावेर्यां स्नात्वा पर्वणि यः २५

पुमान् अर्कवारे तथा विप्राः भक्त्या परमेश्वरं ८८ ददाति धनमन्यद्वा महापापात्प्रमुच्यते पापिष्ठो वा वरिष्ठो वा यः पुमान् मरणं गतः एषु स्थाने
षु विप्रेंद्रास मुक्तो नात्र संशयः वहवो मरणान्मुक्ताः एषु स्थानेषु सत्तमः ९० क्षीरकुंडमिति ख्यातं भवरोगस्य भेषजं सर्वतीर्थोत्तमं पुण्यं सर्व
५ पापप्रणाशनं सर्वकामप्रदं दिव्यं श्रीमद्वल्मीकमध्यगं उत्तरे फाल्गुने मासि ब्रह्मणा विष्णुना तथा शंकरेण तथा देवो मुनिभिः सर्वजंतुभिः से
वितं सोमसूर्याभ्यां स्वर्गाद्वल्मीकमागतं ९३ यः स्नाति फाल्गुने मासि श्रद्धयैवोत्तरे दिने तस्य सर्वाणि पापानि विनश्यंति द्विजोत्तमाः यः
स्नात्वात्र व्यतीपाते ददाति धनमादरात् तस्य मुक्तिः प्रयत्नेन सिध्यत्येव न संशयः ९५ देवतीर्थमिति ख्यातं क्षीरकुंडस्य पश्चिमे देवरा
जः पुरा यत्र स्नात्वा पर्वणि पर्वणि वत्सरं तेन महादेवं वल्मीकावासमादरात् प्रदक्षिणत्रयं कृत्वा प्रणम्य भुवि दंडवत् विसृज्य देवरा
जत्वं विमुक्तः कर्मबंधनात् यत्र स्नातोत्तरे मर्त्यः श्रद्धया मासि फाल्गुने प्रदक्षिणत्रयं कृत्वा वल्मीकावासमीश्वरं ददाति धनम[illegible]वामु
च्यते भवबंधनात् ९८ अर्कवारे तथा ह्यार्यां हस्ताष्टम्यां विशेषतः यः स्नाति देवतीर्थेस्मिन्स याति परमां गतिं १०० सेतुमध्ये महातीर्थं
गंधमादनपर्वतं यत्र स्नात्वा महाभक्त्या राघवः सहसीतया १ लक्ष्मणेन तथैवान्यैः सुग्रीवप्रमुखैर्वरैः मुनिभिर्देवगंधर्वैर्यक्षै

स्क॰सं २६ विद्याधरादिभिः २ राक्षसैरावृतो सम्यक् ब्रह्महत्यां विहायसः प्रतिष्ठाप्य महादेवं श्रीमद्रामेश्वराभिधं ३ विदित्वा तीर्थमाहात्म्यं दत्तवान्ध
नमुत्तमं यत्र स्नात्वा व्यतीपाते ग्रहणे चंद्रसूर्ययोः अर्कवारे भृगोर्वारे पर्वण्यार्द्रादिने तथा विषुवायनकाले षडशीतिमुखे तथा
५ अर्द्धोदये च वा ~~व्यतीपाते ग्रहणे चंद्रसूर्ययोः~~ अर्कवारे भृगोर्वारे पर्वण्यार्द्रादिने तथा विषुवायनकाले षडशीतिमाः सुमुहूर्ते सुचा
स्तिकाः यथाशक्ति धनं दत्वा दृष्ट्वा रामेश्वरं शिवं लौकिकैर्वैदिकैः स्तोत्रैः स्तुत्वा वेदार्थपारगाः प्रदक्षिणत्रयं भक्त्या यः करोति द्विजो
त्तमाः ब्रह्महत्यादिभिः पापैर्महद्भिः स विमुच्यते कृतघ्नाश्च विमुच्यंते यत्र मरणं गताः स्नात्वा त्रैव महाभक्त्या मासमात्रं दिने
दिने दृष्ट्वा रामेश्वरं दत्वा सुवर्णं निष्कमादरात् उपोष्य रजनीमेकां मासांते पर्वणि द्विजाः ब्रह्महत्यासुरापानस्वर्णस्तेयादिपातकैः
१० बुद्धिपूर्वकृतैर्मर्त्यो मुच्यते नात्र संशयः कृतार्थस्नानमात्रेण बहवो ब्राह्मवन्दिजाः ११ सूत उ॰ एतानि तीर्थानि पुरो दिव्यानि वेदेषु
शास्त्रेषु शिवागमेषु दृष्ट्वा भवानीपतिरंबिकायाः प्रोवाच कारुण्यबलेन देवः १२ देवी पुनः प्राह गुहस्य गुहो विरिंचाय चतुर्मुखस्ततः गु
रोर्मम श्रीपजगत्स्य सिद्धये गुरुर्ममापारकृपामहोदधिः १३ युष्माकं परमकृपाबलेन विप्रा अस्माभिः कथितमिदं जगद्धिताय शिष्याणां

शांकरी

स्कं॰सं २७ सततमिदं मुदा भवद्भिर्वक्तव्यं परमशिवप्रसादसिद्ध्यै १४ यदिदं तीर्थमाहात्म्यं पठते सुमुहूर्तके सर्वपापविनिर्मुक्तः स याति परमां गतिं
१५ य इदं शृणुयान्नित्यं सुमुहूर्तेषु वा नरः सर्वपापविनिर्मुक्तः शिवलोके महीयते १६ तीर्थेषु श्राद्धकाले वा य इदं श्रावयेन्मुदा दारि
द्र्यं सकलं त्यक्त्वा स महाधनवान्भवेत् १७ यः श्रुएव नृदेवतापूजां करोतीदं मुदा नरः तस्य ब्रह्मा हरिश्चापि प्रसीदति महेश्वरः १८
भगवान्देवकीसूनुः सर्वभूतहिते रतः महादेवप्रसादार्थमिदं पठेति नित्यशः १९ तस्माद्भवद्भिर्मुनयः श्रद्धया परया सह पठितव्य
मिदं नित्यं प्रसादार्थं त्रिशूलिनः २० एवमुक्त्वा मुनींद्रेभ्यः सूतः सर्वार्थवित्तमः अतीव प्रीतिमापन्नः सोमं सोमार्द्धशेखरं २१ सर्वज्ञं
सर्वकर्तारं संसारामयभेषजं सुरासुरमुनींद्रैश्च प्रणतांघ्रिसरोरुहं २२ ध्यात्वा हृत्पंकजे भक्त्या प्रसन्नेंद्रियमानसः प्रणम्य दंडवद्भौम
हादेवं जगद्गुरुं २३ वेदव्यासं च संसारसमुद्रतरणप्लवं विहाय मुनिशार्दूलान् कैलासमचलं गतः १२४ इति श्रीस्कंदपुराणे
सूतसंहितायां शिवमाहात्म्यखंडे त्रयोदशोध्यायः प्रथमखंडः समाप्तिमगमत् श्रीसांबशिवार्पणमस्तु संवत १८४१

प्रथमःखंडः १

स्कं·सं
१

श्रीगणेशाय नमः कैलासशिखरे रम्ये नानारत्नसमाकुले नानापुष्पसमाकीर्णे नानाम्रफलोदके १ नानावल्लीसमाकीर्णे नानामृगसमा
कुले नानावृक्षसमाकीर्णे नानायोगिसमावृते २ नानासिद्धसमाकीर्णे नानामुनिसमावृते नानादेवसमाकीर्णे नानाचारणसेविते ३
नानापक्षिसमाकीर्णे नानागंधर्वसेविते सुखासीनं सुमनसं सुनेत्रं सुस्मितं शुचिं ४ स्वतेजसा जगत्सर्वं भासयंतं भयापहं सर्वशास्त्रा
र्थतत्त्वज्ञं वेदवेदांगपारगं ५ भस्मोद्धूलितसर्वांगं त्रिपुंड्रांकितमस्तकं रुद्राक्षमालाभरणं जटामंडलमंडितं जितेंद्रियं जितक्रोधं जीव
न्मुक्तं जगद्गुरुं व्यासमप्रासरसंपन्नं व्यासवद्दिग्गतस्पृहं ७ वेदमार्गे सदा निष्ठं वेदमार्गप्रवर्तकं ऋजुकायशिरोग्रीवं नासाग्रन्यस्तलोच
नं ८ स्वयं स्वमेव ध्यायंतं स्वतंत्रं बुद्धिमतां वरं विशुद्धो विशालाक्षो वत्सः कुंडिन आरुणिः ९ जाबालो जमदग्निश्च जर्जरो जंगमोज
यः पक्षः पाशधरः पारः पारंग पंडितोत्तमाः १० माहाकायो महाग्रीवो महाबाहुर्महोदरः उद्दालको महासेन आर्तश्चामलकप्रि
यः ११ एकपादो द्विपादश्च त्रिपादः पंचनायकः उग्रवीर्यो महावीर्यो उत्तमोऽनुत्तमः प्रभुः १२ पंडितः करुणाकालः कैवल्यश्च कला
धरः कल्पोतः कंकणः कर्पः कालः कालाग्निरुद्रकः १३ श्वेतबाहुर्महाप्राज्ञः श्वेताश्वतरसंज्ञकः एषां शिष्याः प्रशिष्याश्च १

पाशविच्छेदनेरताः १४ विचार्यमाणा वेदार्थं विषमा विवशाभृशं समागम्य समाधिस्थं दंडवत्प्रणिपत्य च १५ स्तोत्रैः स्तुत्वा महात्मानं
प्रप्रच्छुः पंडितोत्तमाः मुनय ऊचुः भवता कथितं सर्वं संक्षेपाद्विस्तरेण च इदानीं श्रोतुमिच्छामो ज्ञानयोगं सहेतुकं साक्षाद्विश्वे
जं गत्वा प्राप्तुं लघूपायं न दूरैः १७ अवाप्य ज्ञानयोगस्त्वं न वेत्ता त्वामृते भुवि तस्मात्कारुण्यतोऽस्माकं संक्षेपाद्वक्तुमर्हसि १८
इति पृष्टो मुनिश्रेष्ठैः सूतः पौराणिकः प्रभुः साक्षात्सर्वेश्वरं सांबं संसाररोगभेषजं सर्वज्ञं सर्वगं सर्वं सर्वभूतहिते रतं व्याघ्रचर्मां
बरधरं व्याख्यानैकरतं विभुं २० चतुर्भुजं शरच्चंद्रचंद्रिकाधवलाकृतिं गंगाधरं विरूपाक्षं चंद्रमौलिं जटाधरं २१ नीलग्रीवं चि
रं स्मृत्वा व्यासमप्यमितौजसं महर्षेः परया भक्त्या परिपूर्णमनोरथः लौकिके वैदिके स्तोत्रैः स्तुत्वा सम्यक् समाहितः वक्तुमार
भते सर्वं प्रणिपत्य महेश्वरं २३ सूत उ० शृणुध्वं मुनयः सर्वे भाग्यवंतो एतदेव पुरा पृच्छद्गिरिजा नाथं महेश्वरं देवोऽपि देवीमालोक्य
करुणाविष्टचेतसा माह गंभीरया वाचा गुरुर्वै मुनिपुंगवाः २५ देव्या अंके समासीनः स्कंदोऽपि श्रुतवांस्तदा स्कंदाद्वसिष्ठः संप्राप्तः स
र्वज्ञं स्वतपोबलात् वसिष्ठाल्लब्धवान् शक्तिः शक्तेः प्राप्तः पराशरः पराशरात्तु मुनिश्रेष्ठाद्भगवान्व्याससंज्ञितः तदहं श्रुतवान्व्या

तःसमाप्ति

सू.सं.ज्ञा. साज्जन्मांतरतपोर्बलात् वक्ष्येवेदविदामग्र्यसुधाकंतदधामृतं २८ इतिश्रीस्कांदेसूतसंहितायां ज्ञानयोगखंडेप्रश्नविधिर्नामप्रथमोध्या
२ यः ईश्वरउवाच अवाच्यमेतद्विज्ञानमतिगुह्यमनुत्तमं आम्नायानेकसंसिद्धमशेषक्लेशनाशनं १ अनंतानंदमोक्षाख्यब्रह्मप्राप्तै
कसाधनं आश्रमैरखिलैर्युक्तमंगैरपिसंयुतं २ वक्ष्येकारुण्यतःसाक्षाच्छृणुवाचस्पतेधुना आसीदिदंतमोमात्रमात्माभिन्नंज
गत्पुरा ३ ततःसत्वगुणक्षोभान्महत्तत्वमजायत एकएवशिवःसाक्षात्तिस्रोमूर्तीरधात्पुनः रजोगुणसमास्थायब्रह्मास्यात्सृष्टिका
रणं सत्वमास्थायविष्णुःस्यात्पालनार्थंबृहस्पते ५ तमसाकालरुद्राख्यःसर्वसंहारकारणं असंख्यामूर्तयस्तेषांविजायंतेपृथक्पृथ
क् ६ तत्तमाधमरूपेणगुणवैषम्यमात्रतः शब्दादीनिचभूतानिश्रोत्रादींद्रियपंचकं ७ वागादिपंचकंतद्वत्प्राणापानादिपंचकं म
नोबुद्धिरहंकारश्चित्तंचेतिचतुष्टयं ८ अव्यक्तात्कालपाकेनसंजायतपृथक्पृथक् सर्वेकालपराधीनानकालःकस्यचिद्वशे ९
कालोमायात्मसंबंधात्सर्वसाधारणात्मकः हिरण्यगर्भोभगवान्प्राहुरासीत्प्रजापतिः १० सवैशरीरीप्रथमःसर्वैःपुरुषउच्यते तेन
ब्रह्मांडमुत्पन्नंतन्मध्येयंबृहस्पते ११ भुवनानिचदेवाश्चप्राणिनःशेयसहस्रशः स्थावरंजंगमंचैवतथावर्णाश्रमादिच सांबसर्वेश्व २

ब्रह्मा

रेध्यात्वाप्रसादात्तस्यनिर्ममे प्रसादेनविनादेवाःप्रसादेनविनानराः प्रसादेनविनालोकानासिध्यंतिमहामुने प्रसादाद्देवदेवस्यब्रह्मत्व
मागतः विष्णुर्विष्णुपदंप्राप्तोरुद्रोरुद्रत्वमागतः वर्णाश्रमाचारवताप्रुरुषेणमहेश्वरः १५ आराध्यतेप्रसादार्थंनदुर्वृत्तैःकदाचन य
स्मिन्नस्त्रेसर्वेषांप्रुष्टिर्जायेतपुष्कला अहोतेनविनालोकश्चेष्टतेन्यत्वमायया ब्रह्मचर्याश्रमस्थानांयतीनांचविशेषतः वान
प्रस्थाश्रमस्थानांगृहस्थानांवशोहरः वर्णाश्रमसमाचारात्प्रसन्नेपरमेश्वरे साक्षात्तद्विषयंज्ञानमचिरादेवजायते ज्ञानादज्ञानवि
ध्वस्तिर्नकर्मभ्यःकदाचन अज्ञानेसतिसंसारोज्ञानेसकथमुच्यते तस्माज्ज्ञाने[illegible]मुक्तिःस्यादज्ञानस्यतथान्मुने २० सर्वंसंक्षेपतःप्रोक्तंम
यावेदविदांवर तस्मात्त्वंचमहाभागवर्णाश्रमरतोभव २१ सूतउ० इतिश्रुत्वामुनिश्रेष्ठः[illegible]परमेश्वरं स्तोतुमारभतेविप्राःप्रसाद
र्थंत्रिशूलिनः २२ बृहस्पतिरु० नमोहरायदेवायत्रिनेत्रायशूलिने तापसायमहेशायतत्वज्ञानप्रदायिने २३ नमोमौंजायनमःकार
ण्यमूर्तये नमोदेवादिदेवायनमोवेदांतवेदिने २४ नमःपरायरुद्रायसुचारायनमोनमः विश्वमूर्तेर्महेशायविश्वाधारायतेनमः
२५ नमोभक्तभवच्छेदकारणायामलात्मने कालायकालकालायकालातीतायतेनमः २६ जितेंद्रियायानित्यायजितक्रोधायतेनमः

शुभाय

नमः पाखंडभंगाय नमः पापहराय ते नमः पर्वतराजेंद्रकन्यकापतये नमः योगानंदाय योगाय योगिनां पतये नमः प्राणायामपराणां नु
प्राणरूपाय ते नमः मूलाधारे प्रविष्टाय मूलदीपाय ते नमः नाभिकंदे प्रविष्टाय नमो हृद्देशवर्तिने सच्चिदानंदपूर्णाय नमः साक्षात्परात्म
ने ३० नमः शिवायाद्भुतविग्रहाय ते नमः शिवायाद्भुतविक्रमाय ते नमः शिवायाखिलनायकाय ते नमः शिवायामृतहेतवे नमः ३१
सूत उ॰ य इदं पठते नित्यं स्तोत्रं भक्त्या सुसंयुतः तस्य मुक्तिः करस्था स्याच्छंकरप्रियकारणात् ३२ विद्यार्थी लभते विद्यां विवाहार्थी गृही
भवेत् वैराग्यकामो लभते वैराग्यं भवतारकं ३३ तस्माद्दिनैर्द्वयमिदं स्तोत्रं समाहिताः पठेत्तु भवनाशार्थमिदं हि भवनाशनं ३४
इति श्रीसूतसंहितायां ज्ञानयोगखंडे द्वितीयोध्यायः ईश्वर उ॰ अथातः संप्रवक्ष्यामि ब्रह्मचर्याश्रमं मुने आम्नायैकसुसंसिद्धमादरा
च्छृणु सुव्रत उपनीतो द्विजो वेदानधीयीत समाहितः दंडं यज्ञोपवीतं च मेखलां च तथैव च कृष्णाजिनं च काषायं शुक्लं वा वस्त्रमुत्तमं धा
रयेन्मंत्रतो विद्वान्स्वसूत्रोक्तेन वर्त्मना ३ भिक्षाहारो यथाकामं गुरुशुश्रूषणे रतः धारयेद्बैल्वपालाशौ दंडौ केशांतिकौ द्विजाः ४ अश्वत्थं
वारुजं सौम्यमव्रणं त्वग्विभूषितं सायंप्रातरुपासीत संध्यां विप्रः समाहितः ५ कामं क्रोधं तथा लोभं मोहं चैव विसर्जयेत् अग्निका ३

र्यं द्विजः कुर्यात्सायंप्रातः स्वसूत्रतः देवानृषीन्पितॄन्स्नात्वा तर्पयेद्ब्राह्मणोत्तमः समिदग्निसमुत्थेन विरजानलजेन वा ७ अग्निहोत्र
समुत्थेन भस्मना सजलेन च अग्निरित्यादिभिर्मंत्रैः षड्भिर्वा सप्तभिः क्रमात् विमृज्यांगानि सर्वाणि समुद्धूल्य ततः परं तिर्यक्त्रिपुंड्रमु
रसा ललाटेन करादितः ग्रीवायां च शुचिर्भूत्वा शिवं ध्यात्वा शिवां तथा मेधावीत्यादिभिर्मंत्रैर्धारयेद्ब्राह्मणः सदा १० त्रियायुषं ज
मदग्नेरिति मंत्रेण वा द्विजः महादेवार्चनं कुर्यात्सुप्याद्यापत्रतोन्यतः मातरं पितरं चैव तथा ज्येष्ठसकं गुरुं अध्यात्मज्ञानिनं नित्यं
श्रद्धयैवाभिवादयेत् १२ असावहं भो नामास्मि सम्यक्प्रणतिपूर्वकं आयुष्मान्भव सौम्येति वाच्यो विप्रोभिवादने आका
रश्चास्य नाम्नोंते वाच्यः पूर्वाक्षरप्लुतः व्यस्तपाणिना कार्यमुपसंग्रहणं गुरोः १४ सव्येन सव्यः स्प्रष्टव्यो दक्षिणेन तु दक्षि
णः लौकिकं वैदिकं चापि तथाध्यात्मिकमेव च आददीत यतो ज्ञानं तं पूर्वमभिवादयेत् मातापित्रोश्च वंश्याश्च गुरुवंश्यानुगणाधि ४
कान् १६ अनुवर्तेत मनसा वाचा कायेन सादरं गुरुं दृष्ट्वा समुत्तिष्ठेन्नमस्कृत्वा कृतांजलिः तेनैवाभिहितः पश्चात्समासीनान्यभाग
तः सत्यमेव वदेन्नित्यमधीतं च न विस्मरेत् १८ नित्यं नैमित्तिकं कर्म मोक्षकामनया थवा विध्युक्तं वा लौकिकं वा शंतो भूत्वा

स्मृ॰सं॰ समाचरेत् भिक्षामाहृत्य विप्रेभ्योऽलाभे वर्णान्तरेष्वपि निवेद्य गुरवे श्नीयाद्ब्रह्मचारी दिने दिने २० भवत्पूर्वं चरेद्भैक्ष्यमुपनीतो द्विज
५ स्तथा भवन्मध्यं तु राजन्यो वैश्यस्तु भवदुत्तरं अभिशस्तेषु सर्वेषु भिक्षां नित्यं विवर्जयेत् प्राङ्मुखोऽन्नानि भुंजीत सूर्याभिमुख एव वा
२२ प्रक्षाल्य चरणौ हस्तौ द्विराचम्यान्नभुग्भवेत् प्राणायेत्यादिभिर्मंत्रैर्हुत्वा प्राणाहुतीर्द्विजः वेदाभ्यासैकनिष्ठः स्यादन्यमंत्ररतो
भवेत् एवमभ्यसतस्तस्य वैराग्यं जायते यदि प्रव्रजेत्परमे हंसे मोक्षकामनया द्विजः नैष्ठिको वा गृही वापि भवेत्कामी यथारुचि २५
इति श्रीसूतसंहितायां ज्ञानयोगखण्डे तृतीयोऽध्यायः ईश्वर उ० अथातः संप्रवक्ष्यामि गार्हस्थ्यं संग्रहेण ते अधीत्य वेदान्विविधा
न्स्ववेदोक्तेनैव वर्त्मना आचार्यानुज्ञया युक्तः स्नात्वा गार्हस्थ्यमाविशेत् अनुकूलं गोत्रप्रवरादिविवर्जितं स्वगोत्रोक्तेनैव मार्गेण वरयेत्कु कुले
लजां स्त्रियं सर्वलक्षणसंपन्नां साध्वीमन्यां विवर्जयेत् ऋक्षसंज्ञां नदीसंज्ञां वृक्षसंज्ञां च वर्जयेत् तया धर्मं चरेन्नित्यं संसहितः संयतें
द्रियः ४ ऋतुकालेंऽगनासेवां कुर्यात्प्राज्ञः समं[illegible] वर्कं देवाग्न्यतिथिभृत्यार्थं पचेन्नैवात्मकारणात् आत्मार्थं यः पचेन्मोहान्नरका
र्थं साश्नुवीत धर्मार्थं जीवनं येषां संतानार्थं च मैथुनं ६ ते मुच्यंते हि संसारादन्ये नारकिणः सदा याजनाध्यापनाभ्यां च विशुद्धेभ्यः प्र ५

तिग्रहात् यात्रार्थमर्जयेदर्थं यागार्थं वा द्विजोत्तमाः निर्जने निर्भये देशे विण्मूत्रादि विसर्जयेत् ८ प्रक्षाल्येद्गुदं शिश्नं पादद्वंद्वं करद्वयं
मृज्जलाभ्यां यथाशक्ति गंधलेपनिहत्तये यावन्मात्रं मनः शुद्धिस्तावच्छौचं विधीयते पश्चादाचमनं कुर्याद्दंतकाष्ठं च भक्षयेत् १० द्विराच
म्य पुनः स्नात्वा कृत्स्नशेषं समाचरेत् प्राणायामत्रयं कुर्यात्सावित्रीं च जपेद्बुधः उपस्थानं ततः कुर्यान्मध्याह्नेप्येवमाचरेत् ब्रह्मयज्ञं द्वि
जः कुर्याद्वेदपारायणं ततः १२ अन्यानि यानि [illegible]नि कर्माणि नित्यं तानि समाचरेत् अग्निकार्यं द्विजः कुर्याद्बलिकर्मादिकं तथा नित्यश्रा
द्धं तथा दानमशक्तानां च रक्षणं दयां सर्वेषु भूतेषु कुर्याद्गार्हस्थ्यमाश्रितः १४ यतिसंरक्षणं कुर्यादन्नपानादिभिः सदा यतिश्च ब्रह्मचा
री च पक्वान्नस्वामिनावुभौ तयोरन्नमदत्वा तु भुक्त्वा चांद्रायणं चरेत् यतिहस्ते जलं दद्याद्भैक्ष्यं दद्यात्पुनर्जलं १६ तद्भैक्ष्यं मेरुणा तुल्यं तज्ज
लं सागरोपमं एकवारं गृही नित्यमश्नीयादुत्तमंहितत् द्विवारं वा समश्नीयाद्द्वात्रिंशद्ग्रासमात्रकं कुक्कुटांडप्रमाणेन नतदृष्टेन विचारवान्
१८ होमे जपे च भुक्तौ च गुरुवृद्धाद्युपासने तथैवाचमने यज्ञोपवीती स्यान्न चान्यथा १९ वैणवीं धारयेद्यष्टिं सोदकं च कमंडलुं उद्धृतं
सहस्तु कुर्यात्सर्वं वेदोक्तवर्त्मना २० त्र्यंबकेन मंत्रेण सतारेण शिवेन च त्रिपुंड्रं धारयेन्नित्यं गृहस्थाश्रममाश्रितः तेनाधीतं श्रुतं तेन

तेन सर्वमंषितं येन विप्रेण शिरसि त्रिपुंड्रं भस्मना धृतं २२ त्रिपुंड्रं धारयेद्भक्त्या मनसापि न लंघयेत् श्रुत्या विधीयते यस्मात्तत्त्यागी
पतितो भवेत् रुद्राक्षं धारयेन्नित्यं रुद्राक्षाणामिति श्रुतिः लिंगे समर्चयेन्नित्यं देवदेवं महेश्वरं २४ अग्नीनाधाय विधिवत्कुर्याद्यज्ञाननंतरं य
ज्ञैः सर्वाणि पापानि विनश्यंति न संशयः मन्त्रोऽत्रैषपापस्य शुद्धांतःकरणस्य तु देवद्वमरि ज्ञाने वांछा जायेत सुव्रत २६ स्वर्गकामो
यदि स्वर्गं याति यज्ञात् द्विजोत्तमाः पुत्रमुत्पादयेत्तस्यां पितॄणामनृणांतये सत्यं ब्रूयात्प्रियं ब्रूयात्सर्वभूतेषु सर्वदा एवं समाचारान्वितो
विरक्तश्चेद्गृहाश्रमात् २८ संन्यसेत्सर्वकर्माणि वेदांताभ्यासयत्नवान् वेदांतश्रवणाभावे पतितो यं भवेद्ध्रुवं विरक्तोपि मुमुक्षुश्चेद्धंसे वा
वा संन्यसेद्गृही बहूदके वाशक्तश्चेत्संन्यसेद्धिमः कुटीचके ३० अविरक्तो गृही चांते वानप्रस्थं समाश्रयेत् अथवा यावदायुष्यं गार्हस्थ्यं
सम्यगाचरेत् गृहस्थादाश्रमाः सर्वे समुत्पन्नाः सुरक्षिताः तस्माद्गृहस्थ एव स्यादविरक्तो द्विजः सदा ३२ इति श्रीसूतसंहितायां ज्ञानयोगखं
डे चतुर्थोध्यायः ईश्वर उ॰ अथातः संप्रवक्ष्यामि वानप्रस्थाश्रमं मुने पुत्रे भार्यां विनिक्षिप्य गृही त्वा वा समाहितः शुक्लपक्षे शुभे वा
रे शुभनक्षत्रसंयुते सुमुहूर्ते वनं गच्छेद्गृहस्थश्चोत्तरायणे २ यमादिसहितः शुद्धस्तपः कुर्यात्समाहितः शाकमूलफलाशी स्यात्तेनेशं पूजये ५

बुधः ग्रामादाहृत्य वाश्नीयाद्ग्रासान्वोऽष्टबुद्धिमान् जटाश्च बिभृयान्नित्यं नखलोमानि नोत्सृजेत् ४ वेदाभ्यासं सदा कुर्याद्वाग्यतः सुसमा
हितः अग्निहोत्रं च जुहुयात्लं च यज्ञान्समाचरेत् चीरवासा भवेत्कुर्यात्स्नानं त्रिषवणं बुधः सर्वभूतानुकंपी स्यात्प्रतिग्रहविवर्जितः ६ वर्जये
न्मधुमांसानि भौमानि वनजानि च एकवारं समश्नीयाद्रात्रौ ध्यानपरो भवेत् जितेंद्रियो जितक्रोधो भवेदध्यात्मचिंतकः भूमौ शयीत स
ततं सावित्रीं च जपेद्बुधः ८ क्रोधं पैशुन्यनिद्रादि दूरतः परिवर्जयेत् कृच्छ्रं चांद्रायणं कुर्यान्मासि वने स्थितः ग्रीष्मे पंचतपाश्च स्याद्वर्षास्वभ्रा मासि
वकाशगः आर्द्रवासास्तु हेमंते क्रमशो वर्धयंस्तपः १० उपस्पृश्य त्रिषवणं पितॄन्देवांश्च तर्पयेत् एकपादेन तिष्ठेत वायुभक्षोऽथमध्यमे पयः पिबे
च्छुक्लपक्षे कृष्णपक्षे च गोमयं जीर्णपर्णाशनो वा स्यात्कृच्छ्रैर्वा वर्तयेत्सदा १२ योगाभ्यासपरो भूत्वा ध्यायेत्पशुपतिं शिवं कृष्णाजिनी सोत्तरीयः
शुक्लयज्ञोपवीतवान् अथ वाग्नीन्समारोप्य स्वात्मनि ध्यानतत्परः अनग्निरनिकेतः स्यान्मुनिर्मोक्षपरो भवेत् १४ सदोपनिषदभ्यासपरो वा
स्यात्समाहितः त्रिपुंड्रोद्धूलनं कुर्याद्गृहस्थस्योक्तमंत्रतः यदा वैराग्यमुत्पन्नं तदैव प्रव्रजेद्वनी बहूदके वा हंसे वा मुमुक्षुः परहंसके १६ स
र्वं संग्रहरूपेण सम्यगुक्तं वनस्थिते तस्मात्सर्वप्रयत्नेन श्रद्धया विद्धि सुव्रत १७ इति श्रीसूतसंहितायां ज्ञानयोगखंडे पंचमोध्यायः ईश्व

स॰ज्ञा॰ २७० अथातःसंप्रवक्ष्यामिसन्यासंमुनिसत्तमः चतुर्विधास्तुविज्ञेयाभिक्षवोवृत्तिभेदतः १ कुटीचकोमुनिश्रेष्ठतथैवचबहूदकः हंसःप
६ रमहंसश्चतेषांवृत्तिंवदामिते कुटीचकश्चसन्यस्यस्वस्यवेश्मनिनित्यशः भिक्षामादायभुंजीतस्वबंधूनांगृहेथवा शिखीयज्ञोपवीतीस्या
त्रिदंडीसकमंडलुः सपवित्रश्चकाषायीगायत्रीचजपेत्सदा ४ सर्वांगोद्धूलनंकुर्यात्त्रिपुंड्रंचत्रिसंधिषु शिवलिंगार्चनंकुर्याच्छ्रद्धयैवदिने
दिने बहूदकश्चसन्यस्यबंधुपुत्रादिवर्जितः सप्तागारंचरेद्भैक्षमेकान्नंपरिवर्जयेत् ६ गोवालरज्जुसंबद्धंत्रिदंडंशिक्यमद्भुतं पात्रंजलपवि
त्रंचकौपीनंचकमंडलुं आच्छादनंतथाकंथांपादुकंछत्रमद्भुतं पवित्रमजिनंसूचींपक्षिणीमक्षसूत्रकं ८ योगपट्टंबहिर्वस्त्रंमृत्खनित्रीं
कृपाणिकां सर्वांगोद्धूलनंतद्वत्त्रिपुंड्रंचैवधारयेत् शिखीयज्ञोपवीतीचदेवताराधनः स्वाध्यायीसर्वदावाचमुत्सृजेत्स्थानतत्परः १० सं धनेर
ध्याकालेषुसावित्रींजपन्कर्मसमाचरेत् हंसःकमंडलुंशिक्यंभिक्षापात्रंतथैवच कंथांकौपीनमाच्छाद्यमंगवस्त्रंबहिःपटं एकंतुवैणवंदंडं
धारयेन्नित्यमादरात् १२ त्रिपुंड्रोद्धूलनंकुर्याच्छिवलिंगंसमर्चयेत् अष्टग्रासंसमश्नीयात्सशिरस्कंवपेत् संध्याकालेषुसावित्रींज
पमध्यात्मचिंतनं तीर्थसेवातथाहश्रंतयाचांद्रायणादिकं १४ कुर्वन्ग्रामैकरात्रेणन्यायेनैवसमाचरेत् परहंसस्त्रिदंडंचरज्जुंगोवालनि ६

र्मितं शिक्यंजलपवित्रंचपवित्रंचकमंडलुं पक्षिणीमजिनंसूचींमृत्खनित्रींकृपाणिकां शिखांयज्ञोपवीतंचनित्यकर्मपरित्यजेत्
कौपीनाच्छादनंवस्त्रंकंथांशीतनिवारिकां १७ योगपट्टंबहिर्वस्त्रंपादुकांछत्रमद्भुतं अक्षमालांचगृह्णीयाद्वैणवंदंडमव्रणं १८ अग्नि
रित्यादिभिर्मंत्रैःकुर्यादुद्धूलनंसदा ॐ ओमितिचत्रिःमोच्यपरिहंसस्त्रिपुंड्रकं मृत्पात्रंकांस्यपात्रंवादारुपात्रंचवैणवं पाणिपात्रंचगृ
ह्णीयादाचम्यैवतयोदरं २० बहूदकानांहंसानांपाणिपात्रंतयोदरं कांस्यपात्रंनविप्रुक्तंमृत्पात्रमितिहिश्रुतिः माधूकरमथैकान्नंपर
हंसःसमाचरेत् नात्यश्नतस्तुयोगोस्तिनचैकांतमनश्नतः २२ तस्माद्योगानुगुण्येनभुंजीतपरहंसकः अभिशस्तंसमुत्सृज्यसार्व
वर्णिकमाचरेत् उत्तरोत्तरलाभेतुपूर्वंपूर्वंपरित्यजेत् गुरुशुश्रूषयानित्यमात्मज्ञानंसमभ्यसेत् २४ स्नानंशौचमभिध्यानंसत्यान
तविवर्जनं कामक्रोधपरित्यागंहर्षरोषविवर्जनं लोभमोहपरित्यागंदंभदर्पादिवर्जनं चातुर्मास्यंचसर्वेषांवर्तितव्यंसदादिनः २६
कुटीचकाश्चहंसाश्चतथैवचबहूदकाः सावित्रीमात्रसंपन्नाभवेयुर्मोक्षकारणात् प्रणवाद्यास्त्रयोवेदाःप्रणवेपर्यवस्थिताः तस्मात्प्र
णवमेवैकंपरमहंसःसदाजपेत् २८ संध्याकालेषुशुद्धात्माप्रणवेनसमाहितः षट्प्राणायामकंकुर्याज्जपेदष्टोत्तरंशतं विविक्तदे

श्रमाश्रित्य सुखासीनः समाहितः यथाशक्ति समाधिस्थो भवेत्संन्यासिनां वरः ३० क्रमाद्धि कामतो विद्वानुत्तमां वृत्तिमाश्रयेत् उत्तमां वृ
त्तिमाश्रित्य नो नीचां वृत्तिमाश्रयेत् उत्तमां वृत्तिमाश्रित्य नीचां वृत्तिं समाश्रितः आरूढपतितो ज्ञेयः सर्वधर्मबहिष्कृतः ३२ प्रव्रजं तं द्वि
जं दृष्ट्वा स्थानाच्चलति भास्करः एष मे मण्डलं भित्त्वा ब्रह्मलोकं गमिष्यति रूपं तु द्विविधं प्रोक्तं चरं चाचरमेव च चरं संन्यासिनां रूपमचो
रं मृन्मयादिकं ३४ यस्याश्रमे यतिर्नित्यं वर्तते मुनिसत्तम न तस्य दुर्लभं किंचित्त्रिषु लोकेषु विद्यते दुर्वृत्तो वा सुवृत्तो वा मूर्खो वा पण्डितोऽपि वा
वेषमात्रेण संन्यासी पूज्यः सर्वेश्वरो यथा ३६ ब्रह्मचर्याश्रमस्थानां ब्रह्मा देवः प्रकीर्तितः गृहस्थानां च सर्वेषां स्युर्यतीनां तु महेश्वरः ३७
वानप्रस्थाश्रमस्थानामादित्यो देवता मता तस्मात्सर्वेषु कालेषु पूज्यः संन्यासिनां हरः ३८ मृते न दहनं कार्यं परहंसस्य सर्वदा कर्तव्यं खन
नं तस्य नाशौचं नोदकक्रिया अश्वत्थस्थापनं कार्यं तद्देशे ध्वर्युत्तमा मुने अश्वत्थे स्थापिते तेन स्थापितो हि महेश्वरः ४० दर्शनात्स्पर्शनात्त
स्य सर्वं नश्यति पातकं अन्येषामपि भिक्षूणां खननं पूर्वमाचरेत् पश्चाद्दहो यथाशास्त्रं कुर्याद्दहनसत्तमं अश्वमेधफलं तस्य स्नानमात्राद्वि
शुद्धता ४२ सर्वमुक्तं समासेन तव शिष्यस्य धीमतः तस्मादेतद्विजानीहि वेदान्तार्थप्रकाशनं ४३ इति स्कन्दपुराणे सूतसंहितायां ज्ञानयो

गखण्डे षष्ठोऽध्यायः ईश्वर उ॰ अथातः संप्रवक्ष्यामि प्रायश्चित्तं समासतः दोषाणामपनुत्यर्थं सर्वभूतानुकम्पया ब्रह्महा मद्यपस्तेनस्तथैव गु
रुतल्पगः एते वेदविदां श्रेष्ठा महापातकिनः स्मृताः २ एभिः सह वसेद्यस्तु संवत्सरमसावपि ब्रह्महा निर्जनेऽरण्ये कुटीं कृत्वा वसेन्नरः
द्वादशाब्दानि सततं सर्वदा विजितेन्द्रियः भिक्षामात्रस्तु भुञ्जीत स्वदोषं ख्यापयन्नृणां ४ शाकमूलफलाशी वा कृत्वा शवशिरोध्वजं सं वृत्ते
द्वादशे वर्षे ब्रह्महत्यां व्यपोहति अकामतः कृते पापे प्रायश्चित्तमिदं मुने कामतश्चेन्मुनिश्रेष्ठ प्राणान्तिकमुदीरितं ६ अथवा मुनिशार्दूल
पापशुद्ध्यर्थमात्मनः ग्रामाद्दनन्तमाद्रत्य प्रविशेत्स्वरितापतः पश्चादनशनो भूत्वा धर्मयुद्धेऽथवानलो अप्सु वा मुनिशार्दूल महाप्रस्थान
केऽपि वा ८ ब्राह्मणार्थे गवार्थे वा सम्यक्प्राणान्परित्यजेत् सुरापानादिदोषोऽपि नश्यत्येतेन सुव्रत अग्निवर्णां सुरां तप्तां प्राणविच्छेदनक्ष
मां पीत्वा नश्वरशरीरस्तु सुरापानात्प्रमुच्यते १० गोमूत्रं वा घृतं तोयं गोशकृद्रसमेव वा अग्निवर्णं पिबेत्तेन मृतो मुच्येत दोषतः सुवर्ण
स्तेयकृत्साक्षाद्राजानमभिगम्य तु स्वकर्म ख्यापयन्ब्रूयान्मां भवाननुशास्त्विति १२ आयसं मुसलं तीक्ष्णं गृहीत्वा स्वयमेव तु ह
न्यात्साक्षात्स योगेन राजा तं पुरुषाधमं मुच्यते स्तेयदोषेण नास्ति राज्ञोऽपि पातकं अथ गुरुतल्पगः स्त्रियं तप्तां अयसा निर्मितां नरः

१४ स्वयं वा शिश्नवृषणावुत्कृत्याधाय चांजलौ दक्षिणां दिशमागच्छेद्यावत्प्राणविमोचनं अनेन विधिना युक्तो मुच्यते गुरुतल्पगः
तप्तकृच्छ्रं चरेद्वाथ संवत्सरमतंद्रितः १६ महापातकिनां नृणां संसर्गात्तु विमुच्यते मातरं मातृसदृशीं भागिनेयीं तथैव च १७ मातृष्वसा
रमारुह्य कुर्यात्कृच्छ्रातिकृच्छ्रकौ चांद्रायणं कुर्वीत तत्पापविनिवृत्तये १८ स्वसारं मुनिशार्दूल गत्वा दुहितरं तु वा कृच्छ्रं सांतपनं कुर्याद्दे
वशुद्ध्यर्थमात्मनः भ्रातृभार्याभिगमने चांद्रायणचतुष्टयं चरेत्पापशुद्ध्यर्थं संतप्तो ब्राह्मणोत्तमः २० पैतृष्वसेयागमने मातुला
नुसुतां स्त्रियं चांद्रायणं चरेदेकं कामतोकामतोपि वा अवशिष्टासु सर्वासु द्विजस्त्रीषु महामने गत्वा कृच्छ्रं चरेत्तप्तमेकं तद्दोषशांत
ये २२ क्षत्रियाणां च वैश्यानां स्त्रीषु गत्वा द्विजश्चरेत् कृच्छ्रमन्यासु बहुशो गत्वा कृच्छ्रं चरेद्द्विजः ब्रह्मचारी स्त्रियं गत्वा कामतो मुनिसत्त
म संवत्सरं चरेद्भैक्ष्यं वसित्वा गर्दभाजिनं २४ स्वपापकीर्तनं कुर्वन्स्नात्वा त्रिषवणं पुनः तस्मात्पापात्प्रमुच्येत षण्मासात्कामवर्जि
तः अग्निकार्यपरित्यागे व्रतोत्सर्गे समाहितः स्नात्वा मणवसंयुक्तां व्याहृतीश्च तथैव च २६ सावित्रीं सशिरां मौनी जपेदयुतमादरात् य
तीनामिंद्रियोत्सर्गे स्नात्वाप्सु दं समाहितः प्रणवं परमात्मानं जपेदयुतमादरात् द्विजस्त्रीगमने भिक्षुश्च कीर्णिव्रतं चरेत् २८ अ ८

रु

न्यासु बुद्धिपूर्वं चेत्तप्तकृच्छ्रं समाचरेत् हत्वा वैश्यं चरेज्ज्ञानं ब्रह्महत्याव्रतं चरेत् क्रमान्मासत्रयं पूर्वं षाण्मासिकमनंतरं ब्राह्मणस्तु विमु
च्येत शूद्रं हत्वार्द्धमासतः ३० विहिताकरणेनैव प्रतिषिद्धनिषेवणे वेदविप्लावने चैव गुरुद्रोहेन्यकर्मणि तप्तकृच्छ्रं चरेत्तेन मुच्यते स
र्वदोषतः अथवा सर्वपापानां विशुद्ध्यर्थं समाहितः ३२ कुर्वन्शुश्रूषणं नित्यं वेदांतज्ञानभाषिणां श्रद्धाविनयसंयुक्तः शांतिदां
त्यादिसंयुतः ३३ यावज्ज्ञानोदयं तावद्वेदांतार्थं निरूपयेत् नास्ति ज्ञानात्परं किंचित्पापकांतारदाहकं ३४ मासमात्राद्दिनस्यैनि
सुद्रपापानि सुव्रत षण्मासश्रवणात्सर्वं नश्यत्येवोपपातकं महापातकसंघाश्च नित्यं वेदांतसेवनात् नश्यंति वत्सरात्सर्वे स
त्यमुक्तं बृहस्पते ३६ यः श्रद्धायुतो नित्यं वेदांतज्ञानमभ्यसेत् तस्य संसारविच्छित्तिः श्रवणादिति हि श्रुतिः एवमभ्यसतस्तस्य यदि वि
घ्नाभिः जायते सर्वलोकान्क्रमाद्भुक्त्वा क्रमेणैव विमोक्षि जायते ३८ सर्वलक्षणसंपन्नः शांतः सत्यपरायणः पुनश्च पूर्वभावेन विद्वांसं पर्यु
पासते तत्संपर्कात्स्वमात्मानमपरोक्षीकृतो मुनिः स्वप्नादिव विमुच्येत संसारमहोदधेः ४० तस्मात्सर्वप्रयत्नेन सत्यमुक्त्यर्थं बृहस्पते
सर्वदा सर्वमुत्सृज्य वेदांतश्रवणं कुरु ४१ इति श्रीसूतसंहितायां ज्ञानयोगखंडे सप्तमोध्यायः ईश्वर उ॰ अथातः संप्रवक्ष्यामि द्वा

स॰ ज्ञा॰
६

नधर्मफलंमुने सर्वेषामेवदानानांविद्यादानंपरंस्मृतं १ विद्ययाप्राणिनांमुक्तिस्तस्माज्ज्ञानमनुत्तमं भूमिदानंचगोदानमर्थदानंतथैवच
२ कन्यादानंचमुख्यंस्यादन्नदानंतथैवच धनधान्यसमृद्धांयोभूमिंदद्यात् द्विजायसः इहलोकेसुखीभूत्वामेत्यचानंत्यमश्नुते अरत्नि
मात्रांवाभूमिंदद्याद्ब्रह्मविदेनरः ४ सर्वपापविनिर्मुक्तःसंसारमतिवर्तते विनातांयोपपन्नायविप्रायश्रद्धयापुनः योदद्याद्दैहिकींविद्यां
नसभूयोभिजायते यतयेश्रद्धयानित्यमन्नंदद्याद्यथाबलं ६ ब्रह्मलोकमवाप्नोतिनपुनर्जायतेभुवि मठंवायतयेदद्यान्नसभूयो
भिजायते अमावास्यांमुनिश्रेष्ठब्राह्मणायानसूयवे अन्नंदद्यान्महादेवंसमुद्दिश्यसमाहितः ८ सोक्षयंफलमाप्नोतिमहादेवस्यमोभ
वेत् यस्तुकृष्णचतुर्दश्यांश्रद्धाभक्तिसमन्वितः आराधयेद्द्विजमुखेमहादेवंसमुच्यते त्रयोदश्यांनपास्नातांब्राह्मणंभोजयेन्मुदा १०
ब्रह्मलोकमवाप्नोतिब्रह्मणासहमुच्यते द्वादश्यांतुद्विजःस्नात्वाविष्णुमुद्दिश्यभक्तितः ब्राह्मणायविनीतायदद्यादन्नंसमाहितः सर्वपा
पविनिर्मुक्तोविष्णुलोकंसगच्छति १२ एकादश्यामुपोष्यैवद्वादश्यांपक्षयोरपि वासुदेवंसमुद्दिश्यब्राह्मणंभोजयेन्नरः सप्तजन्मकृतंपा
पंतत्क्षणादेवनश्यति दशम्यामिंद्रमुद्दिश्ययोदद्याद्ब्राह्मणेशुचौ १४ अन्नंवातंदुलंवापिसदैवेंद्रमवाप्नुयात् नवम्याधर्मराजानमु ६

द्दिश्यब्राह्मणेशुचौ अन्नंदद्याद्यथाशक्तिधर्मराजःप्रसीदति अष्टम्यांशंकरंरुद्यब्राह्मणंभोजयेन्नरः १६ सर्वपापविनिर्मुक्तःशिवसा
युज्यमाप्नुयात् सप्तम्यांचंद्रमुद्दिश्यब्राह्मणान्भोजयेद्द्विजः चंद्रलोकमवाप्नोतिनात्रकार्याविचारणा षष्ठ्यामादित्यमुद्दिश्यब्राह्मण
मेवभोजयेत् १८ सूर्यलोकमवाप्नोतिसुखमक्षय्यमश्नुते पंचम्यांपार्वतीविप्रानुद्दिश्यान्नेनभोजयेत् सर्वपापविनिर्मुक्तःसम्यक्ज्ञानम
वाप्नुयात् चतुर्थ्यांब्राह्मणान्शुद्धान्लक्ष्मीमुद्दिश्यभोजयेत् २० दारिद्र्यंसकलंत्यक्त्वा महालक्ष्मीमवाप्नुयात् तृतीयायांद्विजःस्नात्वाब्रा
ह्मणान्भोजयेत्सकृत् तस्यब्रह्महरिश्चापिमहादेवोवशेभवेत् द्वितीयायांविशुद्धायांब्राह्मणान्भोजयेन्नरः २२ तस्यवाचिसदाविद्यान
र्त्तनित्यमहामुने सर्वपापविनिर्मुक्तःसम्यक्ज्ञानमवाप्नुयात् प्रथमायांपवित्रायांपरब्रह्मार्पणंद्विजः योब्राह्मणमुखेकुर्याच्छ्रद्धा
भक्तिसमन्वितः २४ ससर्वसमतामेत्यब्रह्माप्येतिसनातनं ब्राह्मणायसुरांदद्याद्बृक्षांगामुत्तमांनरः सर्वपापविनिर्मुक्तःसाक्षाद्ब्रह्मसग
च्छति योदद्यात्कन्यकांशुद्धांब्राह्मणायविभूषितां सर्वपापविनिर्मुक्तःशिवलोकंसगच्छति २६ येनकेनप्रकारेणयंयंदेवंसमर्चयेत्
तंतंदेवंसमाप्नोतिनात्रकार्याविचारणा यंयंकामयतेलोकंतंतमुद्दिश्यभक्तिमान् आत्मज्ञंसर्चयेन्नित्यमात्मज्ञोमितिहिश्रुतिः २८

सू॰ ज्ञा कृमिकीटपतंगेभ्यः श्रेयांसः श्वापदास्तथा पश्वादिभ्यो नराः श्रेष्ठास्तेभ्यो ब्राह्मणास्तथा ब्राह्मणेभ्यो ऽपि विद्वांसो विद्वत्सु कृतबुद्धयः कृत
१० बुद्धिषु कर्तारस्तेभ्यः संन्यासिनो वराः ३० तेषु कुटीचकाः श्रेष्ठाश्च बहूदकसमाश्रिताः बहूदकाद्धंसो हंसात्परमहंसकः परहंसादपि
श्रेयान्नास्ति विज्ञानतो ऽधिकः तस्मादात्मविदः पूज्याः सर्वदा सर्वजंतुभिः ३२ ब्रह्मवर्चसकामस्तु ब्राह्मणं पूजयेन्नरः आरोग्यका
म आदित्यं बलकामः समीरणं कीर्तिकामो ऽनलं तद्वन्मेधाकामः सरस्वतीं ज्ञानकामो महादेवं सिद्धिकामो विनायकं ३४ भोग
कामस्तु शशिनं मोक्षकामस्तु शंकरं वैराग्यकामो विष्णुं संपुष्टिकामः शचीपतिं व्रतान्याचरतः श्रद्धाभक्तिभ्यां संयतः शुचिः स्ना
यंते पापकर्माणि क्षीयंते स्येति हि श्रुतिः ३६ ज्योतिष्टोमादिकं कर्म यः कुर्याद्विधिपूर्वकं स देवत्वमवाप्नोति नात्र कार्या विचा
रणा ३७ यः श्रद्धया युतो नित्यं शतरुद्रियमभ्यसेत् अग्निदाहात्सुरापानाद्ब्रह्महत्याचरणात्तथा ३८ मुच्यते ब्रह्महत्याया इति
कैवल्यशाखिनः शतशाखागतं साक्षाच्छतरुद्रियमुत्तमं तस्मात्तज्जपमात्रेण सर्वपापात्प्रमुच्यते चमकं च जपेद्विद्वान्सर्वपा
पप्रशांतये ४० सहस्रशीर्षासूक्तं च शिवसंकल्पमेव च जपत्यं चाक्षरं चैव सतारं तारणक्षमं त्रिःसप्तकुलमुद्धृत्य शिवलोके १०

महीयते तत्र नानाविधान्भोगान्भुक्त्वा कर्मपरिक्षयात् ४२ भूलोके जायते पुण्यं पापं वा कुरुते पुनः यावज्ज्ञानोदयस्तावज्जायते म्रियते
पि च असुखे सुखमारोप्य विषये ऽज्ञानतो नरः करोति सकलं कर्म तत्फलं चावशो ऽश्नुते ४४ अहो मायाबलाल्लोकः स्वात्मानंदमहोदधिं
विहाय विवशः क्षुद्रे रमते किं वदामि ते तस्मान्मायामयं भोगमसारमखिलं नरः विसृज्य विमलं नित्यमात्मानंदं समाश्रयेत् ४६ स
र्वसंग्रहरूपेण सर्वे हं सम्यगीरितं तस्मात्त्वं सकलं त्यक्त्वा स्वात्मानंदे कुरु श्रमं ४७ इति श्रीस्कंदपुराणे सूतसंहितायां ज्ञानयोगखंडे अष्टमोध्या
यः ईश्वर उ० अथातः संप्रवक्ष्यामि पापकर्मफलं मुने खरो ऽश्वसूकरो जाविगजाश्वमृगपक्षिणं चंडालपुल्कसत्वं च प्राप्नोति ब्रह्महा
क्रमात् दस्यूनां चिट्टजीयोनिं पक्षिणं च तथैव च २ कृमिकीटपतंगानां सुरापः प्राप्नुयाद्द्विजः राक्षसानां पिशाचानां चोरो याति सह
स्रशः क्रव्याद्दंष्ट्रिणां योनिं तृणादीनां तथैव च क्रूरकर्मरतानां च प्राप्नोति गुरुतल्पगः ४ ब्राह्मणस्य ब्राह्मणस्य धनं क्षेत्रमपहृत्य नरा
धमः ब्रह्मराक्षसतां याति शतशो ऽथ सहस्रशः धान्यचोरो भवेदाखुर्जलं हृत्वा प्लवो भवेत् कांस्यं हृत्वा भवेद्धंसः वारसं नकुलो घृतं ६ प
यः काको भवेन्मांसं हृत्वा गृध्रो भवेत्तथा चक्रवाकस्तु लवणं बकस्तैलापहारतः कौशेयं तित्तिरिः क्षौमं हृत्वा दर्दुरसंज्ञकः पत्रशाकापहारेण

वह्निदस्युर्नराधमः ९ भ्रात्रं हत्वा भवेत्सुष्वं मर्कटः स्यात्तथैव च यानापहरणाद्दुष्टः पशुं हत्वा भवेद्गजः शवभक्षणो राजा वैश्यः पूयाशनो
भवेत् श्येनाशनो भवेद्गृध्रो जलूकौ रक्तपो भवेत् १० नैतावता लं विप्रेंद्र पापकर्मफलोदयं नरके वर्तनं चास्ति महाघोरे निदारुणे हस्त
द्वंद्वं दंडवद्धा ततः शंखरूपा तथा क्षिप्यते दीनवक्त्रो च ब्रह्महा चंद्रतारकं १२ अतितप्तायसैर्दंडैः पीड्यते यमकिंकरैः प्राणिहिंसापरो
गाढं कल्पकोटिशतं मुने तप्ततैलकटाहेषु बध्वा हस्तौ पदद्वयं क्षिप्यते यमदूतैस्तु तेन तैलचोरो महामुने १४ तप्ततांम्रकटाहेषु क्षिप्य
मिथ्याभिशंसिनं जिह्वामुत्पाटयेत्सा भुवह्नूय यमकिंकराः तप्तताम्रजलं तीक्ष्णैः पिबेत्सुक्रायस्तासु धैः छिद्यते यमदूतैस्तु सुरापानर
तो नरः १६ छित्वा छित्वा पुनर्दग्ध्वा पिंडीकृत्य पुनस्तथा क्षिप्यते श्वयपूर्णे स्मिन्कटाहे गुरुतल्पगः मातरं पितरं पितरं ज्येष्ठं गुरुम
ध्यात्मवेदिनं महादेवं तथा देवं विष्णुं ब्रह्माणमेव च १८ आदित्यं चंद्रमग्निं च वायुं निंदंति ये नराः कल्पकोटिशतं दिव्यं तेन नरका पुर्यं
लये पतितहस्ते जलं चान्नं नदत्तं येन राधमैः इक्षुवत्तं भपीड्यंते मुद्गरैस्तु निरंतमाः २० पादे चास्य तथा पार्श्वे नाभौ शिश्ने गुदे क्षिति
निखन्यंते महातप्तैः शंकुभिश्चार्थहारिणः अयसा निर्मितां कांतां सुतप्तां सूर्मेरीढ़ तां गाढमालिंग्यते मर्त्यः परदारपरिग्रहात् २२

दुश्चारिण्यः स्त्रियश्चापि सुतप्तं पुरुषं तथा श्रौतस्मार्तविहीना ये निषिद्धाचररोरता पच्यंते नरके तीव्रे कल्पकोटिशतं सदा ये शिवायत
नारामवापीकूपमठादिकं २४ उपद्रवंति पापिष्ठास्तत्फलस्त्ररमंति च व्यायामोद्वर्तनाभ्यंगस्नानपानान्नभोजनं क्रीडनं मैथुनं द्यूतमाचरं
ति महोद्धताः ते च तद्विविधैर्घोरैरस्सुयंत्रादिपीडनैः २६ निरयाग्निषु पच्यंते यावच्चंद्रदिवाकरौ वेदमार्गरताचार्यनिंदां प्रकुर्वंति ये नराः
२७ द्रुतताम्रादिभिस्तेषां कर्णं आपूर्यते नघ घोराख्ये नरके केचित्पच्यंते पापकर्मतः २९ सुघोराख्ये तथा केचिदतिघोरे च केचन महाघो
राभिधे केचित् घोररूपे च केचन करालाख्ये तथा केचित्तथा केचिद्भयानके कालरात्रौ महापापात्तथा केचिद्भयोत्करे ३० केचिच्चंडाभिधे
केचिन्महाचंडाभिधे सदा चंडकोलाहले केचित्प्रचंडायां च केचन तथा पद्माभिधायां च पद्मावत्यां च केचन तथा केचन भीमायां केचिद्भी
षणसंज्ञिते ३२ करालेतु तथा केचिद्विकराले च केचन वज्रे त्रिकोणसंज्ञे च पंचकोणे च केचन सुदीर्घवर्तुलाख्ये च सप्तभौमे च केचन अ
ष्टभौमे च दीप्ते च रौरवे चैव केचन ३४ केचिदन्येषु पापिष्ठाः पच्यंते विवशा भृशं अहो कष्टं महाप्राज्ञ पापकर्मफलोदयं एवं पापफलं
ज्ञात्वा मुने ज्ञानरतो भव ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते मुने ३६ अहो ज्ञानं परित्यज्य मायया परिमोहिताः नरकेषु हि पच्यं

सू॰ ज्ञा॰ १२ नेखमकल्वेषु दुःखिताः एवं पापफलं भुक्त्वा महादेवप्रसादतः पश्चाद्धर्मो विजायेत मानुष्ये कर्मसाम्यतः ३८ इति श्रीसूतसंहितायां ज्ञा
नयोगखंडे नवमोऽध्यायः ९ ईश्वर० अथातः संप्रवक्ष्यामि देहोत्पत्तिं महामुने शृणु वैराग्यसिद्ध्यर्थं मोक्षसिद्ध्यर्थमेव च १ पुण्यैरेवतु मामो
त्रिपापैः स्थावरतामियात् समाभ्यां पुण्यपापाभ्यां मानुष्यं मानुयान्नरः २ नत्वाहुत्या रविर्नित्यं वर्द्धते मुनिसत्तम सूर्याद्दृष्टिर्विजायेत दृष्टेरो
षधयः क्रमात् औषधीभ्योऽन्नमन्नं च नित्यं भुंक्ते च मानवः पंचभूतात्मकं भुक्तं किं तस्मात्मना द्विधा पुनर्द्विधा भवेत्सारः स्थूलसूक्ष्मवि
भेदतः किट्टं मूत्रपुरीषास्थिभेदस्ताध्यात्मना भवेत् ५ पुरीषमत्र विसृज्येदनिलः क्रमशो मुने सारयोः स्थूलभागस्य पंचभूतांशकैः क्रमा
त् ६ वर्द्धते धातवः सर्वे तेषां मध्ये महामुने आकाशाद्दानवः सर्वे वर्द्धते वायुना बलं अग्निना वर्द्धते मज्जा लोहितं वर्द्धते जलात् भुवा मां
सस्य वृद्धिः स्यादिशं धातुविवर्द्धनं ८ अवशिष्टरसांशश्च द्विधा सत्त्वगुणेन च राजसेन गुणेनापि भवेत्संततरोधन तयोः सत्त्वप्रधानस्य
भूमिभागान्महामुने घ्राणेंद्रियस्याप्यानस्य वर्द्धकश्च सदा भवेत् १० उपस्थस्यापि विमेंद्राजिह्वायाश्च जलांशकः अग्निर्वाक्चक्षुषोश्चर्म
हस्तयोरनिलस्तथा आकाशो वर्द्धकः पादश्रोत्रयोर्मुनिसत्तम सर्वांशैर्वर्धकश्चांतःकरणप्राणसंज्ञयोः १२ विशेषेण महाभागो वर्द्धकोऽम १२

नसो भवेत् तोयं प्राणस्य वक्त्रांशो वदनस्य विशेषतः वायुरंशः पाणिमूलस्य पादमूलस्य चांबरं तथा रजोगुणप्रस्तोरंशः कालकर्मतः
१४ भवेत्क्रमं महाप्राज्ञ रक्तं मांसं भवेत्पुनः मांसान्मेदस्ततः स्नायुस्तस्मादस्थिसमुद्भवं ततो मज्जोद्भवस्तस्माद्बलं पश्चात्समुद्भवं बलाच्छो
णितसंयुक्तात्प्रजाकालविपाकतः १६ ऋतुकाले यदा शुक्रं निर्दोषं योनिसंगतं कदाचिन्मारुतेनैव स्त्रीरक्तेनैकतामियात् शुक्र
शोणितसंयुक्तं कललं बुद्बुदं तथा पिंडं भवद्दृढं नद्धशिरः पश्चात्सदृशं १९ तथांगुल्यः करीकुसितहस्तशास्थिसंधयः चक्षुषी ना
सिका श्रोत्रे पश्चाज्जीवप्रकाशनं अंगप्रत्यंगसंपूर्णं भवेत्तत्क्रमशो मुने एकाहात्सप्तरात्रेण तथा पंचदशेन च २० एकद्वित्रि
क्रमेणैव मासान्तं तद्विवर्द्धते दुःखं परिणतो गर्भः पूर्वकर्मवशान्मुने मुहुर्दुःखमवाप्नोति रोरवे नरके यथा तां पीडां च विजानाति
तदा जातिस्मरो भवेत्२२ नानायोनिसहस्राणि पुरा प्राप्तानि वै मया आहारा विविधा भुक्ताः पीताश्च विविधास्तनाः अहो दुःखोदधौ
मग्नो न पश्यामि प्रतिक्रियां यदि योन्याः प्रमुंचामि तं प्रपद्ये महेश्वरं २४ अध्येष्यामि सदा वेदान्सांगान् शुश्रूषया गुरोः नित्यं नैमि
त्तिकं कर्म श्रद्धयैव करोम्यहं कृतदारः पुनर्यज्ञान्करोम्यात्मविशुद्धये यज्ञैर्दग्धमलो भूत्वा ज्ञात्वा संसारहेयतां २६ वैराग्यातिशयेनैव

मोक्षकामनमाप्नुनः निरस्य सर्वकर्माणि शान्तो भूत्वा जितेन्द्रियः विरजानलजं भस्म गृहीत्वा चाग्निहोत्रजं अग्निरित्यादिभिर्मन्त्रैः षड्भिराथ
र्वणैः क्रमात् २८ विमृज्यांगानि मूर्द्धादि चरणान्तानि सादरं समुद्धूल्य सदाचार्यं प्रणिपत्यात्मविद्यया संसारसागरं घोरं लंघयाम्यहमात्म
नः इत्योगभंगतः स्मृत्वायोनियंत्रप्रपीडनात् ३० जायते वायुनायाति विस्मृतिं वैरतेन च अज्ञाने सति रागाद्यो धर्माधर्मौ च तद्वशात्
धर्मा धर्मेविशात्तु संसारी शरीरमुपजायते ज्ञानेनैव निवृत्तिः स्यादज्ञानस्य न कर्मणा ३२ यथात्मा मलिनः कर्ता भोक्ता चस्यात्त्वभावतः नास्ति न
स्य विनिर्मोक्षः संसाराज्जन्मकोटिभिः आत्मायं केवलः स्वच्छः शान्तः सूक्ष्मः सनातनः अस्ति सर्वान्तरः साक्षी चिन्मात्रः सुखविग्रहः ३४ अ
यं स भगवानीशः स्वयंज्योतिः सनातनः अस्माद्विजायते विश्वमत्रैव प्रविलीयते अयं ब्रह्मा शिवो विष्णुरयमिंद्रः प्रजापतिः अयं वायुरयं चाग्नि
रयं सर्वाश्च देवताः ३६ य एवं भूतमात्मानमन्यथा प्रतिपद्यते किं तेन न कृतं पापं चौरेणात्मापहारिणा ब्राह्मण्यं प्राप्य लोकेऽस्मिन्मूको व
धिरो भवेत् नापक्रामति संसारात्स खलु ब्रह्महा भवेत् ३८ आत्मानं चेद्विजानीयादयमस्मीति पूरुषः किमिच्छन्कस्य कामाय शरीरमनुसंज्व
रेत् भिद्यते हृदयग्रंथिः छिद्यन्ते सर्वसंशयाः क्षीयन्ते चास्य कर्माणि दृष्टे त्वात्मनि सुव्रत ४० यतो वाचो निवर्तन्ते अप्राप्य मनसा सह ज्ञात्वात्मा १३

नं परानन्दं न बिभेति कुतश्चन तस्मात्सर्वप्रयत्नेन श्रद्धया गुरुभक्तितः उत्सृज्य प्राकृतं भावं शिवोहमिति भावयेत् ४२ एतद्विज्ञानमासाद्य त्वं
ब्राह्मणानां विशेषतः प्राप्ते तत्कृतकृत्योहि द्विजो भवति नान्यथा सर्ववेदान्तसर्वस्वं मयानोक्तं रहस्यते श्रद्धयैव विजानीहि श्रद्धा सर्व
स्य कारणं ४४ सूत उ० इति श्रुत्वा मुनिश्रेष्ठा गिरिशं नाथाः समाहिताः स्तोतुमारभते भक्त्या देवदेवं त्रियंबकं बृहस्पति० नमः शिवा
य सोमाय सगुणाय त्रिशूलिने प्रधानपुरुषेशाय सृष्टिस्थित्यन्तहेतवे ४६ सर्वज्ञाय वरेण्याय शंकरायार्त्तिहारिणे नमो वेदान्तवेद्याय चि
न्मात्राय महात्मने देवदेवाय देवाय नमो विश्वेश्वराय च ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिंगलं ४८ ऊर्ध्वरेतं विरूपाक्षं विश्वरूपं नमाम्यहं विश्वा विश्वं
धिकं रुद्र विश्वमूर्तिं वृषध्वजं नमामि सत्यविज्ञानं हृदयाकाशमध्यगं चंद्रसूर्यस्तथेन्द्रश्च वह्निश्च यमसंज्ञितः ५० निर्ऋतिर्वरुणो वायुर्धन
दो रुद्रसंज्ञितः स्मृत्स्मृर्तिर्महेशस्य तया व्याप्तमिदं जगत् यस्य प्रसादलेशेन देवा देवत्वमागताः तं नमामि महेशानं सर्वज्ञमपराजितं ५२
नमो दिग्वाससे तुभ्यमम्बिकापतये नमः उमायाः पतये तुभ्यमीशानाय नमो नमः नमो नमो नमस्तुभ्यं पुनर्भूयो नमो नमः ॐका
रान्ताय सूक्ष्माय मायातीताय ते नमः ५४ नमो नमः कारणकारणाय ते नमो नमो मंगलमंगलात्मने नमो नमो वेदविदां मनीषि

सू. ज्ञा. लमुपासनीयाय नमो नमः ५५ इति श्रीस्कंदपुराणे सूतसंहितायां ज्ञानयोगखंडे दशमोध्यायः ईश्वर उवाच अथातः संप्रवक्ष्या
१४ मि नाडीचक्रमनुत्तमं श्रद्धया गुरुभक्त्या च विदित्वा चरस्यतेधुना शरीरं तावदेव स्यात् स्वकं षण्णवत्यंगुलात्मकं मनुष्याणां मुनिश्रेष्ठ स्वां
गुलीभिरिति श्रुतिः २ देहमध्ये शिखिस्थानं तप्तजांबूनदप्रभं त्रिकोणं मनुजानां तु सत्यमुक्तं हि सुव्रते गुदात्तु द्व्यंगुलादूर्ध्वं मेढ्रात्तु द्व्यंगु
लादधः देहमध्यं विजानीहि मनुष्याणां हि सुव्रते ४ कंदस्थानं मुनिश्रेष्ठ मूलाधारान्नवांगुलं चतुरंगुलमायामविस्तारं मुनिसत्तम कु
क्कुटांडवदाकारं भूषितं च त्वगादिभिः तन्मध्यं नाभिरित्युक्तं मुने वेदांतवेदिभिः ६ कंदमध्ये स्थिता नाडी सुषुम्नेति प्रकीर्तिता ति
ष्ठंति परितस्तस्या नाड्यो मुनिसत्तम द्विसप्ततिसहस्राणि तासां मुख्याश्चतुर्दश सुषुम्ना पिंगला तद्वदिडा चैव सरस्वती ८ पूषा च
वारुणी चैव हस्तिजिह्वा यशस्विनी अलंबुषा कुहूश्चैव विश्वोदरा पयस्विनी शंखिनी चैव गांधारी इति मुख्याश्चतुर्दश तासां
मुख्यतमास्तिस्रस्तिसृष्वेकावरा मुने १० ब्रह्मनाडीति सा प्रोक्ता मुने वेदांतवेदिभिः पृष्ठमध्ये स्थितेनास्थ्ना वीणादंडेन सुव्रत
सह मस्तकपर्यंतं सुषुम्ना सुप्रतिष्ठिता नाभिकंदादधः स्थानं कुंडली द्व्यंगुलं मुने १२ अष्टप्रकृतिरूपा सा कुंडली मुनिसत्तम १४

यथावद्वायुचेष्टां च जलान्नादीनि नित्यशः १३ परितः कंदपार्श्वे तु निरुध्यैव सदा स्थिता स्वमुखेन सदा वेष्ट्य ब्रह्मरंध्रमुखं मुने १४ सुषुम्ना
या इडा सव्ये दक्षिणे पिंगला स्मृता सरस्वती कुहूश्चैव सुषुम्नापार्श्वयोः स्थिते गांधारी हस्तिजिह्वा च इडायाः पृष्ठपार्श्वयोः पूषा यश
स्विनी चैव पिंगलापृष्ठपूर्वयोः १६ कुहोश्च हस्तिजिह्वाया मध्ये विश्वोदरी स्थिता यशस्विन्याः कुहोर्मध्ये वारुणी सुप्रतिष्ठिता पूषा
याश्च सरस्वत्या मध्ये प्रोक्ता यशस्विनी गांधारायाः सरस्वत्या मध्ये प्रोक्ता च शंखिनी १८ अलंबुषा स्थिता पायुपर्यंतं कंदमध्यतः पूर्वभा म
गे सुषुम्नाया मेढ्रांतं संस्थिता कुहूः अधश्चोर्ध्वं स्थिता नाडी वारुणी सर्वगामिनी पिंगलासंज्ञिता नाडी याम्यनासांतमिष्यते २० इडा चो या
ष्य त्तरनासांतं स्थिता वाचस्यते तथा यशस्विनी च याम्यस्य पादांगुष्ठांतमिष्यते पूषा याम्याक्षिपर्यंतं पिंगलायास्तु पृष्ठतः पयस्विनी तथा या
म्यकर्णांतं प्रोच्यते बुधैः २२ सरस्वती तथा चोर्ध्वमा जिह्वाया स्थिता मुने हस्तिजिह्वा तथा सव्यपादांगुष्ठांतमिष्यते शंखिनी नाम या नाडी
सव्यकर्णांतमुच्यते गांधारी सव्यनेत्रांता प्रोक्ता वेदांतवेदिभिः २४ विश्वोदराभिधा नाडी तुंदमध्ये व्यवस्थिता प्राणोपानस्तथा व्यानः
समानोदान एव च नागः कूर्मश्च कृकरो देवदत्तो धनंजयः एते नाडीषु सर्वासु चरंति दश वायवः २६ तेषु प्राणादयः पंच मुख्याः पंचसु

ते

स॰ ज्ञा॰ सुव्रत प्राणसंज्ञस्तथापानः पूज्यः प्राणस्तयोर्मुने आस्यनासिकयोर्मध्ये नाभिमध्ये तथा हृदि प्राणसंज्ञोनिलो नित्यं वर्तते
१५ मुनिसत्तम २९ अपानो वर्तते नित्यं गुदमेढ्रोरुसंधिषु उदरे वृषणे कट्यां जानुनोर्जंघयोश्च सुव्रत व्यानः श्रोत्राक्षिमध्ये च कृकट्यां गुल्फयोरपि
घ्राणस्थाने गले चैव वर्तते मुनिपुंगव ३० उदानः सर्वसंधिस्थो विज्ञेयः पादहस्तयोः समानः सर्वदेहेषु व्याप्य तिष्ठत्यसंशयः नागादिवायवः
पंच त्वगस्थ्यादिषु संस्थिताः नद्गारादिगुणः प्रोक्तो नागाख्यस्य तु सुव्रत ३२ निमीलनादि कूर्मस्य क्षुतं तु कृकरस्य च देवदत्तस्य कर्म
स्यात्तन्द्रीकर्म महामुने धनंजयस्य शोकादि कर्म प्रोक्तं तु सुव्रत निश्वासोश्वास कासादि प्राणकर्म तु सुव्रत ३४ अपानाख्यस्य वा
योः स्कविण्मूत्रादि विसर्जनं समानः सर्वसामीप्यं करोति मुनिसत्तम उदान ऊर्ध्वगमनं करोत्येवं न संशयः व्यानो विवादकृत्प्रोक्तो मु
ने वेदांतवेदिभिः ३६ सुषुम्नायाः शिवो देव इडाया देवता हरिः पिंगलाया विरिंचिः स्यात्सरस्वत्या विराण्मुने पूषादिग्देवता प्रोक्ता वा
रुणी वायुदेवता हस्तिजिह्वाभिधायास्तु वरुणो देवता भवेत् ३८ यशस्विन्या मुनिश्रेष्ठ भगवान्भास्करो मुने अलंबुषाभिमान्या
स्याद्वरुणः परिकीर्तितः कुहोः क्षुद्देवता प्रोक्ता गांधारी चंद्रदेवता शंखिन्याश्चंद्रमास्तद्वत्पयस्विन्याः प्रजापतिः ४० विश्वोदराभिधा १५

यास्तु भगवान्पावकः पतिः इडायां चंद्रमा नित्यं चरत्येव महामुने पिंगलायां रविस्तद्वन्मुने वेदविदां वर पिंगलाया इडायां तु वायोः
संक्रमणं तु यत् ४२ तदुत्तरायणं प्रोक्तं मुने वेदार्थवेदिभिः इडायाः पिंगलायां तु प्राणसंक्रमणं मुने दक्षिणायनमित्युक्तं पिंगलाया
मिति श्रुतिः इडापिंगलयोः संधिं यदा प्राणः समागतः ४४ अमावास्या तदा प्रोक्ता देहे देहभृतां वर मूलाधारं यदा प्राणः प्रविष्टः
पंडितोत्तमः ४५ तदाद्यं विषुवं प्रोक्तं तापसैस्तापसोत्तम प्राणसंज्ञो मुनिश्रेष्ठ मूर्धानं प्रविशेद्यदा ४६ तदान्त्यं विषुवं प्रोक्तं धा
र्मिकैस्तत्वचिंतकैः निश्वासोच्छ्वासनं सर्वं मासानां संक्रमो भवेत् इडायाः कुंडलीस्थानं यदा प्राणः समागतः सोमग्रहणमि
त्युक्तं तदा तत्वविदां वर ४८ तथा पिंगलया प्राणः कुंडलीस्थानमागतः यदा तदा भवेत्सूर्यग्रहणं मुनिसत्तम श्रीपर्वतं शिरःस्थाने के
दारं तु ललाटके वाराणसी महाप्राज्ञ भ्रुवोर्घ्राणस्य मध्यमे ५० भ्रुवोर्घ्राणस्य यः संधिरिति जाबालिकी श्रुतिः कुरुक्षेत्रं कुचस्थाने
प्रयागं हृत्सरोरुहे चिदंबरं च हृन्मध्ये आधारः कमलालयः आत्मस्थं तीर्थमुत्सृज्य बहिस्तीर्थानि यो व्रजेत् करस्थं स महारत्नं त्यक्त्वा
काचं विमार्गति ५२ भावतीर्थं परं तीर्थं प्रमाणं सर्वकर्मसु अन्यथालिंग्यते कांता भावेन दुहितान्यथा तीर्थानि तोयपूर्णानि देवा

सू॰ज्ञा॰ न्काशादिनिर्मितान् योगिनोन्नमपश्यंतेस्वात्मप्रत्ययकारिणः ५४ बहिस्तीर्थात्परं तीर्थमंतस्तीर्थं महामुने आत्मतीर्थं परं तीर्थमन्यतीर्थं निरर्थ
१६ कं चित्तमंतर्गतं दुष्टं तीर्थस्नानैर्न शुध्यति शतशोपि जलैर्धौतं सुराभांडमिवाशुचि ५६ विषुवायनकालेषु ग्रहणे चांतरे सदा वाराणस्यादिके स्था
ने स्नात्वा शुद्धो भवेन्नरः ज्ञानयोगपराणां तु पादप्रक्षालितं जलं पापशुध्यर्थमज्ञानां तत्तीर्थं मुनिसत्तम ५८ तीर्थे दानेन पेयज्ञे काष्ठे पाषाणके
सदा शिवं पश्यति मूढात्मा शिवो देहे प्रतिष्ठितः सर्वत्रावस्थितं शांतं न पश्यंति शंकरं ज्ञानचक्षुर्विहीनत्वादहो माया बलं मुने ६० आ
त्मस्थं यः शिवं त्यक्त्वा बहिष्ठं यजते शिवं हस्तस्थं पिंडमुत्सृज्य लिहेत्कूर्परमात्मनः शिवमात्मनि पश्यंति प्रतिमासु न योगिनः अज्ञानां भा
वनार्थाय प्रतिमाः परिकल्पिताः ६२ अपूर्वमपरं ब्रह्म स्वात्मानं सत्यमद्वयं प्रज्ञानघनमानंदं यः पश्यति स पश्यति सर्वभूतस्थमात्मा
नं विशुद्धज्ञानदेहिनं स्वात्मन्यपश्यन्वा स्वेषु पश्यन्नपि न पश्यति ६४ देवतां महतीमन्यामुपास्ते स्वात्मनो नरः न स वेद परं तत्त्वम
थयोन्यामितिश्रुतिः नाडीपुंजं सदासारं नरभावं महामुने समुत्सृज्यात्मनात्मानमहमित्यवधारय ६६ अशरीरं शरीरेषु महां
तं विभुमीश्वरं आनंदमक्षरं साक्षान्मत्वा धीरो न शोचति विभेदजनकेऽज्ञाने नष्टे ज्ञानवतो मुने आत्मनो ब्रह्मणो भेदमसंतं १६

कः करिष्यति ६८ सर्वं समासतः प्रोक्तं सादरं मुनिसत्तम तस्मान्मायामयं देहं मुक्त्वा पश्य स्वमात्मकं सूत उ॰ इति श्रुत्वा गिरं नाथो भ
क्त्या परवशः पुनः स्तोतुमारभते देवमंबिकापतिमद्भुतं ७० बृहस्पतिः जय देव परानंद जय चित्सत्यविग्रह जय संसारलोकघ्न जय पापहर
प्रभो जय पूर्ण महादेव जय देवारिमर्दन जय कल्याण देवेश जय त्रिपुरमर्दन ७२ जयाहंकारशत्रुघ्न जय मायाविषापह जय वेदांतसंवे
द्य जय वाचामगोचर जय रागहर श्रेष्ठ जय द्वेषहराग्रज जय सांबसदाचार जय सर्वसमाद्भुत ७४ जय ब्रह्मादिभिः पूज्य जय विष्णोः परा
मृत जय विद्यामयेशान जय विद्याप्रदानिश ७५ जय सर्वांगसंपूर्ण नागाभरणभूषित जय ब्रह्मविदां प्राप्य जय भोगापवर्गद ७६ जय
कामहर प्राज्ञ जय कारुण्यविग्रह जय भस्ममहादेव जय भस्मावगुंठित जय भस्मरतानां तु पाशभंगपरायण जय हृत्पंकजे नित्यं यतिभिः
पूज्यविग्रह ७८ सूत उ॰ इति स्तुत्वा महादेवं प्रणिपत्य बृहस्पतिः कृतार्थः क्लेशनिर्मुक्तो भक्त्या परवशोऽभवत् य इदं पठते नित्यं संध्ययो
रुभयोरपि भक्तिपारगतो भूत्वा परं ब्रह्माधिगच्छति ८० गंगाप्रवाहवत्तस्य वाग्विभूतिर्विजृंभते बृहस्पतिसमो बुध्या गुरुभक्त्या मया
समः पुत्रार्थी लभते पुत्रं कन्यार्थी कन्यकामियात् ब्रह्मवर्चसकामस्तु तदाप्नोति न संशयः ८२ तस्माद्भवद्भिर्मुनयः संध्ययोरुभयो

सू. ज्ञा.
१७

रपि जप्यं स्तोत्रमिदं मुने एवं देवदेवस्य भक्तितः ८३ इति श्रीसूतसंहितायां ज्ञानयोगखंडे एकादशोऽध्यायः ईश्वर उ० अथातः संप्रवक्ष्या
मि नाडीशुद्धिं समासतः विध्युक्तकर्मसंयुक्तः कामसंकल्पवर्जितः यमाद्यष्टांगसंयुक्तः शांतः सत्यपरायणः गुरुशुश्रूषणरतः पितृमातृ
परायणः २ स्वाश्रमे संस्थितः सम्यग्ज्ञानिभिश्च सुशिक्षितः पर्वताग्रे नदीतीरे बिल्वमूले वनेऽथवा मनोरमे शुचौ देशे वेदघोषसमन्वि
ते फलमूलैः सुसंपूर्णे वारिभिश्च सुसंयुते ४ सुशोभनं मठं कृत्वा सर्वरक्षासमन्वितं त्रिकालस्नानसंयुक्तः श्रद्दधानः समाहितः वि
रजानलजं भस्म गृहीत्वा चाग्निहोत्रजं अग्निरित्यादिभिर्मंत्रैर्जाबालैः सप्तभिर्मुने ६ षड्भिर्वाथर्वणैर्मंत्रैः समुद्धूल्य ततः परं तिर्यक्
त्रिपुंड्रमुरसा शिरसा बाहुमूलतः धारयन्परया भक्त्या देवदेवं प्रणम्य च सरस्वतीं सुसंपूज्य स्कंदं विघ्नेश्वरं गुरुं ८ चंद्रमादित्यमनिलं
तथैवाग्निं महामुने आरुह्य चासनं पश्चात्प्राङ्मुखोदङ्मुखोपि वा समग्रीवशिरःकायः संवृतास्यः सुनिश्चलः नासाग्रे शशभृद्बिंबं बिंदु
मध्ये तुरीयकं १० स्रवंतममृतं पश्येन्नेत्राभ्यां सुसमाहितः इडया प्राणमाकृष्य पूरयित्वोदरस्थितं ततोऽग्निं देहमध्यस्थं ध्यायन्ज्वाला
वलीयुतं बिंदुनादसमायुक्तमग्निबीजं विचिंतयेत् १२ पश्चाद्विरेचयेत्प्राणं मंदं पिंगलया बुधः पुनः पिंगलयापूर्य वह्निबीजमनुस्म १७

न
रन् पुनर्विरेचयेद्धीमानिडयैव शनैः शनैः त्रिचतुर्मासमेवं वा प्राणायामं प्रयत्नतः १४ षट्कृत्व आचरेन्नित्यं रहस्येवं त्रिसंधिषु नाडीशुद्धि
मवाप्नोति पृथक्चिह्नोपलक्षितां शरीरलघुता दीप्तिर्वह्नेर्जठरवर्तिनः नादाभिव्यक्तिरित्येतच्चिह्नं तत्सिद्धिसूचकं १६ यावदेतानि संपश्येत्ता
वदेवं समाचरेत् अथवैतत्परित्यज्य स्वात्मशुद्धिं समाश्रयेत् आत्मा शुद्धः सदा नित्यः सुखरूपः स्वयंप्रभः अज्ञानान्मलिनो भाति ज्ञा
नाच्छुद्धो विभात्ययं १८ अज्ञानमलपंकं यः क्षालयेज्ज्ञानतोयतः स एव सर्वदा शुद्धो नान्यः कर्मरतो हि सः न बुद्धिभेदं जनयेदज्ञानां कर्मसंगि
नां कर्म कर्तव्यमित्येवं बोधयेत्तान्समाहितः २० इति श्रीस्कांदे सूतसंहितायां ज्ञानयोगखंडे द्वादशोऽध्यायः ईश्वर उवाच अथातः संप्रवक्ष्या
मि तवाष्टांगानि सुव्रत यमश्च नियमश्चैव तथैवासनमेव च १ प्राणायामस्तथा विप्र प्रत्याहारस्तथापरः धारणा च तथा ध्यानं समा प्र
धिश्चाष्टमो मुने २ अहिंसा सत्यमस्तेयं ब्रह्मचर्यं दयार्जवं क्षमा धृतिर्मिताहारः शौचं चेति यमा दश ३ वेदोक्तेन प्रकारेण विना सत्य
तपोधन कायेन मनसा वाचा हिंसाहिंसा न चान्यथा ४ आत्मा सर्वगतोऽच्छेद्य अग्राह्य इति या मतिः सा चाहिंसा परा प्रोक्ता मुने वेदांत
वेदिभिः ५ यत्तु दृष्टेंद्रियैर्दृष्टं श्रुतं वेदविदां वर तस्यैवोक्तिर्भवेद्विप्र सत्यता नान्यथा भवेत् ६ सर्वं सत्यं परं ब्रह्म न चान्यदिति या

सू॰ सं॰ मतिः तत्सत्यं परमं प्रोक्तं वेदांतज्ञानभाविते ७ अन्यदीये तृणे रत्ने कांचने मौक्तिकेपि वा मनसापि निवृत्तिर्या तदस्तेयं विदुर्बुधाः
१८ ८ आत्मनोनात्मभावेन व्यवहारविवर्जनं यत्तदस्तेयमित्युक्तमात्मविद्भिर्महात्मभिः ९ कायेन मनसा वाचा नारीणां परिवर्जनं ऋ
तुसेवां विना स्वस्यां ब्रह्मचर्यं तदुच्यते १० ब्रह्मभावे मनश्चारं ब्रह्मचर्यं परं तथा आत्मवत्सर्वभूतेषु कायेन मनसा गिरा ११ अनुकं
पा दया सैव प्रोक्ता वेदांतवेदिभिः पुत्रे मित्रे कलत्रे च रिपौ स्वात्मनि संततं १२ एकरूपं मुने यत्तदार्जवं प्रोच्यते मया कायेन मनसा वा
चा शत्रुभिः परिपीडिते चित्तक्षोभनिवृत्तिर्या क्षमा सा मुनिपुंगव वेदादेव विनिर्मोक्षः संसारस्य न चान्यथा १४ इति विज्ञानं धृतिर्निश्चो त्रि
क्ता हि वैदिकैः अहमात्मा न मत्तोऽन्यो स्मीत्येवमप्रच्युता मतिः यासा प्रोक्ता धृतिः श्रेष्ठा मुने वेदैकवेदिभिः अल्पमिष्टाशनाभ्यां तु नास्ति योगः क
थंचन १६ तस्माद्योगानुगुण्येन भोजनं मितभोजनं स्वदेहमलनिर्मोक्षो मृज्जलाभ्यां महामुने यत्तच्छौचं भवेद्बाह्यं मानसं मननं विदुः अ न
हं शुद्ध इति ज्ञानं शौचं वांछंति पंडिताः १८ अत्यंतमलिनो देहो देही चात्यंतनिर्मलः उभयोरंतरं ज्ञात्वा कस्य शौचं विधीयते ज्ञानशौचं परि
त्यज्य बाह्ये यो रमते नरः स मूढः कांचनं त्यक्त्वा लोष्टं गृह्णाति सुव्रत २० ज्ञानामृतेन तृप्तस्य कृतकृत्यस्य योगिनः कर्तव्यं नास्ति लोके
१८

स्मिन्नस्ति चेन्न स तत्त्ववित् लोकत्रयेपि कर्तव्यं किंचिन्नास्त्यात्मवेदिनः इहैव जीवन्मुक्तास्ते इह चेदिति हि श्रुतिः २२ तस्मात्सर्वप्रयत्नेन मुने हिं
सादिसाधनैः आत्मानमक्षरं ब्रह्म विद्धि ज्ञानात्तु वेदजात् २३ इति श्रीसूतसंहितायां ज्ञानयोगखंडे त्रयोदशोध्यायः ईश्वरउ० अथातः
संप्रवक्ष्यामि नियमान्मुनिसत्तम तपः संतोष आस्तिक्यं दानमीश्वरपूजनं सिद्धांतश्रवणं चैव ह्रीमतिश्च जपो व्रतं एते च नियमाः प्रो
क्ता योगविद्भिर्महात्मभिः २ तानहं क्रमशो वक्ष्ये शृणुष्व द्विपुरःसरं वेदोक्तेन प्रकारेण कृच्छ्रचांद्रायणादिभिः शरीरशोषणं यत्तत्तप इत्यु
च्यते बुधैः कोहं मोक्षः कथं केन संसारं प्रतिपन्नवान् ४ इत्यालोचनमर्थज्ञास्तपः शंसंति पंडिताः यदृच्छालाभतो नित्यं प्रीतिर्या जायते नृ
णां तं संतोषं विदुः प्राज्ञाः परिज्ञानैकतत्पराः ब्रह्मादिलोकपर्यंताद्विरक्तस्य परात्मनि ६ प्रियं यत्तन्महाप्राज्ञाः संतोषं परमं विदुः श्रौते स्मार्ते
च विश्वासो यत्तदास्तिक्यमुच्यते न्यायार्जितं धनं चान्नं श्रद्धया वैदिके द्विजे अन्यद्वा यत्प्रदीयेत तद्दानं प्रोच्यते मया ८ अवैदिकाय विप्राय यत्तं
यन्मुनिपुंगव नोपकाराय तत्तस्य भस्मनीव हुतं हविः ब्रह्माणं विष्णुमीशानं वैश्यक्षत्रियवाडवैः यथाशक्त्यार्चनं भक्त्या यत्तदीश्वरपूजनं १०
रागाद्यपेतं हृदयं वागदुष्टानृतादिभिः हिंसाविरहितः काय एतच्चेश्वरपूजनं सत्यं ज्ञानमनंतं च परानंदं ध्रुवं परं प्रत्यगित्यवगंतं वेदांतश्रव

ण्डं बुधाः १२ सिद्धान्तश्रवणं प्राहुर्द्विजानां मुनिसत्तमाः श्रद्धालांच विरक्तानां तथा स्त्रीणां महामुने सिद्धान्तश्रवणं प्रोक्तं पुराणश्रवणं बुधैः
वेदलौकिकमार्गेषु कुत्सितं कर्म यद्भवेत् १४ तस्मिन्भवति या हृल्लाक्रोशस्तः संवेति कीर्तिता वैदिके पुण्ड्रसर्वेषु श्रद्धा या सा मतिर्भवेत् गुरुणा चो
पदिष्टोपि तन्त्रसंबंधवर्जितः वेदोक्तेनैव मार्गेण मंत्राभ्यासो जपः स्मृतः १६ कल्पसूत्रे पवावेदे धर्मशास्त्रे पुराणके इतिहासेनु वृत्तिर्यास
जपः प्रोच्यते मया यावेस्वासाः स्मृतयो याश्च काश्च कुदृष्टयः सर्वास्ता निःष्फलाः प्रेत्य तमोनिष्ठा हिताः स्मृता १९ श्रेयान्स्वधर्मो विगुणः प
रधर्मात्स्वनुष्ठितात् स्वधर्मे निधनं श्रेयः परधर्मो भयावहः तस्मात्सर्वप्रयत्नेन वेदमंत्रं सदा जपेत् जपश्च द्विविधः प्रोक्तो वाचिको मानस
स्तथा २० वाचिकोपांशुरुच्चैश्च द्विविधः परिकीर्तितः मानसो मननध्यानभेदात् द्वैविध्यमास्थितः उच्चैर्जपादुपांशुश्च सहस्रगुण उच्य
ते मानसश्च तथोपांशोः सहस्रगुण उच्यते २२ उच्चैर्जपस्तु सर्वेषां यथोक्तफलदं भवेत् नीचैः श्रुतो न चेत्सोपि श्रुतश्चेन्निष्फलो भवेत्
ऋषिं छंदोधिदेवं च ध्यायमानो जपेन्नरः मत्सत्रगुरुणा पूर्वमुपदिष्टस्त्वनुज्ञया २४ धर्मार्थमात्मशुध्यर्थमुपायग्रहणं व्रतं अथवाथर्व
शोर्मंत्रैर्गृहीत्वा भस्म पांडुरं सर्वांगोद्धूलनं यत्तद्व्रतं प्रोक्तं मनीषिभिः एतद्देशिरोनिष्ठाः प्राहुः पाशुपतं मुने २६ केचिच्छिरोव्रतं प्राहुः केचिदत्या

श्रमं विदुः केचित्तद्व्रतमित्यूचुः केचिच्छांभवमैश्वरं अस्य व्रतस्य माहात्म्यमागमान्तेषु संस्थितं सर्वपापहरं पुण्यं सम्यग्ज्ञानप्रकाशकं
२९ पशुपत्सुस्त्वं च व्रतेनानेन नत्यजेत् तद्व्रतानसपापीयानिति वेदान्तनिश्चयः सर्वमुक्तं समासेन नियमं मुनिसत्तम अनेन वि
धिना युक्तो भस्मज्योतिर्भविष्यति ३० इति श्रीसूतसंहितायां ज्ञानयोगखंडे चतुर्दशोध्यायः ईश्वर उ० आसनानि पृथग्वक्ष्ये शृणु वाच
स्पतेधुना स्वस्तिकं गोमुखं पद्मं वीरं सिंहासनं तथा भद्रं मुक्तासनं चैव मयूरासनमेव च सुखासनसमाख्यं च नवमं मुनिपुंगव २
जान्वोरंतरे विप्र कृत्वा पादतले उभे समग्रीवशिरस्कस्य स्वस्तिकं परिचक्षते सव्ये दक्षिणगुल्फं तु पृष्ठपार्श्वे नियोजयेत् दक्षिणेपि तथा उ श
सव्यं गोमुखं तत्प्रचक्षते ४ अंगुष्ठावपि गृह्णीयाद्धस्ताभ्यां व्युत्क्रमेण तु ऊर्वोरुपरि विप्रेंद्र कृत्वा पादतलद्वयं पद्मासनं भवेदेतत्स्याप
रोगभयापहं दक्षिणोत्तरपादं तु सव्ये ऊरुणि विन्यसेत् ६ दक्षिणोत्तरपादं तु दक्षिणोरुणि विन्यसेत् ऋजुकायः सुखासीनो वीरासन
मुदाहृतं गुल्फौ च वृषणस्याधः सीवन्याः पार्श्वयोः क्षिपेत् दक्षिणं सव्यगुल्फेन वामं दक्षिणगुल्फतः हस्तौ च जान्वोः संस्थाप्य स्वांगुली
श्च प्रसार्य च नासाग्रं च निरीक्ष्येत भवेत्सिंहासनं हि तत् गुल्फौ च वृषणस्याधः सीवन्याः पार्श्वयोः क्षिपेत् ८ पार्श्वपादौ च पाणिभ्यां द

=ईश्वर उवाच अथातः संप्रवक्ष्यामि प्राणायामं यथाविधि प्राणायाम इति प्रोक्तो रेचपूरककुंभकैः वर्णत्रयात्मकाः प्रोक्ता रेचपूरककुंभकाः ६

दंडवत्पादसुनिश्चलः भद्रासनं भवेदेतद्विषरोगविनाशनं १० निपीड्य सीवनीं सूक्ष्मां दक्षिणेतरगुल्फतः वामं याम्येन गुल्फेन मुक्तासन
मिदं भवेत् मेढ्रोपरि विनिक्षिप्य सव्यगुल्फं तथोपरि गुल्फांतरं च संक्षिप्य मुक्तासनमिदं भवेत् १२ कूर्परांग्रौ मुनिश्रेष्ठ निक्षिपेन्नाभि
पार्श्वयोः भूम्यां पाणितलद्वंद्वं निक्षिप्यैकाग्रमानसः समुन्नतशिरःपादो दंडवद्व्योम्नि संस्थितः मयूरासनमेतत्स्यात्सर्वपापप्रणा
शनं १४ येन केन प्रकारेण सुखं धैर्यं च जायते तत्सुखासनमित्युक्तमशक्तस्तत्समाश्रयेत् आसनं विजितं येन जितं तेन जगत्त्रयं
आसनं सकलं प्रोक्तं मुने वेदविदांवर अनेन विधिना युक्तः प्राणायामं सदा कुरु १६ इति श्रीसूतसंहितायां ज्ञानयोगखंडे पंचदशोध्या
यः ॥ सएव प्रणवः प्रोक्तः प्राणायामश्च तन्मयः २ इडया वायुमाकृष्य पूरयित्वोदरस्थितं शनैः षोडशभिर्मात्रैरकारं तत्र संस्मरेत् पू
रितं धारयेत्पश्चाच्चतुःषष्ट्या तु मात्रया उकारमूर्तिमत्रापि संस्मरन्प्रणवं जपेत् ४ यावद्वा शक्यते तावद्धारयन् जपसंयुतं पूरितं
रेचयेत्पश्चान्मकारेणानिलं बुधः शनैः पिंगलया विप्र द्वात्रिंशन्मात्रया पुनः प्राणायामो भवेदेष ततश्चैवं समभ्यसेत् ६ पुनः पिं
गलयापूर्य मात्रैः षोडशभिस्तथा मकारमूर्तिमत्रापि स्मरेदेकाग्रमानसः धारयेत्पूरितं विद्वान्प्रणवं विंशतिद्वयं जपेदत्र स्मरेन्मू

र्तिमुकाराख्यां तु वैष्णवीं ८ अकारं तु स्मरेत्पश्चाद्रेचयेदिडयानिलं एवमेव पुनः कुर्यादिडयापूर्य बुद्धिमान् एवं समभ्यसेन्नित्यं प्राणायामं
यतीश्वरः अथवा प्राणमारोप्य पूरयित्वोदरस्थितं १० प्रणवेन समायुक्तां व्याहृतीभिश्च संयुतां गायत्रीं संजपेद्बुद्धः प्राणसंयमनत्रयं पु
नश्चैवं त्रिभिः कुर्याद्गृहस्थश्च त्रिसंधिषु ब्रह्मचर्याश्रमस्थानां वनस्थानां महामुने १२ प्राणायामो विकल्पेन प्रोक्तो वेदांतवेदिभिः
द्विजक्षत्रियस्योक्तः प्राणायामो महामुने विरक्तानां प्रबुद्धानां वैश्यानां च तथैव च शूद्राणां च तथा स्त्रीणां प्राणसंयमनं मुने १४
नमोंतं शिवमंत्रं वा वैष्णवं वा न चान्यथा नित्यमेवं प्रकुर्वीत प्राणायामांस्तु षोडश ब्रह्महत्यादिभिः पापैर्मुच्यते मासमात्रतः षण्मा
साभ्यासतो विप्रा वेदनेच्छामवाप्नुयात् १६ वत्सराद्ब्रह्मविद्वान्स्यात्तस्मान्नित्यं समभ्यसेत् योगाभ्यासरतो नित्यं स्वधर्मनिरतश्च यः
प्राणसंयमनेनैव ज्ञानान्मुक्तो भविष्यति बाह्यादापूरणं वायोरुदरे पूरको हि सः १८ संपूर्णकुंभवद्वायोर्धारणं कुंभको भवेत् ब
हिर्विरेचनं वायोरुदराद्रेचकः स्मृतः प्रस्वेदजनको यस्तु प्राणायामेषु सोधमः कंपनं मध्यमं विद्यादुत्थानं चोत्तमं तथा २० पूर्वं पूर्वं
प्रकुर्वीत यावदुत्तमसंभवः संभवत्युत्तमे प्राज्ञः प्राणायामे सुखी भवेत् प्राणायामेन चित्तं तु शुद्धं भवति सुव्रत चित्ते शुद्धे मनःसाक्षा

स॰ ज्ञा॰ सम्यक् ज्योतिश्चक्षुःस्थितं २२ प्राणाग्निनैव संयुक्तः परमात्मनि तिष्ठति प्राणायामपरस्यास्य पुरुषस्य महात्मनः देहश्चोत्तिष्ठते तेन किं
२१ चिज्ज्ञानाद्विमुक्तता रेचकं पूरकं मुक्त्वा कुंभकं नित्यमभ्यसेत् २४ सर्वपापविनिर्मुक्तः सम्यक् ज्ञानमवाप्नुयात् मनोजवत्वमाप्नो
ति पलितादि च नश्यति प्राणायामैकनिष्ठस्य न किंचिदपि दुर्लभं तस्मात्सर्वप्रयत्नेन प्राणायामं समभ्यसेत् २६ विनियोगान्प्रवक्ष्यामि प्राणाया
मस्य सुव्रत संध्ययोर्ब्राह्मकाले वा मध्याह्ने वाथ वा सदा बाह्यं प्राणं समाकृष्य पूरयित्वोदरेण च नासाग्रे नाभिमध्ये च पादांगुष्ठे च धारये
त् २८ सर्वरोगविनिर्मुक्तो जीवेद्वर्षशतं नरः नासाग्रधारणाद्वायुर्जितो भवति सुव्रत सर्वरोगविनाशः स्यान्नाभिमध्ये च धारणा
त् शरीरलघुता विप्र पादांगुष्ठनिरोधनात् ३० जिह्वया वायुमाकृष्य यः पिबेत्सततं नरः श्रमदाहविनिर्मुक्तो भवेन्नीरोगतामियात् जिह्व
या वायुमाकृष्य जिह्वामूले निरोधयेत् पिबेदमृतमव्यग्रं सकलं सुखमाप्नुयात् ३२ इडया वायुमाकृष्य भ्रुवोर्मध्ये निरोधयेत् यः पिबे
दमृतं शुद्धं व्याधिभिर्मुच्यते हि सः इडया वेदतत्त्वज्ञ तथा पिंगलयापि च नाभौ निरोधयेत्तेन व्याधिभिर्मुच्यते नरः ३४ मासमात्रं त्रिसंध्या
यां जिह्वयारोप्य मारुतं अमृतं च पिबेन्नाभौ मंदं मंदं निरोधयेत् वातपित्तादिजा दोषा नश्यंत्येव न संशयः नासाभ्यां वायुमाकृष्य नेत्रद्वंद्वे २१

निरोधयेत् ३६ नेत्ररोगा विनश्यंति तथा श्रोत्रनिरोधनात् तथा वायुं समारोप्य धारयेच्छिरसि स्थिरं शिरोरोगा विनश्यंति सत्यमुक्तं वहस्य
ते स्वस्तिकासनमास्थाय समाहितमनास्तथा ३८ अपानमूर्ध्वमाकृष्य प्रणवेन शनैः शनैः हस्ताभ्यां बंधयेत्सम्यक् कर्णादिकरणानि वै अं
गुष्ठाभ्यां मुने श्रोत्रे तर्जनीभ्यां तु चक्षुषी नासापुटावथान्याभ्यां प्रच्छाद्य करणानि वै ४० आनंदाविर्भवं यावत्तावन्मूर्ध्नि धारयेत् प्राणः प्रयात्य
नेनैव ब्रह्मरंध्रं महामुने ब्रह्मरंध्रगते वायौ नादश्चोत्पद्यतेनघ शंखध्वनिनिभश्चादौ मध्ये मेघध्वनिर्यथा ४२ शिरोमध्यगते वायौ गि
रिप्रस्रवणं यथा पश्चात्प्रीतो महाप्राज्ञ साक्षादात्मोन्मुखं भवेत् पुनस्तज्ज्ञाननिष्पत्तिस्तया संसारनिर्वृतिः दक्षिणोत्तरगुल्फेन सीवनीं
पीडयेत्स्थिरां ४४ सव्येतरेण गुल्फेन पीडयेद्बुद्धिमान्नरः जान्वोरधःस्थितां संधिं स्मृत्वा देवं त्र्यंबकं विनायकं च संस्मृत्य तथा वागीश्वरीं
पुनः लिंगनालात्समाकृष्य वायुमप्यग्रतो मुने ४६ प्रणवेनाग्नियुक्तेन बिंदुयुक्तेन बुद्धिमान् मूलाधारस्य विप्रेंद्र मध्ये तु निरोधयेत्
निरुद्धवायुना दीप्तो वह्निर्दहति कुंडलीं पुनः सुषुम्नया वायुर्वह्निना सह गच्छति ४८ [illegible] एवमभ्यसतस्तस्य जितो वायुर्भवेद्ध्रुवं प्र
स्वेदः प्रथमः पश्चात्कंपनं मुनिसत्तम उत्थानं च शरीरस्य चिह्नमेतज्जितेऽनिले एवमभ्यसतस्तस्य मूलरोगो विनश्यति ५० भगंदरं च नष्टं स्यात्

सू॰ज्ञा॰ यान्येव्याधयोमुने पातकानिविनश्यंतिक्षुद्राणिचमहांतिच नष्टेपापेविशुद्धंस्याच्चित्तदर्पणमुत्तमं पुनर्ब्रह्मादिलोकेभ्योवैराग्यंजा
२२ यतेन्हृणं ५२ विरक्तस्यतुसंसारात्ज्ञानंकैवल्यसाधनं तेनपापापहानिःस्यात्ज्ञात्वादेवमितिश्रुतिः अहोज्ञानामृतंमुक्त्वामा
यायापरिमोहिताः परिभ्रमंतिसंसारेसदाऽसारेनराधमाः ५४ ज्ञानामृतरसोयेनसकृदास्वादितोभवेत् ससर्वकार्यमुत्सृज्यतत्रैव
परिधावतिज्ञानामृतरसःप्रायस्तेननास्वादितोभवेत् योवान्यत्रापिरमतेतद्धितायैवदुर्मतिः ५६ ज्ञानस्वरूपमेवाहुर्जगदेतद्विच
क्षणाः अर्थस्वरूपमज्ञानात्पश्यंत्यन्येकुदृष्टयः यज्ञैर्देवत्वमाप्नोतितपोभिर्ब्रह्मणःपदं दानैर्भोगानवाप्नोतिज्ञानाद्ब्रह्माधिगच्छ
ति ५८ कर्मणाकेचिदिच्छंतिकैवल्यंमुनिसत्तमाः तेमूढामुनिशार्दूलप्लवाह्येतेइतिश्रुतिः आत्मैवेदंजगत्सर्वमितिजानंतिपंडि
ताः अज्ञानेनावृतामर्त्यानविजानंतिशंकरं ६० अज्ञानपाशबद्धत्वादमुक्तपुरुषःस्मृतः ज्ञानात्तस्यनिवृत्तिःस्यात्प्रकाशात्तमसो
यथा आत्मास्वरूपविज्ञानादज्ञानस्यपरिक्षयः क्षीणेज्ञानेमहाप्राज्ञरागादीनांपरिक्षयः ६२ रागाद्यसंभवेप्राज्ञपुण्यपापोपमर्द
नं तयोर्नाशेशरीरेणनपुनःसंप्रयुज्यते अशरीरोमहानात्मासुखदुःखैर्नबाध्यते क्लेशमुक्तःप्रसन्नात्मामुक्तइत्युच्यतेबुधैः ६४ न

२२

तस्मादज्ञानमूलानिसर्वदुःखानिदेहिनां ज्ञानेनैवनिवृत्तिःस्यादज्ञानस्यनकर्मभिः नास्तिज्ञानात्परंकिंचित्पवित्रंपापनाशनं तदभ्यासादृ
तेनास्तिसंसारछेदकारणं ६६ सर्वमुक्तंसमासेनतवस्नेहान्महामुने गोपनीयंत्वयैवेषवेदार्थोमहामुने ६७ इतिश्रीसूतसंहितायांज्ञा
३ नयोगखंडेप्राणायामविधानंनामषोडशोध्यायः ईश्वर॰ अथातःसंप्रवक्ष्यामिप्रत्याहारंमहामुने इंद्रियाणांविचरतोविषयेषुस्वभा
वतः बलादाहरणंतेषांप्रत्याहारःसउच्यते यद्यत्पश्यतितत्सर्वंब्रह्मपश्येत्समाहितः २ प्रत्याहारोभवत्येषब्रह्मविद्भिःपुरोदितः यदि
शुद्धमशुद्धंवाकरोत्यामरणांतिकं तत्सर्वंब्रह्मणेकुर्यात्प्रत्याहारोयमुच्यते अथवानित्यकर्माणिब्रह्माराधनबुद्धितः ४ काम्यानि
चतथाकुर्यात्प्रत्याहारःसउच्यते अथवावायुमाकृष्यस्थानात्स्थानंनिरोधयेत् दंतमूलात्तथाकंठेकंठादुरसिमारुतं उरोदेशात्समाकृ
ष्यनाभिकंदेनिरोधयेत् ६ नाभिकंदात्समाकृष्यकुंडल्यांतुनिरोधयेत् कुंडलीदेशतोविद्वान्मूलाधारेनिरोधयेत् तथापानेकटिद्वंद्वेत
थोरुद्वयमध्यमे तथाजानुद्वयेजंघेपादांगुष्ठेनिरोधयेत् ८ प्रत्याहारोयमित्युक्तःप्रत्याहारपरैःपुरा एवमभ्यासयुक्तस्यपुरुषस्यमहा
त्मनः सर्वपापानिनश्यंतिभवरोगाश्चसुव्रत अथवान्यत्प्रवक्ष्यामिप्रत्याहारांतरंमुने १० नाडीभ्यांवायुमाकृष्यनिश्चलःस्वस्तिकासनः

वा

म

सू॰ सं॰ ११ येदनिलं विद्वान्नाप्यत्र तलं सकं पश्चात्पादद्वयेनद्वन्मूलाधारे तथैव च नाभिकंदे च तन्मध्ये कंठकूपे च तालुके १२ भ्रुवोर्मध्ये ललाटे
२३ च तथा मूर्द्धनि धारयेत् अकारं च तथोकारं मकारं च तथैव च नकारं च मकारं च शिकारं च वकारकं यकारं च तथोंकारं जपेद्बुद्धिमतां वरः
१४ प्रत्याहारोयमित्युक्तः पंडितैः पंडितोत्तम अथवा मुनिशार्दूल प्रत्याहारं वदामि ते देहात्मत्मनि विद्वान्समाहृत्य समाहितः आत्मना
त्मनि निर्द्वंद्वे निर्विकल्पे निरोधयेत् १६ प्रत्याहारः समाख्यातः साक्षाद्वेदांतवेदिभिः एवमभ्यसतस्तस्य न किंचिदपि दुर्लभं तस्य पुण्यं च पा
पं च न हि सत्यं ह्यस्यते अयमेव ततो विद्वन् श्रेष्ठः साक्षादेवेश्वरः पुमान् १८ प्रत्याहारः समाख्यातः संक्षेपेण महामुने गोपनीयस्त्वया नित्यं गुह्या
ह द्गुह्यतरो ह्ययं १९ इति श्रीसूतसंहितायां ज्ञानयोगखंडे प्रत्याहारविधिर्नाम सप्तदशोऽध्यायः ईश्वर उ॰ अथातः संप्रवक्ष्यामि धारणाः पंच
सुव्रत देहमध्यगते व्योम्नि बाह्याकाशं तु धारयेत् १ प्राणे बाह्यानिलं तद्वज्ज्वलने चाग्निमौदरे तोयं तोयांशके भूमिं भूमिभागे महामुने हयरवलका
राख्यं मंत्रमुच्चारयेत्क्रमात् धारणैषा मया प्रोक्ता सर्वपापविशोधिनी ३ जान्वंतः पृथिवीभागो ह्यपां पायं तत उच्यते हृदयांतस्तथाग्न्यंशो भ्रूमध्यां
तोनिलांशकः आकाशांशस्तथा प्राज्ञ मूर्द्धांतः परिकीर्तितः ब्रह्माणं पृथिवीभागे विष्णुं तोयांशके तथा ५ अग्न्यंशे च महेशानमीश्वरं चानिलांश हेरंभ
२३

पादे

के आकाशांशे महाप्राज्ञ धारयेत्तु सदाशिवं अथवा तव वक्ष्यामि धारणं मुनिपुंगव मनसीं दुं दिशः श्रोत्रे कांते विद्युं बले हरिं ७ वाच्यग्निमित्रमुत्स
र्गे तथोपस्थे प्रजापतिं त्वचि वायुं तथा नेत्रे सूर्यं मर्त्तिं तथैव च जिह्वायां वरुणं घ्राणे भूमिं देवीं तथैव च पुरुषे सर्वशास्तारं बोधानंदमयं शिवं धारये
द्बुद्धिमान्नित्यं सर्वपापविशुद्धये एषा च धारणा प्रोक्ता योगशास्त्रार्थवेदिभिः १० ब्रह्मादिकार्यरूपाणि स्वे स्वे संहृत्य कारणे सर्वकारणमव्यक्तमनिरू
प्यमचेतनं साक्षादात्मनि संपूर्णे धारयेत्प्रयतो नरः धारणैषा परा प्रोक्ता धार्मिकैर्वेदपारगैः १२ इंद्रियाणि समाहृत्य मनसात्मनि धारयेत् कं
चित्कालं महाप्राज्ञ धारणैषा च रजिता वेदावेदसदा देवाः वेदा वेदसदा नराः वेदावेद सदा लोका वेदा वेद महेश्वरः १४ इति चित्तव्यवस्थाया धार
णा सा पि कीर्तिता ब्रह्मैवाहं सदानाहं देवो यक्षो पवानरः नरदेहेंद्रियबुध्यादिनमायानान्यदेवता इति बुद्धिव्यवस्था पि धारणं सेति हि श्रुतिः
१६ सर्वं संक्षेपतः प्रोक्तं सर्वशास्त्रविशारद आगमांतैकसंसिद्धमोक्षेयं भवतां सदा १७ इति सूतसंहितायां ज्ञानयोगखंडे अष्टादशोऽध्यायः
ईश्वर॰ अथातः संप्रवक्ष्यामि ध्यानं संसारनाशनं आकाशे निर्मलं शुद्धं भासमानं सुशीतलं सोममंडलमाद्यं गमचलं दृष्टिगोचरं ध्यात्वा मध्ये
महादेवं परमानंदविग्रहं २ उमार्द्धदेहं वरदमुत्पत्तिस्थितिवर्जितं शुद्धस्फटिकसंकाशं चंद्ररेखावतंसकं त्रिलोचनं चतुर्बाहुं नीलग्रीवं पराल

रं ध्यायेन्नित्यं सदा सोहमिति ब्रह्मविदां वर ५ अथवाकाशमध्यस्थे भ्राजमाने सुशोभने आदित्यमंडले शुभ्रे लक्षयोजनविस्तृते सर्वलोकवि
धातारमीश्वरं हेमरूपिणं हिरण्मयश्मश्रुकेशं हिरण्मयनखं तथा ६ कप्यास्यासनवद्वक्त्रं नीलग्रीवं विलोहितं आगोपालप्रसिद्धं तमवि
कारं शरीरिणं सोहमित्यनिशं ध्यायेत्संध्याकालेषु वा नरः अथवा वैदिके शुद्धे ह्यग्निहोत्रादिमध्यगे ८ आत्मानं जगदाधारमानंदानु
भवं सदा गंगाधरं विरूपाक्षं विश्वरूपं वृषध्वजं चतुर्भुजं समासीनं चंद्रमौलिं कपर्दिनं रुद्राक्षमालाभरणमुमायाः पतिमीश्वरं १० गो
क्षीरधवलाकारं गुह्याद्गुह्यतरं सदा अत्यद्भुतमनिर्देश्यमहं वै ध्याय चिंतयेत् अथवाहं हरिः साक्षात्सर्वज्ञः पुरुषोत्तमः सहस्रशीर्षा पुरुषः
सहस्राक्षः सहस्रपात् १२ विश्वो नारायणो देव अक्षरः परमः प्रभुः इति ध्यात्वा पुनः स्वहृदयांभोजमध्यमे मालापामैर्विकसिते परमेश्वर स्व
मंदिरे अष्टैश्वर्यदलोपेते विद्याकेसरसंयुते १४ ज्ञाननालमहत्कंदे प्रणवेन प्रबोधिते विश्वार्चिषं महावह्निं ज्वलंतं विश्वतोमुखं १५ वैश्वा
नरं जगद्योनिं शिखातन्विनमीश्वरं तापयंतं स्वकं देहमापादतलमस्तकं निवातदीपवत्तस्मिन्दीपितं हव्यवाहनं नीलतोयदमध्यस्थं
विद्युल्लेखेव भास्वरं नीवारशूकवद्रूपं पीताभासं विचिंतयेत् तस्य वह्नेः शिखायां तु मध्ये परमकारणं १८ परमात्मानमानंदं परमाकाशमी

औपाधिको विनश्यत्ययः २

श्वरं कृतं सत्यं परं ब्रह्म सांबं संसारभेषजं ऊर्ध्वरेतं विरूपाक्षं विश्वरूपं महेश्वरं नीलग्रीवं समात्मानं पश्यंतं पापनाशनं २० ब्रह्मविष्णुमहेशा
नैर्ध्येयं ध्येयविवर्जितं सोहमित्यादरेणैव ध्यायेद्योगी महेश्वरं अयं मुक्तेर्महामार्ग आगमानेकसंस्थितः अथवाहं मुनिश्रेष्ठ ब्रह्मा लो
कपितामहः २२ इति स्मृत्वा स्वहृन्मध्ये शिवं परमकारणं साक्षादेशांतसंवेद्यं सांबं संसारभेषजं अहं वै ध्याता विमुक्त्यर्थं ध्यायेदीशानमव्य
यं अथवा सत्यमीशानं ज्ञानमानंदमद्वयं २४ अनंतममलं नित्यमादिमध्यांतवर्जितं तथाऽस्थूलमनाकाशमसंस्पृश्यमचक्षुषं न
रसं न च गंधाख्यमप्रमेयमनूपमं सर्वाधारं जगद्रूपमरूपं परमव्ययं २६ अदृश्यं दृश्यमंतस्थं बहिस्थं सर्वतोमुखं सर्वतः पाणिपादं
च सर्वकारणकारणं सर्वज्ञातादिसंयुक्तमहमित्येव चिंतयेत् अयं पंथा मुनिश्रेष्ठ साक्षात्संसारनाशने २८ अवाच्यं सच्चिदानंदमनंतं
ब्रह्मसुव्रत अहमस्मीत्यभिध्यायेद्ध्येयातीतं विमुक्तये २९ इदं तथा नरे वेशमभिध्यायेन्मनागपि ब्रह्मणः साक्षिचिद्रूपस्तद्रूपा इति हि
श्रुतिः ३० एवं ध्यानपरः साक्षाच्छिव एव न चान्यथा अनेन सदृशो लोके न हि वेदविदां वर प्रक्षीणशेषपापस्य ज्ञाने ध्याने भवेन्मतिः पा
पोपहतबुद्धीनां तद्वार्तापि सुदुर्लभा ३२ अथवा विष्णुमव्यक्तमाधारं देवनायकं शंखचक्रधरं देवं पद्महस्तं सुलोचनं किरीटकेयूरध

सू॰ज्ञा॰ रंपीतांवरधरंहरिं श्रीवत्सवक्षसंविष्णुंपूर्णचंद्रनिभाननं ३४ पद्मपुष्पदलाभाक्षंसुप्रसन्नंशुचिस्मितं शुद्धस्फटिकसंकाशमहमित्येवचिंतये
२५ त् एतच्चदुर्लभंप्रोक्तंयोगशास्त्रविशारदैः अथवादेवदेवेशंवरदांयपरमेष्ठिनं ३६ अक्षमालाधरंदेवंकमंडलुकरांवुजं वरदाभयहस्तंचवा
ग्देव्यासहितंसदा कुंदेंदुसदृशाकारमहमित्येवचिंतयेत् अथवाग्निंतथादित्यंचंद्रंवादेवतांतरं ३९ वेदोक्तेनैवमार्गेणसदाहमितिचिं त
येत् एवमभ्यासयुक्तस्यपुरुषस्यमहात्मनः क्रमाद्वेदांतविज्ञानंविजायेतन्नसंशयः ज्ञानाद्ज्ञानविच्छित्तिःसैवनस्यविमुक्तता ४० स
र्वमुक्तंसमासेनमयावेदांतसंग्रहं मत्प्रसादाद्विजानीहिमाशंकिष्ठाःकदाचन ४१ इतिश्रीसूतसंहितायांज्ञानयोगखंडेध्यानविधिर्नाम
एकोनविंशोध्यायः ईश्वरउ॰ अथातःसंप्रवक्ष्यामिसमाधिंभवनाशनं समाधिःसंविदुत्पत्तिःपरजीवैक्यतामतिः यदिजीवःपराद्भिन्नःका
र्यतामेतिसुव्रत अचित्वंचप्रसज्येतघटवत्खंडितोनघ २ विनाशित्वंभयंचस्याद्द्वितीयाद्वाइतिश्रुतिः नित्यःसर्वगतोह्यात्माकूटस्थोदोषवर्जि
तः एकःसभिद्यतेभ्रांत्यामाययानस्वरूपतः तस्माद्द्वैतमेवास्तिनप्रपंचोनसंसृतिः ४ यथाकाशोघटाकाशोमहाकाशइतीरितः तथाभ्रां
तैर्द्विधाप्रोक्तोह्यात्माजीवेश्वरात्मना नाहंदेहोनचप्राणोनेंद्रियाणितथैवच नमनोहंनबुद्धिश्चनैवचित्तमहंकृतिः ६ नाहंपृथ्वीन स

लिलंनचवह्निर्नचानिलः नचाकाशोनशब्दश्चनचस्पर्शस्तथारसः नाहंगंधोनरूपंचनमायाहंनसंसृतिः सदासाक्षिस्वरूपत्वाच्छिवएवा
स्मिकेवलः ८ इतिधीर्यामुनिश्रेष्ठसासमाधिरिहोच्यते अथवापंचभूतेभ्योजातमंडंमहामुने ९ भूतमात्रतयादग्ध्वाविवेकेनैववह्निना
पुनःस्थूलादिभूतानिसूक्ष्मभूतात्मनानया १० विलाप्यैवंविवेकेनततस्तान्यपिबुद्धिमान् मायामात्रतयादग्ध्वामायांचप्रत्यगात्मनां सो
हंब्रह्मनसंसारीनमत्तोन्यःकदाचन इतिविद्यात्स्वमात्मानंससमाधिःप्रकीर्तितः १२ अथवायोगिनांश्रेष्ठप्रणवात्मानमीश्वरं वर्णत्रया
त्मनाविद्याद्कारादिक्रमेणतु ऋग्वेदोयमकाराख्योउकारोयजुरुच्यते मकारःसामवेदाख्योनादस्त्वाथर्वणीश्रुतिः १४ अकारोभग
वान्ब्रह्मातथोकारोहरिःस्वयं मकारोभगवान्रुद्रस्तथानादस्तुकारणं अग्नयश्चतथालोकाअवस्थाश्चसप्तउकानादिस्वराःकालश्चैतेवर्णत्रया स्वयः ६
त्मकाः १६ इतिज्ञात्वापुनःसर्वंप्रपंचत्रयमात्रतः विलाप्याकारमहंद्रमुकाराख्येविलापयेत् उकारंचमकाराख्येमहानादेमकारकं त
थामायात्मनानादमायोजीवानुरूपतः १८ जीवमीश्वरभावेनविद्यात्सोहमितिध्रुवं एषाबुद्धिश्चविद्वद्भिःसमाधिरितिकीर्तिता यथाफे
नतरंगादिसमुद्रादुत्थितंपुनः समुद्रेलीयतेतद्वज्जगन्मय्येवलीयते २० तस्मान्मत्तःपृथङ्नास्तिजगन्मायाचसर्वदा इतिबुद्धिःसमाधि

स०ज्ञी० स्यात्समाधिरितिहिश्रुतिः यस्यैवंपरमात्मायंप्रत्यग्भूतःप्रकाशितः सयातिपरमंभावंस्वकंसाक्षात्परात्परं २३ यदामनसिचैतन्यंभातिसर्वत्रगंस
२६ योगिनोव्यवधानेनतदासंपद्यतेस्वयं यदासर्वाणिभूतानिस्वात्मन्येवाभिपश्यति सर्वभूतेषुचात्मानंब्रह्मसंपद्यतेतदा २४ यदासर्वा
णिभूतानिसमाधिस्थोनपश्यति एकीभूतःपरेणासौतदाभवतिकेवलः २५ यदासर्वेप्रमुच्यंतेकामायेस्यहृदिस्थिताः तदासावमृतीभा
वःक्षेमंगच्छतिपंडितः २६ यदाभूतपृथग्भावमेकस्थमनुपश्यति ततएवचविस्तारंब्रह्मसंपद्यतेतदा २७ यदापश्यतिचात्मानंकेवलंपरमार्थ
तः मायामात्रंजगत्कृत्स्नंतदाभवतिनिर्वृतः २८ यदाजन्मजरादुःखव्याधीनामेकभेषजं केवलंब्रह्मविज्ञानंजायतेसौतदाशिवः
२९ तस्माद्विज्ञानतोमुक्तिर्नान्यथाकर्मकोटिभिः कर्मसाध्यस्यनित्यत्वंनसिध्यतिकदाचन ३० ज्ञानंवेदांतविज्ञानमज्ञानमित
रन्मुने अहोज्ञानस्यमाहात्म्यंमयावक्तुंनशक्यते ३१ अल्पल्पोपियथावह्निःसुमहन्नाशयेत्तमः ज्ञानाभ्यासस्तथाल्पोपिमहत्पापंवि
नाशयेत् ३२ यदावह्निर्महादीप्तःशुष्कमार्द्रंचनिर्दहेत् तथाशुभाशुभंकर्मज्ञानाग्निर्दहतिक्षणात् ३३ पद्मपत्रंयथातोयैःस्वस्थैरपि
नलिप्यते तथाशब्दादिभिर्ज्ञानीविषयैर्नहिलिप्यते ३४ मंत्रौषधिबलैर्यद्वज्जीर्यतेभक्षितंविषं तद्वत्सर्वाणिपापानिजीर्यंतेज्ञानिनःक्षणा

२६

त् ३५ पश्यन्शृण्वन्स्पृशन्जिघ्रन्नश्नन्गच्छन्स्वपन्श्वसन् प्रलपन्विसृजन्गृह्णन्नुन्मिषन्निमिषन्नपि ३६ अकर्ताहमभोक्ताहमसंगःपरमेश्वरः
सदामत्संनिधानेनचेष्टतेसर्वमिंद्रियं ३७ इतिविज्ञानसंपन्नःसंगंत्यक्त्वाकरोतियः लिप्यतेनसपापेनपद्मपत्रमिवांभसा ३८ येहिंसंतिमहा
त्मानंज्ञानवंतंनराधमाः पच्यंतेरौरवेकल्पमेकंतेनरकेसदा ३९ दुर्वृत्तोवासुवृत्तोवामूर्खःपंडितएववा ज्ञानाभ्यासरतःपूज्यःकिंपुनर्ज्ञान
वाचरः ४० निरपेक्षंमुनिंशांतंनिर्वैरंसमदर्शिनं अनुव्रजाम्यहंनित्यंपूयेयंत्वंघ्रिरेणुभिः ४१ यथाराजाजनैःसर्वैःपूज्यतेमुनिसत्तमतथाज्ञानी ये
सदादेवैर्मुनिभिःपूज्यएवहि ४२ यस्याहंसमुद्दिश्यज्ञानीगच्छतिसुव्रत तस्यकीर्तंतिपितरोयास्यामःपरमांगतिं ४३ यस्यानुभवप
र्यंताबुद्धिस्तत्त्वेप्रवर्तते तद्दृष्टिगोचराःसर्वेमुच्यंते[illegible]मुच्य[illegible]सर्वकिल्बिषैः ४४ कुलंपवित्रंजननीकृतार्थाविश्वंभरापुण्यवतीचतेन अपार
सच्चित्सुखसागरेस्मिन्लीयतेयस्यमनःप्रचारः ४५ महात्मनोज्ञानवतःप्रदर्शनात्सुरेश्वरत्वंझटितिप्रयाति विहायसंसारमहोदधौनरोमं र
तितेपापबलादहोमुने ४६ महानिधिंप्राप्यविहायतंयथाविचेष्टतेमोहबलेनबालकः यथातथाज्ञानिनमीश्वरेश्वरंविहायमोहेनचरंतिमान ८
वाः ४७ अहोमहांतंपरमार्थदर्शिनंविहायमायापरिमोहितानराः हितायलोकेविचरंतितेमुनेविषंपिबंत्येवमहामृतंविना ४८ बहुनोक्तेनकिं

सं प

सर्वैर्नहेतोर्ष्यादितं श्रद्धया गुरुभक्त्या त्वं विद्धि वेदांतसंग्रहं ४९ यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ तस्यैते कथिता ह्यर्थाः प्रकाशंते न संशयः ५०
सूत उ० इत्येवमुक्त्वा भगवान् स्तब्धीभावो महेश्वरः वक्तव्याभावमालोक्य मुनयः करुणानिधिः ५१ हृहस्यनिश्च मुनयो वेदांतश्रवणात्पुनः
आनंदाब्धिंत्र सर्वांग आत्मानंदावशो भवेत् ५२ भवंतोपि महाभागा ज्ञाननःश्चाश्नात्मवेदनाः अभवन्नहं स्वाश्च माशंकध्वं कदाचन ५३
स्थापयध्वमिमं मार्गं प्रयत्नेनापि हे द्विजाः स्थापिते वैदिके मार्गे सकलं सुस्थितं भवेत् ५४ यो हि स्थापयितुं शक्तो न कुर्यान्मोहतो नरः त
स्य हंतानपापीयानिति वेदांतनिर्णयः ५५ यः स्थापयितुमुद्युक्तः श्रद्धयैवाक्षमोपि सः सर्वपापविनिर्मुक्तः साक्षात्ज्ञानमवाप्नुयात् यः
स्वविद्याभिमानेन वेदमार्गप्रवर्तकं छलजात्यादिभिर्जीयात्स महापातकी भवेत् ५७ य इमं ज्ञानयोगाख्यं खंडं श्रद्धापुरःसरं पठते सुमु
हूर्तेषु न सम्भयोभि जायते ५८ ज्ञानार्थी ज्ञानमाप्नोति सुखार्थी सुखमाप्नुयात् वेदकामी लभेद्वेदं विजयार्थी जयं लभेत् ५९ राज्यकामो लभेद्रा
ज्यं समाकामः समी भवेत् तस्मात्सर्वेषु कालेषु पठितव्यो मनीषिभिः ६० इति श्रीस्कंदपुराणे सूतसंहितायां ज्ञानयोगखंडे समाधि
नीमविंशोध्यायः सांबसदाशिवार्पणमस्तु संवत् १८० ५१ ॥ ॥

ज्ञानयोगखंडंद्वितीयं २

306

शलै३

स·मु· श्रीगणेशायनमः सौम्यंमहेश्वरंसाक्षात्सत्यविज्ञानमद्वयं वंदेसंसाररोगस्यभेषजंपरमंमुदा १ यस्यशक्तिरुमादेवीजगन्मातात्रयीमयी
१ तमहंशंकरंवंदेमहमायानिवृत्तये २ यस्यविघ्नेश्वरःश्रीमान्पुत्रस्कंदश्चवीर्यवान् तंनमामिमहादेवंसर्वदेवनमस्कृतं यस्यप्रसादलेशस्यले
शलवांशकं लब्ध्वामुक्तोभवेज्जंतुस्तंवंदेपरमेश्वरं ४ यस्यलिंगार्चनेनैवब्यासःसर्वार्थविन्नमः अभवत्तंमहेशानंप्रणमामिगुणनिधिं यस्यमाया
मयंसर्वंजगदीक्षणपूर्वकं तंवंदेशिवमीशानंतेजोराशिमुमापतिं ६ यःसमस्तस्यलोकस्यचेतनाचेतनस्यच साक्षीसर्वांतरःशंभुस्तंवंदेसांबमीश्व
रं यंविशिष्टाजनाःशांतावेदांतश्रवणादिना जानंत्यात्मतयावंदेतमहंसत्यचित्सुखं ८ हरभक्तोहिरण्याक्षःशैवपूजापरायणः अंबिकाचरणस्नेह
ईश्वरांघ्रिपरायणः क्रांतःक्लेशहरःक्लीवईशपूजापरायणः ॐकारवल्लभोलुब्धोलोलुपोलोललोचनः १० महामायोमहाधीमान्महाबाहुर्महे
श्वरः शक्तिमान्शक्तिदःशंकुःशंकुकर्णःशनैश्चरः भगवान्भग्नपापश्चभवोभवभयापहः भगदर्शीभवप्रीतोभागज्ञोभंगुरप्रभः १२ अग्नि
दु वर्णोजपावर्णोबंधूकंकुसुमद्युतिः विरक्तोविरजोविद्वान्वेदपारायणेरतः समचित्तःसमग्रीवःसमलोष्टाश्मकांचनः शाकाशीफलमूलाशीशत्रुमि
त्रविवर्जितः १४ कालरूपःकलामालीकालतत्वविशारदः अणिमांडव्यमुनिश्रेष्ठःसोमनाथप्रियःसुधीः वेदविद्वेदविन्मुख्योविद्वत्पादपरायणः १

विशालहृदयाविश्वोविश्ववान्विश्वदंडभृत् १६ पवित्रःपरमःपंगुःपंकजारुणलोचनः लंबकर्णोमहातेजालंबपिंगजटाधरः ग्रात्यायणसुतो
ग्नीष्मोग्नादभंगपरायणः लोकाक्षितनयोद्भूतोलोकयात्रापरायणः १८ जैगीषव्यस्यपुत्रश्चप्रांतःस्वामीजितेंद्रियः वत्सपुत्रोमुनिश्रेष्ठःशांवं
शकांडप्रभोमुनिः १९ ऊर्ध्वरेताउमाभक्तोरुद्रभक्तश्चवल्कली आश्वलायनसूनुश्चब्रह्मविद्यारतोमुनिः २० मुकुंदोमोचकोमुख्योमु
सलीमूलकारणः सर्वज्ञःसर्वदर्शीचसर्वप्राणिहितेरतः अत्युग्रोतिप्रसन्नश्चप्रमाणज्ञानवर्द्धकः आरुणेयोमहावीरआरुण्युपनिषत्परः
२२ आत्मविद्यारतःश्रीमान्श्वेताश्वतरसूत्रकः श्वेताश्वतरशाखीयःश्रद्धैवप्रवर्तकः शतरुद्रसमाख्यश्चशतरुद्रियभक्तिमान् पंचब्रह्मा
नंदहेतुज्ञःश्रीमत्पंचाक्षरप्रियः २४ शिवसंकल्पभक्तश्चशिवसूक्तप्रवर्तकः लिंगसूक्तप्रियःसाक्षात्कैवल्योपनिषत्प्रियः जाबालाध्यय
नध्वस्तपापपंजरसुंदरः पुराणःपुण्यकर्माचपुरुषार्थप्रवर्त्तकः २६ मैत्रायणश्रुतिस्नेहीमहामैत्रायणोमुनिः बाष्कलाध्ययनप्रीतःशा
कलाध्ययनेरतः सर्वशाखारतःश्रीमान्सामगमादिमहर्षयः द्विःसप्ततिसहस्राणिसहद्वादशसंख्यया २८ सर्वेशमदमोपेताःशिवभ
क्तिपरायणाः अग्निरित्यादिभिर्मंत्रैर्भस्मोद्धूलितविग्रहाः रुद्राक्षमालाभरणास्त्रिपुंड्रांकितमस्तकाः लिंगार्चनपरानित्यंशंभोरमि

सू॰मु॰ ततेजसः ३० सत्रावसाने संभूय मेरुपार्श्वे विचक्षणाः परस्परं समालोच्य श्रद्धया सुचिरं बुधाः मुक्तिं मुक्तेरुपायं च मोचकं मोचकप्रदं त
२ पश्चेरुर्महाधीराः शंकरं मतिसादरं ३२ प्रसादाद्देवरुद्रस्य शिवस्य परमात्मनः व्यासशिष्यो महाधीमान्सूतः पौराणिकोत्तमः आविर्बभू
व सर्वज्ञस्तेषां मध्ये महात्मनां मुनयश्च महात्मानमागतं रोमहर्षणं ३४ दृष्ट्वाश्चर्यान्विसंभ्रांताः संतुष्टा गद्गदस्वराः प्रणम्य बहुशो
भक्त्या दंडवत्पृथिवीतले पादप्रक्षालनाद्यैश्च श्रद्धयाराध्य सत्वरं समाश्वास्य चिरं कालं प्रसन्नं करुणानिधिं ३६ सर्वज्ञं सर्वजंतूनां निश्चि
तार्थप्रदायिनं पप्रच्छुः परमां मुक्तिं मुक्त्युपायं च मोचकं मोचकप्रदमन्यच्च विनयेन सह द्विजाः श्रुत्वा मुनीनां तद्वाक्यं लोकानां हितमुत्तमं ३८
सूतः पौराणिकः श्रीमान्ध्यात्वा सांबं त्रियंबकं वेदव्यासं च वेदार्थपरिज्ञानवतां वरं प्रणम्य दंडवद्भूमौ भक्त्या परवशः पुनः वक्तुमारभते स
र्वसर्वभूतहितेरतः ४० इति श्रीसूतसंहितायां मुक्तिखंडे प्रथमोध्यायः सूत उ॰ शृणुध्वं वेदविन्मुख्याः श्रद्धया सह सुव्रताः पुरा
नारायणः श्रीमान्सर्वभूतहितेरतः किरीटकेयूरधरो रत्नकुंडलमंडितः पीतवासा विशालाक्षः शंखचक्रगदाधरः २ कुंदेंदुसदृशाकारः
सर्वाभरणभूषितः उपास्यमानो मुनिभिर्देवगंधर्वराक्षसैः श्रीमदुत्तरकैलासपर्वते पर्वतोत्तमे स्मरणादेव सर्वस्य पापस्य तु विनाशकं ४

२

अनेकजन्मसंसिद्धैः श्रौतस्मार्तपरायणैः शिवभक्तैर्महाप्राज्ञैरेव प्राप्यं महत्तरं अवैदिकैश्च पापिष्ठैर्वेदनिंदापरैरपि देवतादूषकैरन्यैरप्राप्य
मतिशोभनं ६ अनेककोटिभिः कल्पैर्मया महरुणथवा ब्रह्मनारायणाभ्यां वा न शक्यं वर्णितुं बुधैः प्राप्य साक्षान्महाविष्णुः सर्वलोके
श्वरो हरिः ततापपरमं घोरं तपः संवत्सरत्रयं ८ ततः प्रसन्नो भगवान्भवो भक्तहिते रतः सर्वलोकजगत्सृष्टिस्थितिनाशस्य कारणं सर्व
ज्ञः सर्ववित्साक्षी सर्वस्य जगतः सदा परमार्थपरानंदः परज्ञानघनाद्वयः १० शिवः शंभुर्महादेवो रुद्रब्रह्ममहेश्वरः स्थाणुः पशुपतिर्विष्णुरीशः ई
शान ईश्वरः परमात्मा परः पारः पुरुषः परमेश्वरः पुराणः परमः पूर्णस्तत्वं कालपरागतिः १२ पतिर्देवो हरो हर्ता भर्ता सर्वपुरातनः मह[illegible]वो
महाधार अत्ता विश्वाधिकः संग आत्मा निर्द्वंद्वः प्रत्यगात्मा प्रभुः महर्षिभिर्नतपालोग्निराकाशो हरिरव्ययः प्राणो ज्योतिः पुमान्भीमः अंतर्यामी
सनातनः १४ असरोदहरः साक्षादपरोक्षः स्वयंप्रभुः असंग आत्मा निर्द्वंद्वः प्रत्यगात्मादिसंज्ञितः उमासहायो भगवान्नीलकंठस्त्रिलोचनः
ब्रह्मणा विष्णुना चैव रुद्रेणापि सदा हृदि १६ उपास्यमानः सर्वात्मा सर्ववस्तुविवर्जितः कृपया केवलं विष्णुं विश्वचक्षुर्वृषध्वजः अनुग्र
हाद्ब्रवीद्विशादेवो मधुरया गिरा किमर्थं तप्तवान्विष्णो महाघोरं तपश्चिरं १८ अत्यंतं प्रीतवानस्मि तव तद्दर्शनेन च इत्युक्तः शंकरेण

स्क·मु·
३

सोविष्णुर्विश्वजगन्मयः प्रदक्षिणत्रयंकृत्वादंडवत्पृथिवीतले प्रणम्यबहुशःश्रीमान्भक्त्यापरवशोहरिः २० सांबंशैवंपरानंदंसमुद्वीक्ष्यपुरुषोत्त
मः नेत्राभ्यामागलंपीत्वाकंचित्कालंद्विजर्षभः प्रमत्तःशंकरादन्यंनकिंचिदिदसुव्रताः ततःप्रबुद्धोभगवान्प्रसन्नःकमलेक्षणः अब्रवीद्देवमी
शानंहृष्टात्मात्रिजगत्पतिं भगवन्भगवन्नित्तभव्यज्ञभवानीसखशंकर मुक्तिंमुक्तेरुपायंचमोचकंमोचकंपरं तथैवान्यच्चमेब्रूहिप्रश्नधान
स्यशंकर २४ सूतउ० एवंपृष्टोमहादेवोविष्णुनाविश्वयोनिना विलोक्यदेवीमाह्लादंविकामखिलेश्वरीं २५ प्रहस्यकिंचिद्भगवान्भवानी ८
सहितोहरः प्राहसर्वामरेशानोविष्णवेमुनिसत्तमाः २६ ईश्वरउ० भद्रंभद्रंमहाविष्णोत्वयाष्टंजगद्धितं वरामिसंग्रहेणाहंतच्छृणुश्रद्द
यासह २७ बहुधाश्रूयतेमुक्तिर्वेदांतेषुविचक्षण एकासालोक्यरूपोक्ताद्वितीयाकमलेक्षण २८ सामीप्यरूपासारूप्यात्तृतीयापु
रुषोत्तम अन्यासायुज्यरूपोक्तासुखदुःखविवर्जिता २९ बद्धाविधिक्रियाहीनाशुभाशुभविवर्जिता सर्वद्वंद्वविनिर्मुक्तासत्यविज्ञानरू
पिणी ३० केवलंब्रह्मरूपोक्तासर्वदासुखलक्षणा नहेयानाप्युपादेयासर्वसंबंधवर्जिता नदृष्टानश्रुताविष्णोनचास्वाधानतर्किता सर्वा
वरणनिर्मुक्तानविज्ञेयानिराश्रया ३२ वाच्यवाचकनिर्मुक्तालक्ष्यलक्षणवर्जिता सर्वेषांप्राणिनांसाक्षाद्दासभूतास्वयंप्रभा प्रतिबंधविनि ३

वे
र्मुक्तासर्वदापरमार्थतः अविचारदशायांतुप्रतिवद्धास्वमायया ३४ एषैवपरमामुक्तिःप्रोक्तावेदार्थदर्शिभिः अन्याश्चमुक्तयःसर्वाअवराःपरिकी
र्तिताः जन्मनाशाभिभूताश्चतारतम्येनसंस्थिताः स्पर्धयोपहतानित्यंपरतंत्राश्चसर्वदा ३६ सुखोत्तराअपिश्रेष्ठादुःखमिश्राश्चसर्वदा
एताश्चमुक्तयोन्येषांकेषांचिदधिकारिणां विश्रांतिभूमयःसाक्षान्मुक्तेःप्रोक्ताःक्रमेणवै अत्यंतमुग्धचित्तानांनरणामेताविमुक्तयः ३८ भवंति
विष्णोभोगार्थस्वर्गवत्ताश्चनश्वराः एताश्चबहुधाभिन्नाविद्धिपंकजलोचन काश्चिछंकरसारूप्यरूपाःप्रोक्ताविमुक्तयः काश्चिन्मुकुंदसारू
प्यर प्याःकाश्चिज्जनार्दन ४० ब्रह्मसारूप्यरूपाश्चतथाकाश्चिद्विमुक्तयः ब्रह्मविष्णुमहेशानामवान्तरसमाःस्मृताः ४१ काश्चित्सदाशिवादी
नांरूपेणसदृशाहरे काश्चिदन्यसमाविष्णोमुक्तयःपरिकीर्तिताः ४२ काश्चिछंकरसामीप्यरूपाःप्रोक्ताविमुक्तयः विष्णुसामीप्यरूपाश्चका
श्चिद्विष्णोविमुक्तयः ब्रह्मसामीप्यरूपाश्चतथाकाश्चिद्विमुक्तयः विभूतिरूपसामीप्यरूपाज्ञेयाविमुक्तयः ४४ शिवसालोक्यरूपाश्चका
पा श्चिद्विष्णोविमुक्तयः विष्णुसालोक्यरूपाश्चकाश्चिद्विष्णोविमुक्तयः ब्रह्मसालोक्यरूपाश्चतथातेषांजनार्दन विभूतिरूपसालोक्यरूपाज्ञे
याविमुक्तयः ४६ एवंबहुविधाज्ञेयामुक्तयःपुरुषोत्तम एतास्वमुग्धचित्तानामिच्छानित्यंप्रजायते विशुद्धज्ञानपर्यंतंक्रममुक्तोजनार्दन

सू० मु
४
वांछा विजायते तेषां सिध्यत्येव परा गतिः ४९ अतीव शुद्धचित्तानां प्रसादादेव मे हरे इच्छा सायुज्यरूपायां मुक्तौ सम्यग्विजायते प्रसादहीना
नां साक्षान्मुक्तौ नेच्छा विजायते वेदमार्गैकनिष्ठानां मद्भक्तानां महात्मनां ५० प्रवृत्तिपर्यन्ता श्रद्धा साक्षान्मुक्तौ विजायते सायुज्यरूपा पर
मा मुक्तिर्जीवपरात्मनोः पारमार्थिकतादात्म्यरूपाज्ञाननाशतः मुमुक्षोर्व्यज्यते सम्यगिति वेदान्तनिर्णयः ५२ यस्य स्वभावभूतेयं मुक्तिः
३ साक्षात्सैव हरे अभिव्यक्ता स एवाहमिति मे निश्चिता मतिः यस्य मुक्तिरभिव्यक्ता स्यात्सर्वार्थवेदिनी तस्याप्रारब्धकर्मान्तं जीवन्मुक्तिः
प्रकीर्तिता ५४ स्वतः सिद्धात्मभूताया मुक्तेरज्ञानहानतः अभिव्यक्तेर्महाविष्णो दग्धदग्धवस्त्रवत् प्रपंचस्य प्रतीतस्या जीवनं पु
रुषोत्तम फलोपभोगात्प्रारब्धकर्मणः संक्षये हरे ५६ प्रतिभासो निवर्तेत प्रपंचस्य न संशयः यस्य दृश्यप्रपंचस्य प्रतिभासोपि केशव नि
वृत्तः स्वप्रवत्सोयं मुक्त एव न संशयः भूतपूर्वानुसंधानान्मुक्त इत्युच्यते मया ५८ न स मुक्तो न बद्धश्च न मुमुक्षुर्न चापरः य एव मात्मा ना
त्मानं सुदृढं वेद केशव स एव परमज्ञानी नेतरो मायया हतः एवं जानामि सुदृढमिति यो वेत्ति केशव ६० स मूढ एव संदेहो नास्ति विज्ञानवैभवे केः
मुक्तिस्वभावो वेदान्तैर्मया च परिभाषितुं अशक्यः स्वानुभूत्या च मौनमेवात्र युज्यते मुक्तिरुक्ता मया विष्णो विस्तरस्याश्रद्धया तव ६२
४

त्वमपि श्रद्धया विद्धि श्रेयसे भूयसे सदा सूत उवाच एवं निशम्य भगवान्विष्णुर्वेदार्थमुत्तमं सर्वज्ञं सर्वभूतेशं सर्वभूतिप्रियेरतं महादेवं त्र्यंबकं
भवानीसहितं हरं ६४ प्रणम्य दंडवद्भक्त्या भवं भवहरं शिवं स्तोत्रैः स्तुत्वा महादेवं पूजयामास सुव्रताः ६५ इति श्रीस्कंदपुराणे सूतसंहितायां मु
क्तिखंडे द्वितीयोध्यायः ईश्वर उ० अथातः संप्रवक्ष्यामि मुक्त्युपायं समासतः श्रद्धया सह भक्त्या च विद्धि पंकजलोचन १ आत्मनः परमा मुक्ति
र्ज्ञानादेव न कर्मणा ज्ञानं वेदान्तवाक्यानां महातात्पर्यनिर्णयात् उत्पन्नायो मनोहत्तौ मद्भक्त्या मंतु जेसण अभिव्यक्तं भवेदेतद्धृदि सेवात्मविचार
तः ३ अनेनैवात्मनो ज्ञानमात्मन्येव विलीयते विलीने स्वात्मनो ज्ञाने द्वैतवस्तु विनश्यति ४ द्वैतवस्तुविनाशे च रागो भ्रान्तो भ्रान्तामतिः क्षीयते म
तिनाशे न रागद्वेषौ विनश्यतः तयोर्नाशे महाविष्णो धर्माधर्मौ विनश्यतः धर्माधर्मक्षयाद्देहो विषयाणीन्द्रियाणि च ६ नश्यंत्येव न संदेहो ज्ञा
नादेवमिति श्रुतिः घटज्ञानं यथा लोके विनश्यति तथात्मज्ञानमात्रेण नश्यत्यज्ञानमात्मनः रज्ज्वज्ञानविनाशेन रज्जुसर्पो विनश्यति ८
तथात्माज्ञाननाशेन संसारश्च विनश्यति तस्मादज्ञानमूलस्य संसारस्य क्षयो हरे आत्मनस्तत्त्वविज्ञानात्तत्त्वं ब्रह्मैव केवलं यथा सर्पेदमंशस्य
तत्त्वं दंडादि केवलं १० अस्य संसारिणस्तत्त्वं तथा ब्रह्मैव केवलं अज्ञानमूलं कर्त्रादिकारकज्ञाननिर्मितं अज्ञानबाधकं कर्म न भवेद्बुजे सण
नात्मपयज्ञा

स०सू०
५

कर्मणा परमा मुक्तिर्यदि सिध्यति केशव १२ सा विनश्यत्यसंदेहः स्वर्गलोको यथा तथा तस्मान्न कर्मणा मुक्तिः कल्पकोटिशतैरपि कर्मणैवापरा
मुक्तिर्न ज्ञानादेव केवलात् तत्र कर्म द्विधा विद्धि विज्ञानी हि विचक्षण १४ एकं कर्मान्तरं वा स्यादपरं पंकजेक्षण वाचिकं कायिकं वा स्यात्कर्म
मानसमान्तरं १५ तत्र सर्वं परं ब्रह्म न चान्यदिति यः पुमान् उपास्ते श्रद्धया नित्यं स सम्यक्ज्ञानमाप्नुयात् १६ यः पुमान्देवदेवेशं त्रिनेत्रं चन्द्रशे
खरं उमार्द्धविग्रहं शुद्धं नीलग्रीवं महेश्वरं ब्रह्मविष्णुमहादेवैरुपास्यं गुणमूर्तिभिः उपास्ते तस्य विज्ञानं जायते पारमेश्वरं १८ अथवा चित्तका
लुष्याच्छिवसारूप्यमच्युत लब्ध्वा भुक्त्वा महाभोगानन्ते विज्ञानमैश्वरं लब्ध्वा तेन महाविष्णो माप्नोति परं गतिं यः शिवं गुणमूर्तीनामुपास्ते श्रद्धया स
ह २० स लब्ध्वा रुद्रसारूप्यं ... मा ज्ञानेन मुच्यते यो रुद्रस्यापरं मूर्तिमुपास्ते श्रद्धया सह स लब्ध्वा रुद्रसारूप्यं भुक्त्वा भोगानतिप्रियान्
चित्तपाकानुगुण्येन शिवसारूप्यमेव च ... शिवसायुज्यमाप्नोति शिवज्ञानेन केशव अस्यैतापरमां मूर्तिं यः पुमानीश्वरस्य तु उपास्ते रुद्रसा
लोक्यं स लब्ध्वा पुरुषोत्तम भुक्त्वा भोगान्क्रमाद्विष्णो रुद्रसारूप्यमेव च २४ रुद्रसामीप्यमन्यद्वा सायुज्यं विपर्ययात् अथवा विष्णुलोकान्त
वाप्य पुरुषोत्तम रुद्रसामीप्यमन्यद्वा सालोक्यं लभते पुमान् तत्रैव महाभोगानवाप्य कमलेक्षण पृथिव्यां जायते शुद्धे ब्राह्मणानां कुले नरः ५
तत्र तुया

२६ यः पुमान्श्रद्धया नित्यं त्वामुपास्ते जनार्दन स शुद्धचित्तस्त्वां विष्णो मत्यकालेन मामपि भुक्त्वा भोगान्पुनर्ज्ञानं लब्ध्वा मुक्तो भवेन्नरः अथवा
चित्तवैकल्याद्विष्णुसारूप्यमेव वा २८ विष्णुसामीप्यमन्यद्वा विष्णुसालोक्यमाप्नुयात् यस्तवापरमां मूर्तिमुपास्ते श्रद्धया नरः तवसामीप्य
माप्नोति क्रमेणैव विमुच्यते अस्यैतापरमां मूर्तिं य उपास्ते तवाच्युत ३० स लब्ध्वा तव सालोक्यं पुनः सामीप्यमेव च सारूप्यं वा पुनश्चित्तपरिपाका
नुकूलतः मामवाप्य परिज्ञानं लब्ध्वा तेन प्रमुच्यते अथवा चित्तकालुष्याद्ब्रह्मादिभवनं गतः ३२ तत्र भुक्त्वा महाभोगान्क्रमाद्भोविज्ञा
यते यः पुमान्हृदये नित्यं ब्रह्माणं पंकजेक्षण अक्षमालाधरं शुभ्रं कमंडलुकरांबुजं वरदाभयहस्तं च वाचा सहितमीश्वरं ३४ उपास्ते ब्रह्म
सारूप्यं स प्राप्नोति पुरुषोत्तम विशुद्धचित्तश्चेन्मर्त्यस्ततामवाप्य ततः परं माप्यमामद्वयं ज्ञानं लब्ध्वा तेन प्रमुच्यते अथवा पक्वचित्तश्चेद्ब्रह्मलोके म
हासुखं ३६ भुक्त्वा भूमौ महात्मा नः सदाचारवतां कुले जायते सर्वभावेन ब्रह्मध्यानरतो भवेत् ब्रह्मणोऽपरमां मूर्तिं य उपास्ते जनार्दने ब्रह्मसा
रूप्यमाप्नोति नात्र कार्या विचारणा ३८ विशुद्धहृदयो मर्त्यः क्रमान्मां प्राप्नुयाद्धरे अविशुद्धो विजायेत क्रमेण वसुधातले अस्यैतां परमां मूर्तिं
ब्रह्मणः परमेष्ठिनः य उपास्ते स सालोक्यं याति शुद्धस्तु मुच्यते ४० अशुद्धो जायते भूमौ क्रमाद्भुक्त्वा महासुखं यो देवतान्तरं नित्यमुपास्ते श्रद्धया

सह चिन्तयाकानुगुण्येनमत्युत्कर्षबलेनच सालोक्यादिपदंलब्ध्वापुनर्ब्रह्मपदंहरे ४२ लब्ध्वाविष्णुपदंवापिममरूपंमहत्तरं ततोलब्ध्वामम
ज्ञानंतेनमुच्यतेबंधनात् अथवामलिनस्तत्रभुक्त्वाभोगाननेकशः भूमौविजायतेमर्त्यःसत्यमेवनसंशयः ४४ सर्वंमन्निवृष्णुमांबुध्वाश्रद्धयापरया
सह यत्रयास्तेमहाविष्णोर्मूर्त्युत्कर्षक्रमेणतु चिंतयाकानुगुण्येनहरेश्शीघ्रंक्रमेणतु अवाप्यपरमांस्तुर्निर्ममसर्वेश्वमानरः ४६ लब्ध्वामत्तःशि
वज्ञानंतेनयातिपरांगतिं एवमेवक्रमाद्विष्णोर्नरोवासेनकर्मणा मामवाप्यशिवज्ञानंलब्ध्वातेनप्रमुच्यते अविशुद्धोपिवासेनकर्मणात
त्तत्वतु ४८ सालोक्यादिपदंलब्ध्वापुण्यकर्मक्षयेपुनः भूमौविजायतेपश्चात्कुरुतेकर्मपूर्ववत् वासेनकर्मणामुक्तिःक्रमात्कालेन
सिध्यति अंतरेणचिरादेवकर्मणामुक्तिरच्युत ५० यथांतरोपचारेणनराणांवल्लभास्त्रियः तथांतरेणध्यानेनवल्लभाममजंतवः
वासेकर्ममहाविष्णोर्ज्ञानेछोत्साहकंभवेत् त्यागश्चकर्मणानंदन्महाविष्णोसमाश्रयः ५२ इहैवसमकुज्ञानांगमित्येषाशाश्वतीश्रुतिः वा
राणस्यादिकेस्थानेविशिष्टेपारमेश्वरे वर्तनंकेवलंविष्णोनराणांमरणात्परं सम्यग्ज्ञानप्रदंदिव्यंसत्यमुक्तंजनार्दन ५४ नित्यंद्वादश
साहस्रंप्रणवंयोजपत्यसौ मत्समारुप्रमज्ञानंमरणादूर्ध्वमाप्नुयात् श्रीमत्पंचाक्षरंमंत्रंप्रणवेनषडक्षरं नित्यंद्वादशसाहस्रंयोजपेद्ध ६

द्धयासह ५६ सपुनर्मरणादूर्ध्वंममज्ञानंममहत्तरं मत्तोलब्ध्वापरांमुक्तिंतेनयातिनसंशयः यःपुमान्शतरुद्रीयंजपतिश्रद्धयासह दिनेदि
नेमहाविष्णोमरणादूर्ध्वमीश्वरं ५८ ज्ञानंलब्ध्वासविज्ञानादेवयातिपरांगतिं यानिकर्माणिवाख्यानिमरणादूर्ध्वमच्युत ममज्ञानप्रदानीति
कथितानिमयातव तानिकल्याणवृत्तस्यविद्धिनान्यस्यकस्यचित् ६० पापिष्ठानामपिश्रद्धाविहीनानांजनार्दनमुक्तिदंमरणादूर्ध्वंशि
वक्षेत्रैकवर्तनं पुराकोलाहलोनाम्नावृषलोविधिचोदितः निहत्यस्वगृहेस्वस्यपितरंपंकजेक्षण ६२ हत्वामातरमाराध्यगत्वामोहेनकेश
व वेदारण्येयथाकामंचरित्वामरणंगतः ६३ तत्रवर्तनमात्रेणसपुनःपुरुषाधमः मनुष्यायःपुरात्मावेदारण्येवनोमम ६४ प्रसादादेव
वेदांतज्ञानंलब्ध्वामत्तोभवत् तस्माद्धिमुक्तिकामानांविशिष्टेषुजनार्दन शिवक्षेत्रेषुमद्भक्त्यावर्तनंकेवलंपरं स्मृतं ६५ एवंमहेश्वरेणोक्तंनि
शम्यपुरुषोत्तमः ६६ प्रणम्यपरयाभक्त्यापप्रच्छेदंपुनर्द्विजाः विष्णुरुः वेदारण्यस्यमाहात्म्यंश्रोतुमिच्छामिशंकर तदद्यभगवन्ब्रू
हिममकारुण्यविग्रह ईश्वर उ० वदामितवविष्णोद्यवेदारण्यस्यवैभवं ६८ अतीवश्रद्धयासार्धंशृणुसर्वंजगद्धितं श्रीमहालक्ष्मीकर
ज्ञस्यममस्थानस्यदक्षिणे समुद्रतीरेमद्भक्तैरखिलैराहतंसदा पुरासर्गेमहाविष्णोमलयेविलयंगते ७० मयिसंस्काररूपेणस्थितावेदाःसना

स्क॰ पु॰ ततः कल्पादिरर्वं वन्मत्रः प्रसन्नाविमलाः पुनः समस्तलोकरक्षार्थं हरेर्भक्त्वा शरीरिणः श्रद्धयासहितः श्रीमद्वेदारण्यं महत्तरं ७२ अ
७ वाप्य वेदतीर्थाख्ये समुद्रे संस्थिते हरे अर्द्धयोजनविस्तीर्णे पादयोजनमायते स्नानं कृत्वार्कवारे च सदा पर्वणि केशव ७३ जयामासुरीशा
नं श्रीवेदारण्यनायकं ७४ श्रीवेदारण्यनाथोपि सहदेव्या जनार्दन प्रसादमकरोत्तेषां वेदनाम्बिकापतिः स्कन्दश्च प्रसुतस्तस्मिंस्तीर्थे ली
स्नात्वा महत्तरे श्रीवेदारण्यनाथाख्यं समाराध्य प्रसादतः निहत्य तारकं विप्रो महावीर्यपराक्रमं प्रददौ सर्वलोकानां परमं सुखमच्युत ना
रदो मुनिरत्रैव स्नात्वा पर्वणि शंकरं श्रीवेदारण्यनाथाख्यं श्रद्धया परया सह ७८ समाराध्याप्तविज्ञानं संसारच्छेदकारणं सनत्कुमारस्त
वैज्ञाप्तवानं बुजेस्रेण याज्ञवल्क्यो मुनिस्तत्र स्नात्वा तीर्थे महत्तरे वेदारण्येश्वरं भक्त्या मातुः काले दतीपे समाहितः ८० पर्वण्याराध्य तस्ये
८ वप्रसादेवकेवलात् योगीश्वरो भवद्धीमान चिरादेव केशव तथा गार्गी च मैत्रेयी तत्र तीर्थे महत्तरे वेदतीर्थाभिधे स्नानं कृत्वा पर्वणि केशव ८२
श्रीवेदारण्यनाथाख्यं शंकरं लिंगरूपिणं प्रदक्षिणत्रयं कृत्वा प्रणम्य वसुधातले प्रसादादेव तस्यैव ज्ञानयोगं विमुक्तिदं अचिरादेवसर्वज्ञा
याज्ञवल्क्याद्वाप्नुतः ८४ श्वेतकेतुर्मुनिस्तत्र स्नानं कृत्वा बुजेस्रेण प्रदक्षिणत्रयं कृत्वा वेदारण्याधिपं हरं प्रणम्य दंडवद्भूमौ भक्त्या परमया ७

सह पितुरुद्दालकात्साक्षादात्मविज्ञानमच्युत ८६ अवोप सर्वसंसारकारणाज्ञाननाशकं वरुणो वेदतीर्थेस्मिन्पर्वणि श्रद्धया सह स्नानं कृत्वा
महादेवं श्रीवेदारण्यनायकं समाराध्य प्रसादेन प्राप्तवानात्मदर्शनं ८८ तस्य पुत्रोऽभृगुस्तस्मिंस्तीर्थे स्नात्वा महत्तरे वेदारण्याधिपं देवं वेदवेदां
तनायकं दृष्ट्वा प्रदक्षिणीकृत्य श्रद्धयाराध्य शंकरं प्रसादात्तस्य विज्ञानं ब्रह्मात्मैक्यप्रकाशकं ९० अपरोक्षं पितुर्लेभे वरुणाद्भृगुसत्तमः त्रि
शंकुर्वेदतीर्थेस्मिन् श्रद्धया सह पर्वणि स्नानं कृत्वा महादेवं वेदारण्याधिपं हरं प्रदक्षिणत्रयं कृत्वा प्रणम्य वसुधातले ९२ लेभे परमविज्ञानं सुदृढं
सर्वदुःखनुत वहवो वेदतीर्थेस्मिन्वेदारण्ये तिशोभने स्नानं कृत्वांबिकानाथं श्रीवेदारण्यनायकं॥
दृष्ट्वा प्रदक्षिणीकृत्य ब्रह्मविज्ञानमच्युतः ९४ अवापुर्वेदजं तस्य प्रसादादेव मुक्तिदं अत्र भूमिप्रदः साक्षाद्ब्रह्मलोके महीयते आवास भू
मिदो रुद्रपदमाप्नोत्यसंशयं धनधान्यप्रदो मर्त्यो धनदेन समो भवेत् ९६ अन्नदानपरः श्रीमान्नरोगी भवति ध्रुवं तिलदानान्महापापान्मु
च्यते नात्र संशयः कन्यादानेन वै विप्रो चक्रवर्ती लोकमाप्नुयात् वस्त्रदानेन देवेशो भवत्येव न संशयः ९८ विषुवायनकालेषु ग्रहणे सोमसूर्य
योः व्यतीपाते तथा पर्वण्यार्धयामिंदुवारके स्नात्वा यो वेदतीर्थेस्मिन् श्रद्धया परया सह प्रदक्षिणत्रयं कृत्वा वेदारण्याधिपं शिवं १०० प्रणम्य

सू॰मु॰ दंडवनस्तैमदत्त्वादीयमच्युत भिक्षमात्रं धनं दत्त्वा श्रद्धया शिवयोगिने उपवासं करोत्यत्र समुक्तो नात्र संशयः सुमुहूर्ते सुयत्नेन स्नात्वा र
८ द्भामहेश्वरं १०२ शिवयोगिकरे दत्त्वा पणमात्रं धनं मुदा ब्रह्महत्यादिभिः पापैर्मुच्यते नात्र संशयः अत्रैव मरणं प्राप्तो विमुक्तो भवति
ध्रुवं सर्वरोगहरं स्थानमिदं भक्तिमतां नृणां ५ मया च मम देव्या च मम भक्तैर्महत्तमैः पूजितं पुण्यदं स्थानमेतद्भुक्तिविमुक्तिदं मु
न्युपायो मया प्रोक्तः सर्ववेदांतसंग्रहः श्रद्धाहीनाय मर्त्याय न देयोयं त्वयाच्युत ६ सूत उ॰ इति माहेश्वरं वाक्यं निशम्य कमलेक्षणः
प्रणम्य देवमीशानं परितुष्टो भवद्धरिः १०७ इति सूतसंहितायां मुक्तिखंडे तृतीयोध्यायः ईश्वर उवाच अथातः संप्रवक्ष्यामि मो
चकं पुरुषोत्तमं श्रद्धया च महाभक्त्या विद्धि वेदैकदर्शितं पुरा सरस्वती देवी सर्वविद्यालया शुभा अकारादिक्षकारांतैर्वर्णैः रत्नैर्निर्म
लैः २ आविर्भूतस्वरूपा श्रीज्ञानमुद्राकराघरा अक्षमालाधरा हेमकमंडलुकरांबुजा सर्वज्ञानमहारत्नकोशपुस्तकधारिणी कुं
देंदुसदृशाकारा कुंडलद्वयमंडिता ४ प्रसन्नवदना दिव्या विचित्रकरकोज्वला जटाजूटधरा मुग्धा चंद्रार्धकृतशेखरा पुंडरीकस
मासीना नीलग्रीवा विलोचना सर्वलक्षणसंपूर्णा सर्वाभरणभूषिता ६ उपास्यमाना मुनिभिर्देवगंधर्वराक्षसैः मामपृच्छदिदं भक्त्या ८

प्रणम्य भुवि दंडवत् ७ अहं च परया युक्तः कृपया पुरुषोत्तम अवोचं मोचकं देव्यै हिताय अखिलदेहिनां ८ ब्रह्माद्याः स्थावरांताश्च पशवः परिकीर्ति
ताः तेषां पतिरहं देवः स्मृतः पशुपतिर्बुधैः मायापाशेन बध्नामि पशूनेतान्स्वरस्वति तेषां पशूनां सर्वेषां मोचकोहं सुलोचने १० मामेव मोचकं प्राह
श्रुतिः साध्वी सनातनी श्रुतिर्वरीयसी प्रोक्ता प्रमाणानां सुलोचने स्वतश्च परतो दोषो नास्ति तस्याः कदाचन अन्येषामप्रज्ञादीनां प्रमाणानाम
विद्यया १२ दोषसंभावनास्त्येव ततस्तेषां सुलोचने विरोधे वेदवाक्येन प्रामाण्यं नैव सिध्यति स्मृतयश्च पुराणानि भारतादीनि सुंदरि वेदमू
लान्यतस्तेन विरोधे मूलिनामपि १४ न सिध्यत्येव सुश्रोणि प्रामाण्यं सूक्ष्मदर्शने पंचरात्रादिमार्गाणां वेदमूलत्वमास्तिके नहि सत्यं तथास्ते तेन भ्रां
तिमूलानि सुव्रते तथापि येंशे मार्गाणां वेदेन न विरुध्यते १६ सोंशः प्रमाणमित्युक्तं केषांचिदधिकारिणां अत्यंतगलितानां तु मार्गाणां वेदमार्गतः
कार पंचरात्रादयो मार्गाः कालेनैवोपकाः तांत्रिकाणामहं देवि न लभ्यो व्यवधानतः १८ कालेन देवतामात्रिद्वारेणै ब्राह्मास्तिके लभ्यो वेदैकनिष्ठाना
महमव्यवधानतः तत्रापि कर्मनिष्ठेभ्यो ज्ञाननिष्ठस्य सुंदरि लभ्योनज्ञानिनां लभ्यस्तेषामात्मैव केवलं २० सर्वेषामात्मभूतोहमेवं संसार
मोचकः न मत्तोन्यः पुमानस्ति इत्येषा शाश्वती मामृते सांबमीशानं मोचकोन्यो न विद्यते अहमप्राप्तसंसारः सर्वज्ञश्च स्वभावतः २२ मदन्ये
श्रुतिः

स॰सु॰ स्वात्मविज्ञानविहीनामायया वृताः सदा संसारिणो मोऽध्याः प्रकृतिः केवलं जडा तस्मात्त्वत्तो नां सर्वेषामहं संसारमोचकः नमत्तोऽन्यः पुमान्सत्यमि
९ त्येषा शाश्वती श्रुतिः २४ एवं निशम्य महद्वाक्यं महाविद्यो सरस्वती पूजयामास तं भक्त्या जगन्माता त्रयीमयी त्वमप्यस्यं तत्कल्याणि मद्भक्तश्च वि
शेषतः त्वया नास्ति समः कश्चिल्लोके विद्यो महामते २६ तस्माद्देवमया मोक्तस्त्वं संसारमोचकः वेदमार्गैकनिष्ठानां धार्मिकाणां ममा
त्मनां मद्भक्तानां विशुद्धानां द्विजानां मंत्रजेक्षणं मयोक्तोऽर्थस्त्वया देयो न देयो यस्य कस्यचित् २८ सूत उ० एवं निशम्य गुरुणोत्तम आदि
भूतं नंदवाःसहायममलेंदुकलावतंसं सर्वामरैरखिलयोगिभिरर्चनीयं संसारमोचक इति प्रतिपद्य भक्त्या न त्वापरापरविभागविहीनबो
धसत्यात्मतादयशिवाभिधसर्वनाथं रुद्रं त्वागीरं परवरेण्य भवदंबुजाक्षः शिरसा नतं शिवकरं शिवमादरेण ३० सूत उ० शृणुध्वमन्यद्दस्या
विमोचकत्वमसाधकं श्रद्धया सहितास्त्वसंमुनयो मुनिसत्तमाः पुरा कश्चिद्द्विजश्रेष्ठः श्रद्धया कर्म वैदिकं कृत्वा परं ग्रथया पस्तविशुद्धहृदयो भृशं
भीतो जन्मविनाशाभ्यामतीव मुनिपुंगवाः क्रमेण सकलान्देवान्स्व संसारविमोचकान् मत्वाराध्य पुनः सर्वान् जन्मनाशहतानिमान् परित्य
ज्य विचारेण भगवंतं त्रिलोचनं ३४ प्रलंबितजटाबद्धचंद्ररेखावतंसकं नीलग्रीवं शरच्चंद्रचंद्रिकाभिर्विराजितं गोक्षीरधवलाकारं चंद्रबिं ९

बसमाननं सुस्मितं सुप्रसन्नं च स्वात्मतत्त्वैकसंस्थितं ३६ गंगाधरं शिवं शांतं लसत्केयूरमंडितं सर्वाभरणसंयुक्तं सर्वलक्षणसंयुतं ३७
वीरासने समासीनं वेदयज्ञोपवीतिनं भस्माधारणभिरम्यं तं नागाभरणभूषितं ३८ व्याघ्रचर्मांबरं मुद्रं योगपट्टावृतं शुभं सर्वेषां प्राणिनामात्मा
ज्ञानापस्मारपृष्ठतः विन्यस्तचरणं सम्यग्ज्ञानमुद्राधरं हरं सर्वविज्ञानरत्नानां कोशभूतं सुपुस्तकं ४० दधानं सर्वतत्त्वाक्षमालिकां कुं
डिकामपि स्वात्मभूतपरानंदपरशक्त्यार्धविग्रहं धर्मरूपवृषोपेतं धार्मिकैर्वेदपारगैः मुनिभिः संवृतं मायावटमूलाश्रितं शुभं ४२
ईशानं सर्वविद्यानामीश्वरेश्वरमव्ययं उत्पत्त्यादिविनिर्मुक्तमोंकारकमलासनं स्वात्मविद्याप्रदानेन सदा संसारमोचकं रुद्रं परमका
रुण्यात्सर्वप्राणिहिते रतं ४४ उपासकानां सर्वेषामभीष्टसकलप्रदं दक्षिणामूर्तिदेवाख्यं जगत्सर्गादिकारणं समागत्य महाभक्त्या
दंडवत्पृथिवीतले प्रणम्य बहुशो देवं समाराध्य यथाबलं ४६ रुद्र यत्ते मुखं तेन दक्षिणं पाहि मामिति उक्त्वा पुनः पुनर्देवं पूजयामास भ
क्तितः पुनर्देवो महादेवो दक्षिणामूर्तिरीश्वरः प्रदत्त्वा स्वात्मविज्ञानं तस्मै विमाय सुव्रताः ४८ तस्य संसारविच्छेदमकरोदंबिकापतिः
बहवो दक्षिणामूर्तिप्रसादादेव जंतवः अनायासेन संसाराद्विमुक्ताः परमर्षयः भवंतोऽपि महादेवं महानंदस्वरूपिणं ५० संसारमो

सू॰मु॰ चक्रं बुध्वा भजध्वं सर्वभावतः अस्यैव भजनादेव सर्वे सिध्यत्यसंशयं इति श्रुत्वा द्विजाः सर्वे श्रद्धया परया सह मरणम्यस्नं सर्वज्ञं रजया
१० मासुरद्भुतं ५२ इति श्रीसूतसंहितायां मुक्तिखंडे चतुर्थोऽध्यायः ईश्वर उ॰ अथातः संप्रवक्ष्यामि नितरां मोचकं परं अनाचश्रद्धया सार्द्धं शृणु
पंकजलोचन आचार्य एव संसारमोचकः पर उच्यते आचार्यो नाम वेदान्तविचारेणाप्तवेदनः २ तमप्यनेकधा विद्धि श्रेष्ठ्यात्पुरुषोत्तम उ ६
त्तमो मध्यमस्तद्वदधमश्चांबुजेक्षण उत्तमो ब्राह्मणः प्रोक्तो मध्यमः क्षत्रियस्तथा अधमो वैश्य इत्युक्तः सर्वशास्त्रार्थवेदिभिः ४ अधमो
च्युत वैश्यस्य शूद्रस्यापि गुरुर्भवेत् मध्यमो मध्यमस्यापि तत्पावैश्यस्य केशव शूद्रस्यापि गुरुः प्रोक्तः शुश्रूषोरात्मवेदिभिः उत्तमो ब्राह्म
णस्यापि क्षत्रियस्य तथैव च ६ विशां शूद्रस्य शुश्रूषोर्गुरुरित्युच्यते मया शूद्राणां च तथा स्त्रीणां गुरुत्वेन कदाचन वैश्यस्यापि तथाऽ
ज्ञो विद्योत्कर्षबलेन च गुरुत्वं केचिदिच्छन्ति स्वोत्तमं प्रति केशव ८ उत्तमः पंचधा प्रोक्तो गुरुर्ब्रह्मात्मवेदिभिः ब्रह्मचारी गृहस्थश्च
वानप्रस्थश्च भिक्षुकः अतिवर्णाश्रमी चेति क्रमात्श्रेष्ठा विचक्षण अश्रेष्ठानां हरे श्रेष्ठा गुरवः परिकीर्तिताः १० ब्रह्मचारी गृहस्थस्य
वनस्थस्य यतेरपि विद्योत्कर्षबलेनैव गुरुर्भवति नान्यथा गृहस्थोपि वनस्थस्य यतेरप्यंबुजेक्षण विद्योत्कर्षबलेनैव गुरुर्भवति १०

नान्यथा १२ वानप्रस्थाश्रमस्थोपि तथा संन्यासिनां हरे विद्योत्कर्षबलेनैव गुरुर्भवति नान्यथा अतिवर्णाश्रमी प्रोक्तो गुरुः सर्वाधिकारिणां
न कस्यापि भवेच्छिष्यो यथाहं पुरुषोत्तम १४ अतिवर्णाश्रमी साक्षाद्गुरूणां गुरुरुच्यते तत्समो नाधिकश्चास्मिं लोकेस्त्येव न संशयः यः शरी
रेंद्रियादिभ्यो विभिन्नं सर्वसाक्षिणं पारमार्थिकविज्ञानसुखात्मानं स्वयंप्रभं १६ परतत्वं विजानाति सोतिवर्णाश्रमी भवेत् यो वेदा
न्तमहावाक्यश्रवणेनैव केशव आत्मानमीश्वरं वेद सोतिवर्णाश्रमी भवेत् योवस्थात्रयनिर्मुक्तमवस्थात्रयसाक्षिणं १८ महादेवं वि
जानाति सोतिवर्णाश्रमी भवेत् वर्णाश्रमादयो देहे मायया परिकल्पिताः नात्मनो बोधरूपस्य मम ते संति सर्वदा इतियो वेद वेदान्तैः
सोतिवर्णाश्रमी भवेत् २० आदित्यसन्निधौ लोकश्चेष्टते स्वयमेव तु तथा मत्संनिधावेव चेष्टते सकलं जगत् २१ इतियो वे॰ सुवर्णे
हाटकेयद्वत्कटकस्वस्तिकादयः २२ कल्पिता मायया तद्वज्जगन्मय्येव सर्वदा इतियो वेद वे॰ २३ शुक्तिकायां यथा तारं कल्पितं मा
यया तथा महदादिजगन्मायामयं मय्येव कल्पितं २४ इतियो वेद वेदां॰ चंडालदेहे पश्वादिशरीरे ब्रह्मविग्रहे अन्येषु तारतम्येन स्थि
तेषु पुरुषोत्तमः व्योमवत्सर्वदा व्याप्तः सर्वसंबंधवर्जितः २६ एकरूपो महादेवः स्थितः सोहं परामृतः इतियो वेद वेदान्तैः सोतिवर्णाश्र

सू॰ मु॰ मीभवेत् २७ विनष्टदिग्भ्रमस्यापि यथापूर्वं विभाति दिक् तथा विज्ञानविध्वस्तं जगन्मे भाति तन्नहि २९ इति वेद वेदं० यथा स्वप्नप्रपं
११ चोयं मयि मायाविजृंभितः तथा जाग्रत्प्रपंचोपि परमायाविजृंभितः इति यो वेद वेदं० ३० यस्य वर्णाश्रमाचारो गलितः स्वात्मदर्शना
त् स वर्णानाश्रमान्सर्वानतीत्य स्वात्मनि स्थितः ३१ योतीत्य स्वाश्रमान्वर्णानात्मन्येव स्थितः पुमान् सोतिवर्णाश्रमी प्रोक्तः सर्व
वेदांतवेदिभिः ३२ न देहो नेंद्रियं प्राणो न मनो बुद्ध्यहंकृती न चित्तं नैव माया च न व्योमादिकं जगत् न कर्ता नैव भोक्ता च न च भोजयिता तत न च
था केवलं चित्सदानंदब्रह्मैकात्मा यथार्थतः ३४ जलस्य चलनादेव चंचलत्वं यथा रवेः तथाहंकारसंबंधादेव संसार आत्मनः ३५
तस्मादन्यगता वर्णा आश्रमा अपि केशव आत्मन्यारोपिता एव भ्रांत्या ते नात्मवेदिनः ३६ न विधिर्न निषेधश्च न वर्ज्यावर्ज्यकल्पना
आत्मविज्ञानिनामस्ति तथा नान्यज्जनार्दन आत्मविज्ञानिनो निष्ठामीदृशीं मनुजेश्वर मायया मोहिता मर्त्या नैव जानंति सर्वदा ३९
न मांसचक्षुषा निष्ठा ब्रह्मविज्ञानिनामियं दृष्टुं शक्या स्वतः सिद्धा विदुषामेव केशव यत्र सुप्ता जना नित्यं प्रबुद्धस्तत्र संयमी प्रबुद्धा यत्र ते विद्वा
न्सुषुप्तस्तत्र केशव ४० एवमात्मानमद्वंद्वं निर्विकल्पं निरंजनं नित्यशुद्धं निराभासं संविन्मात्रं परामृतं यो विजानाति वेदांतैः स्वानुभू ११

त्या च निश्चितं सोतिवर्णाश्रमी नाम्ना स एव गुरुरुत्तमः ४२ स एव वेदवित्तमः स एव मोचकः परः स एव सर्वमोचकः स एव सर्वकारणः स एव सर्व
विद्वन् स एव मुक्तिरुत्तमा स एव सर्वमुक्तिदः स एव सर्वमच्युतः ४४ इति तव परमार्थः सर्ववेदांतसिद्धः सकलमुनिवराणां देवतानां च गम्यं
परमपुरुषसाक्षान्मुक्तिसिद्ध्यै मयोक्तः परमकरुणयैव प्रार्थितेन त्वयैव ४५ सूत उ० एवं निशम्य भगवान्वासुदेवो जगन्मयः सस्मार चर
णद्वंद्वं शिवस्य परमात्मनः ४६ विन्यस्य ब्रह्मविज्ञानं वेदांतोक्तं विमुक्तिदं लब्ध्वा भक्तो महाभक्त्या विवशो गद्गदस्वरः प्रणम्य बहुशः श्री
मान्सलिलार्द्रसुलोचनः कृतार्थो भवदीशानप्रसादादेव सुव्रताः ४८ भवंतोपि द्विजा एवं श्रद्धया मोचकं परं विदित्वा तस्य शुश्रूषां कुरुध्वं
यत्नतः सदा यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ तस्यैते कथिता ह्यर्थाः प्रकाशंते महात्मनः ५० इति श्रीसूतसंहितायां मुक्तिखंडे पंचमोध्या
यः ५ ईश्वर उ० अथातः संप्रवक्ष्यामि ज्ञानानुत्पत्तिकारणं शृणु त्वं श्रद्धया युक्तः परिहाराय केशव शिवद्रोहस्तु विज्ञानानुत्पत्तेर्मूलकार
णं शिवभक्तापराधश्च शिवज्ञानस्य कारणं त्रिपुंड्रोद्धूलनद्वेषस्तदनुष्ठानवर्जनं रुद्राक्षधारणाभावो ज्ञानानुत्पत्तिकारणं तद्वद्दो
हस्त्वदीयानां प्रद्वेषश्च जनार्दन त्वदीयधनवांछा च ज्ञानानुत्पत्तिकारणं ४ ब्रह्मद्रोहस्त्वदीयानां प्रद्वेषश्च जनार्दन त्वदीयधनवांछा च ज्ञा

स्क० मु०
१२

नानुत्पत्तिकारणं कामक्रोधश्च लोभश्च मोहो दंभस्तथैव च आलस्यमपि मात्सर्यं ज्ञानान्नु० ६ धर्माधर्मेश्वरास्तित्वे संदेहश्च तथैव च
तेषामभावबुद्धिश्च ज्ञाना० ७ मातृसंरक्षणाभावो मातृद्रोहश्च केशव मातृसंतापकारित्वं ज्ञाना० ८ वेदवेदांतविद्वेषस्तदध्ययनवर्ज
नं श्रोत्रियस्यापराधश्च ज्ञाना० ९ वेदांगानां च विद्वेषः स्मृतीनां च तथैव च पुराणानां च विद्वेषो भारतस्य तथैव च १० तेषामध्येतृ
विद्वेषस्तेषां बाधं च केशव तेषामर्थापहारश्च ज्ञाना० ११ वामपाशुपतादीनामश्रौतानां परिग्रहः पांचरात्राश्रयश्चापि ज्ञाना०
१२ शिष्टानामसदारोपः शिष्टसंसर्गवर्जनं अशिष्टता च मद्भक्ते ज्ञाना· १३ दुर्जनैरपि संसर्गो दुर्जनानां च पोषणं दुर्जनत्वं च भक्ता
यज्ञाना० १४ पितृद्रोहश्च शुश्रूषाभावस्तस्य तथैव च पितृसंतापकारित्वं ज्ञाना० १५ गवां संरक्षणाभावो गवां हिंसा तथैव च गोप्रचा
रस्थले बाधो ज्ञाना० १६ प्राणिसंचारमार्गस्य निरोधस्तस्य बाधनं तत्र कंटकनिक्षेपो ज्ञाना० १७ हरिवासरे तैलक्षौरगृहमासस्य वर्जनं ५
तद्रक्षाकरणं चापि ज्ञाना० १८ वापीकूपतडागादिबाधस्तज्जलदूषणं तथा तज्जलचौर्यं च ज्ञाना० १९ व्याघ्रचौरादिभीतस्य रक्षणाकर
णं तथा साधूनां भयकारित्वं ज्ञाना २० वश्याकर्षणविद्वेषस्तंभोच्चाटनकारिता अभिचारक्रिया चापि ज्ञाना० २१ असद्वृत्तविनोद १२

दू

श्च नृत्यगीतेषु मोहनं अपशब्दप्रयोगश्च ज्ञाना० २२ वर्णाश्रमविशिष्टानामवमानस्तथैव च तेषां शुश्रूषणाभावो ज्ञाना० २३ पुत्रमि
त्रगृहक्षेत्रभ्रातृबंधुजने रतिः अरतिर्गुरुपादे च ज्ञाना० २४ अभक्ष्याभक्षणश्रद्धा तथाभक्ष्यस्य भक्षणं अभक्ष्यभक्षकस्पृष्टिर्ज्ञाना० २५
परस्त्रीदर्शनश्रद्धा परस्त्रीगमने रतिः परस्त्रीगमनं चापि ज्ञाना० २६ स्वस्त्रीदर्शनविद्वेषः स्वस्त्रीदर्शवर्जनं स्वस्त्रीबाधश्च कल्याणज्ञा
ना० २७ गुरोरनिष्टाचरणं गुरोरिष्टविसर्जनं गुरोश्च सेवाकरणं ज्ञाना० २८ ईश्वरे च गुरौ वेदे ज्ञाने चाभक्तिरच्युत तथा स्वगुरुसं
ताने ज्ञाना० २९ स्वाचार्याय महाभक्त्या स्वदेहस्यातिवेदनं निवेदनं तथान्यस्मै ज्ञाना० ३० आचार्यनिंदाश्रवणं तद्बाधस्य च दर्शनं
विवादश्च तथा तेन ज्ञाना० ३१ आचार्येनीश्वरं ज्ञानमुपेक्षा च तथैव च तदुक्तविस्मृतिश्चापि ज्ञाना० ३१ आचार्ये बालबुद्धिश्च नरबुद्धिस्त
थैव च अशिष्टबुद्धिर्भक्ताय ज्ञाना० ३३ अशक्तानामरक्षा च तथाशक्तापराधनं अशक्तानां च निंदा च ज्ञाना० ३४ अर्थहीनस्य निंदा च
तथा तस्यापराधनं तस्य संकोचसंतुष्टिर्ज्ञानान्नु० ३५ रूपहीनस्य निंदा च तथा तस्यापराधनं वैरूप्ये तस्य संतुष्टिर्ज्ञानानलु० ३६
सूत उ० एवं महेश्वरादिषु ज्ञानानुत्पत्तिकारणं श्रुत्वा प्रणामं कृत्वा भक्त्या परमया सह भवंतोपि शिवज्ञानसिद्ध्यर्थं मुनिपुंगवाः

२

स० मु० घोरे तस्मिन्नेव नर्ते धूमेनान्धीन शेषतः ३८ इति श्रीसूतसंहितायां मुक्तिखंडे षष्ठोऽध्यायः ६ ईश्वर उ० अथातः संप्रवक्ष्यामि तवाहं पुरुषोत्तम
१३ विद्धि शुश्रूषणं परं शृणु श्रद्धया सुराः सरं पुरा कश्चिद्द्विजश्रेष्ठः शशिवर्णसमाह्वयः पाकयज्ञसमारब्धः स्यतनयः पापकर्मकृत् २ तमोभिन्न तथि
श्वब्रह्मविज्ञानदूषकः वेदनिंदापरः सर्वदा हिंसापरो धमः शिवनिंदापरः सर्वदेवतादूषकः सदा धर्मनिंदापरस्तद्वद्धार्मिकानिर्मलकृत् ४ व स्यापराध
शि र्णधर्मविमुक्तस्तथैवाश्रमवर्जितः मातृहा पितृहा तद्वद्भ्रातृद्रोही यथाबलं गोघ्नश्चैव कृतघ्नश्च महानास्तिक्यगर्वितः क्षेत्रदाराहरस्तद्वदग्नि
ग दो गरदस्तथा ६ चंडालस्त्रीपतिस्तद्वन्मधुमांसादिभक्षकः महाघोरो महापापाचचार पृथिवीतले पितरस्तस्य सर्वेऽस्य ब्रह्मलोकगता अ
पि स्वर्गलोकगताश्चान्ये विवशा नरकं गताः ८ शशिवर्णोऽपि कालेन व्याधिभिः पीडितो च्युत अपस्मारपिशाचाद्यैर्ग्रस्तो भवद्भृशं पाकयज्ञः ग्रह
पिता तस्य मम भक्तो महत्तरः निशम्य तनयं क्लेशं निर्गतप्राणवत्सुधीः १० पतितो भूतले विप्रो रोदमानो निदुः खितः तं दृष्ट्वा दैवभक्त्या
ख्यो मुनिः सर्वार्थवित्तमः कृपया पाकयज्ञाख्यं वभाषे वाक्यमुत्तमं उत्तिष्ठोत्तिष्ठ मा भैषीः पाकयज्ञ भवन्मिय १२ तव पुत्रस्यापि वक्ष्या
मि श्रेयः प्राप्तेस्तु साधनं श्रीमच्छ्रीपर्वते रम्ये शिवमासैकसाधने षोडशक्रोशविस्तीर्णे नानावन्यात्र्यायतेवरे शिवशक्तिकुमारेर्वीपत्र १३

ना
गोपर्वतेश्वरं १४ आराध्य श्रद्धया संज्ञां चकार परमेश्वरी शक्तीश्वर इति स्वस्य संज्ञया भवर्धिनी यत्र शक्तीश्वरं भक्त्या ब्रह्माराध्य यथाबलं श
शक्तिमान्भवत्सर्वे जगतस्तत्प्रसादतः १६ यत्र शक्तीश्वरं पूज्य प्रसादेन पुरंदरः अधिपः सर्वदेवानामभवत्तारकोऽसुरः यत्र शक्तीश्वरं स
ज्य प्रबलो भून्महीतले उर्वशी यत्र शक्तीशं भक्त्या प्राज्ये इव लोभ्या १८ यत्र वाचस्पतिर्देवं शक्तीशाख्यं यथाबलं समाराध्य भवत्साक्षाद्दे
वेंद्रस्य पुरोहितः यत्र पूज्यो भवच्छुक्रः शक्तीशाख्यं महेश्वरं आराध्यानेकृतेसाक्षादसुराणां पुरोहितः २० यत्र पर्वाणि देवेशं दृष्ट्वा शक्तीश्व
कालेषु रमिधं प्रदत्वा धनमन्यद्वा नरः साक्षाच्छिवं व्रजेत् यत्र पुण्येषु श्रद्धया परमेश्वरं प्रणम्य शिवभक्तेभ्यः प्रदत्वा धनमुत्तमं २२ नरो मुक्तिम
वाप्नोति शक्तीशस्य प्रसादतः यत्र दृष्ट्वा महादेवं शक्तीशाख्यं धनं मुदा दत्वा भोगानवाप्नोति विजयं चापि मानव यत्र शक्तीश्वरं नित्यं दृष्ट्वा
संकल्पपूर्वकं २४ प्रदत्वा मुष्टिमात्रं वा प्रस्थं वापि स्वयमेव वा तंडुलं ब्रह्मविद्धस्ते विमुक्तो मानवो भवेत् यत्र सर्वमहापापयुक्तोऽपि
मरणं गतः नरो मुक्तिमवाप्नोति शक्तीशस्य प्रसादतः २६ यत्र साक्षान्महायोगी सर्ववेदांतपारगः महाकारुणिको नाम्ना महानंदपरा
यणः आस्ते तं वै शुभं पाकयज्ञस्त्वं सुतेन सह दृष्ट्वा महाभक्त्या प्रणम्य भुवि दंडवत् २८ तस्य शुश्रूषणं नित्यं कुरु तत्तारकं भवेत् इत्युक्तो
दाय

देवभक्तेनमुनिनापंकजेक्षण पाकयज्ञःपितापुत्रंशशिवर्णसमाहूयं अतीवप्रीतिमापन्नःश्रीमच्छ्रीपर्वतंगतः ३० पुनःशशीश्वरंदेवंसहपुत्रेण
पर्वणि दृष्ट्वाप्रदक्षिणीकृत्यश्रद्धयाशेन्नरंशनं प्रसादात्तस्यसर्वज्ञंजीवन्मुक्तंजगद्गुरुं अतिवर्णाश्रमंधीरंमहानंदपरायणं ३२ दृष्ट्वादूरेस्व
पुत्रेणसहभूमौमुहुर्मुहुः प्रणम्यदंडवद्भक्त्यापाकयज्ञःकृतांजलिःसर्वविज्ञापयामासपुंडरीकनिभेक्षण सोपिसाक्षान्महायोगीमहाका
रुणिकोत्तमः ३४ स्वात्मानंदानुसंधानप्रमोदेनसदाच्युत विलोक्यपुत्रंपापिष्ठंशशिवर्णसमाहूयं शिष्यत्वेनाग्रहीद्दिव्यब्रह्मविद्याबलेन वै
तु तस्यावलोकनाद्देवशशिवर्णस्यकानिचित् ३६ विनष्टानिचपापानितत्स्पर्शमहत्कारणात् कानिचित्कल्मषाण्यस्यसोपिनीरोगतांगतः
पुनःकाष्ठतृणंतोयंशाकमूलफलानिच दिनेदिनेसमाहृत्यगुरवेदत्तवान्मुदा ३८ तस्यगोरक्षणंचापिशशिवर्णःसमाहितः अकरोत्तेनपापानि
नष्टानिसुबहूनिच पुनस्तस्यचशुश्रूषांपादमर्दनमच्युत तैलाभ्यंगंचवस्त्रादिशोधनंचाकरोन्मुदा ४० तेनैवहेतुनाप्यस्यशशिवर्णस्यकेशव
महान्तराणिनष्टानिपापानिसुबहूनिच ततःप्रसन्नःसर्वज्ञोमहायोगीश्वरेश्वरः स्वमुक्तशेषकारुण्याद्देहोत्तरेप्रियेक्षणः ४२ तन्मुक्तशे
षामृतपानशांतसर्वाघतापोगुरुमादरेण नत्वाथशुश्रूषणमस्यशिष्यश्चक्रेसदातीवमहानुभावः ४३ ततःप्रसन्नोगुरुरस्यवि

द्यान्स्वशिष्यमेनंशशिवर्णसंज्ञं प्रनष्टपापंपरिशुद्धचित्तंप्रगृह्यभस्मासितपास्यदेहं ४४ उद्धूल्यतस्मैप्रददौमहात्मावेदांतविज्ञानसुनि
श्चितार्थं बुद्ध्वाहृषीकेशममप्रसादाद्विष्णोपिमामात्मतयापरोक्षं ४५ मुक्तोभवत्तस्यपितापिविष्णोश्रुत्वावलेनैवममप्रसादात् शुश्रू
षयातस्यविलक्षणस्यविद्यामवाप्याशुविमुक्तिमाप ४६ पितरस्तस्यपरात्मविद्ययानरकाद्देवसमुद्धृताहरे कुलमप्यस्यपवित्रतांगतंपृथि
वीपुण्यवतीविशेषतः ४७ भुक्तापुरातेनमहानुभावाचंडालकन्यापिदिवंप्रविष्टा नष्टानराभूत्धरनाकदृष्टेविद्याबलेनास्यसुखंप्रयाता ४८
श्रुणुष्वचान्यद्यदुदाहरेतवाहमद्याभिवदामिसद्गुरोः विलक्षणस्यात्मविदोमहात्मनःशरीरशुश्रूषणजंमहाफलं ४९ पुरामहापापबला
त्पुरातनानिहत्यवेश्यासुभगाभिधापतीन् धनानितेषामभिवांछयासदाहरेत्समादायसुतुल्यजैरपि ५० स्वदारसवर्गैःसहपुत्रकैःस्वकै
स्तथांवयासुकृतवतीमहासुखं पिशाचिकाभिःपरिपीडितापुनःसदामहाव्याधिभिरप्यतीवसा ५१ निराश्रिताभ्रष्टसुरूपतामाप्याःकष्टं
दशामापसहस्वकीयैः तस्यागृहंचक्रधरातिविद्धान्सुत्पीडितोर्थीविवशःप्रपेदे ५२ अनेकजन्मार्जितपुण्यकर्मणाविलक्षणंब्रह्मविदं
गृहागतं विलोक्यसाभूमितलेसमर्दिताप्रणम्यतस्यादसरोरुहद्वयं ५३ स्वांतर्गृहेशीतलगंधतोयैःप्रक्षाल्यपादोदकमादरेण

पूर्वीके

स्क॰सु॰ आराधयित्वासुभगाविमुक्तापिशाचिकाकाभिध्वस्तसमस्तरोगैः ५४ ततःप्रशांतंसुभगातिविस्मितामहानुभावंपरमार्थवेदिनं अपृच्छत्स्योदेनद
१५ र्वैरेःसुभोजिनंचंदनकुंकुमादिभिः ५५ वस्त्रैःसुसूक्ष्मैश्वसुगंधपुष्पैस्तांबूलवल्लीदलपूर्वकैश्व आराध्यभक्त्यासहसुप्रसन्नंप्रार्थयामास
परात्मनिष्टं ५६ त्वद्दर्शनेनैवसमस्तरोगतोविमुक्तदेहाहमतीवनिर्मला अनश्वमामामरणादतिप्रभोसुमुक्षदास्येकरबाणिनेसदा ५७
इत्येवंप्रार्थितःसम्यक्कथामीतोजनार्दनःप्रारब्धकर्मणानातस्तथाचकेमतिंबुधः ५८ सापिनित्यंमहाविष्णोश्चरणापरयासह अतीवपूज
यामासस्वात्मनाचधनेनच वत्सराणांत्रयंपूजांहत्वातस्यमहात्मनः सुभगासातथाज्ञानंलब्ध्वामुक्ताभवद्धरे ६० तस्याःपुत्राश्चपौत्राश्चसुहृ
द्दोर्बंधुबांधवाः दासवर्गाश्चमातापितास्वर्गलोकगताहरे बहवोब्रह्मविद्वांसंसमाराध्ययथावलं तेनब्रह्मात्मविज्ञानंवेदांतार्थविमुक्तिदं ६२ अ
परोक्षमवाप्याशुविमुक्ताभवबंधनात् यत्रनित्यंवसेज्ज्ञानीतत्राहंसर्वदास्थितः सुदूरमपिगंतव्यंयत्रमाहेश्वरोजनः प्रयत्नेनापिद्रष्टव्यस्तत्राहं
सर्वदास्थितः ६४ निमिषंवातदर्धंवायत्रज्ञानीहरेस्थितः तत्रतीर्थानिसर्वाणितिष्ठंत्येवनसंशयः योनित्यंब्रह्मनिष्ठस्यकरोत्यज्ञानतोपिवा
विमूढःसम्मानिष्टंकरोत्येवनसंशयः ६६ अंबिकायाःप्रियोत्यर्थंममज्ञानीसदाहरे वसिष्ठाःसर्वदासर्वेज्ञानीत्वात्मेवमेसदा आत्मानिष्ठं १५

चमांविष्णोर्विभिन्नंप्रवदंतिये तेमूढाएवमनुजानात्रकार्याविचारणा ६८ तस्मादात्मविदःसर्वैःपूजनीयाविशेषतःवेदवेदांतसारात्मविद्भिः वाक्या
नांमयार्थःसंग्रहेणते कथितःसारभूतोयंशेषोन्योग्रंथविस्तरः ६९ शास्त्राण्यधीत्यमेधावीगुरोरभ्यस्यतान्यपि पलालमिवधान्यार्थी
त्यजेद्ग्रंथमशेषतः ७० यावानर्थउदपानेसर्वतःसंप्लुतोदके तावान्सर्वेषुवेदेषुब्राह्मणस्यजानतः ७१ दुर्लभंप्राप्यमानुष्यंतत्रापि वि
ब्रह्मविग्रहं ब्राह्मण्यंचतथाविष्णोर्वेदांतश्रवणादिना ७२ अतिवर्णाश्रमंरूपंसच्चिदानंदमद्वयं योनजानातिसोविद्वान्कदामुक्तो
भविष्यति यदाचर्मवदाकाशंवेष्टयिष्यंतिमानवाः तदाविज्ञायचशिवंदुःखस्यांतोभविष्यति ७४ बहूनांजन्मनामंतेमहापुण्यवतांनृणां
प्रसादादेवमेवाक्याज्ज्ञानंसम्यग्विजायते यस्मिन्देहेदृढंज्ञानमपरोक्षंविजायते तद्देहनाशपर्यंतमेवसंसारदर्शनं ७६ पुनरपिनास्तिसंसार
दर्शनंपरमार्थतः कथंतद्दर्शनंदेहविनाशादूर्ध्वमच्युत तस्माद्ब्रह्मात्मविज्ञानंदृढंचरमविग्रहे जायतेमुक्तिदंशुद्धंप्रसादादेवमच्युत ७८
सूतउवाच इत्येवमुक्त्वापरमेश्वरोहरस्त्रयीमयोभीष्टफलप्रदोनृणां त्रिलोचनोंबासहितःकृपाकरोनकिंचिदप्याहपुनर्द्विजोत्तमाः ७९
निशम्यवेदार्थमशेषमच्युतःप्रणम्यशंभुंशशिशेखरंहरं प्रगृह्यपादांबुजमास्तिकोहरिःस्वमूर्ध्निविन्यस्यकरद्वयेनसः ८० अतिप्र

सू० सं०
१६

सादेनशिवस्यकेशवःसमस्तसंसारविवर्जितोभवत् मन्त्रस्यदेवोपिमुकुंदसन्निधौपुनःसुरेंद्रैरखिलैःसमावृतः ८१ पुंडरीकपुरमापशंकरस्त
त्रसर्वगणनायकैःपुनः पुष्पराशिभिरहर्निशंमुदापूजितश्चभगवान्सभापतिः ८२ एवंसूतवचःश्रुत्वामुनयोवेदवित्तमाः प्रणम्य
सूतंसर्वज्ञंसर्वदाकरुणाकरं ८३ तस्यसुश्रूषणेनित्यंमतिंचक्रुःसमाहिताः ८४ इतिश्रीसूतसंहितायांमुक्तिखंडेसप्तमो
ध्यायः मुनयऊचुः एवंमहेश्वराज्ज्ञानंलब्ध्वाविष्णुःसनातनः ततःकिमकरोद्दिव्यरूपकारुण्यविग्रहः १ सूतउ० शृणुध्वंतत्प्र
वक्ष्यामिमुनयःशंसितव्रताः महादेवंनमस्कृत्यविष्णुर्व्याघ्रपुरंगतः २ लौकिकैर्वैदिकैस्तोत्रैःस्तुत्वानुज्ञामवाप्यच आरुह्यगरुडंविप्रा
अमरैरखिलैर्हरिः स्तूयमानोमहाविष्णुर्हृष्टोवैकुंठमापसः ततस्तंसर्वलोकेशंशंखचक्रगदाधरं ४ श्रीपतिंभूपतिंविप्राःसुराब्रह्म
पुरोगमाः प्रणम्यदंडवद्भूमौभक्त्यापरमयासह कृतांजलिपुटाभूत्वाप्रपच्छुःपंकजेक्षणं देवा ऊ० भगवन्नीश्वरात्सर्वंभवताश्रुतमच्यु
त ६ तत्सर्वंश्रोतुमिच्छामोब्रूहिनःसंग्रहेणतत् विष्णुरु० भवद्भिर्यच्छ्रुतंदेवास्तद्धितंसर्वदेहिनां तथापिनाहंवक्ष्यामिशिवएवमव
स्यति भवंतःश्रद्धयासार्द्धंपुंडरीकपुराभिधं ८ स्वराड्संज्ञस्यदेवस्यहृत्सरोरुहमध्यगं दिनेदिनेयथापक्षेपक्षेवामासिमासिवा यद् १६

सा क्रल४

ध्यातिंश्रुवाहंते आशरीरविमोक्षणात् दृश्यतेप्राणिनायेनश्रद्धयातस्यमुक्तिदं १० अचिरात्सर्वपापघ्नंभोगदंभोगकामिनां उपेत्यसुमहत्तीर्थं
तपःकृत्वासुदुश्चरं श्रीमत्पंचाक्षरंमंत्रंसतारंसर्वसिद्धिदं सर्वमंत्रवरंनित्यंश्रद्धयाहृदयमध्यगं १२ जपित्वालक्षमेकंवाश्रीमदभ्रसभा
पतिं दृष्ट्वापंचाक्षरेणैवसतारेणास्तिकाःसुराः पूजयध्वंमहादेवंयुष्माकंकरुणाकरः अंबिकापतिरानंदमहातांडवपंडितः १४ सर्वाधारव
भूति टच्छायानिषण्णोस्खलः सोमार्धशेखरःसोमाःसोमसूर्याग्निलोचनः कपर्दीकंठश्रीवेदयज्ञोपवीतवान् गंगाधरःसुप्रसन्नःसुस्मितोनागभू
८क षणः १६ दीर्घबाहुर्विशालाक्षस्वेधविरजितः हारकेयूरकंकणनूपुरादिविभूषितः भस्माधारधःश्रीमानेककुंडलमंडितः पवित्रपाणि ४
र्भगवान्पुंडरीकत्वगंबरः १८ क्वणत्किंकिणिसंयुक्तकलकांचीविराजितः सर्वाभरणसंयुक्तःसर्वलक्षणसंयुतः गोक्षीरधवलाकारःकुंदें
दुग दुसमप्रभः संसारभयभीतानामेकेनैवाभयप्रदः २० अन्येनपाणिनासर्वभक्तप्राणिपरिग्रहः तदन्यकरसंलग्नसम्यग्डमरुकध्वनिः वा
मभागोर्ध्वपाणिस्थमहादीप्तहुताशनः कृपयैवात्ममायोत्थघोरापस्मारसंस्थितः २२ स्वस्वरूपेमहानंदप्रकाशप्रच्युतोहरः प्रस
न्नःसर्वविज्ञानमुपदेक्ष्यतिसप्रभुः सूतउ० पुंडरीकपुरमासुरास्तिकाःश्रद्धयैवसहयत्नतस्तति अंबिकापतिरशेषनायकःश्चंद्रमौलिरखिला

सू० सं० मरामुदा २४ ततः सुराश्चेरुरतीवसत्तमा विलक्षणं भूतिविभूषिताश्चिरं व्रतानि दान्तानि तपांसि चादरान्मुनीश्वराः सर्वजगत्प्रियेरताः २५ पं
१७ चाक्षरं मंत्रमशेषवेदवेदांतसारमतिशोभनमादरेण जप्त्वा सुराः प्रणवसंयुतमंबिकेशं दृष्ट्वा सभापतिमशेषगुरुं स्वगुरुं प्रणम्य २६ भक्त्या पूज्य
महेश्वराख्यममलं मुक्तिप्रदं भुक्तिदं श्रद्धयायुक्तमतिप्रसन्नवदनं ब्रह्मेंद्रपूर्वाः सुराः नित्यानंदनिरंजनात्मपरज्ञानानुभूत्या सदा ध्यात्वा तं प
रमेश्वरं पशुपतिं भक्त्यैकलभ्यं परं २७ लौकिकेन वचसा मुनीश्वरा वैदिकेन वचसा च तुष्टुवुः देवदेवमखिलाजितहारिणं ब्रह्मवज्रधरपूर्वकाः
सुराः २८ मुनीश्वरा महेश्वरः समस्तदेवनायकः सुरेश्वरान्निरीक्ष्य च त्रिरत्नपापपंजरात् अनुग्रहेण शंकरः प्रभुस्य पार्वतीपतिः समस्तवेदरा
रत्नसारभूतमुत्तमोत्तमं २९ प्रदर्शयन्नटेश्वरः समस्तदेवसन्निधौ स्वनर्तनं विमुक्तिदं महत्तरं महेश्वरः समस्तलोकरक्षकं महात्मनां हृदि स्थितं
निरीक्ष्य तं महेश्वरो करोत्सभापतिः शिवः परः ३० पशुपतितांडवदर्शनात्सुराः परं मुदा विवशा विचेष्टिताः पुनरमलं महेश्वरं प्रणम्य प्रिय प्र
वदनं विनयेन संयुतः ३१ पप्रच्छुः परमेश्वरं पशुपतिं पार्श्वस्थितां वापतिं सर्वज्ञं सकलेश्वरं शशिधरं गंगाधरं सुंदरं विज्ञानं निखिलाः
सुराः श्रुतिगतं संसारदुःखापहं निर्द्वंद्वो भगवाञ्छिवो गुरुः प्रोवाच कारुण्यतः ३२ ईश्वर उ० वक्ष्यामि परमं गुह्यं विज्ञानं सुरसत्तमाः १७

गुरु

युष्माकं श्रद्धया सार्धं शृणुध्वं तत्समाहिताः आत्मा तावत्सुरा अस्ति स्वसंवेद्यो निरास्पदः आनंदः पूर्णचैतन्यः सदा सोहं न संशयः ३४ तस्य
काचित्सुराः शक्तिर्मायाख्यास्ति विमोहिनी विचारवेलायां सात्माभवत्सैव न चान्यथा तदभेदेन सोप्यात्मा प्रलये जगतः स्थितः तस्मि
न्प्रपंचसंस्कारः स्थितः सर्वसुरोत्तमाः ३६ स्वभावादेव संक्षुब्धा वासना कर्मणा भवेत् ततस्तत्क्षोभयुक्ता साऽविक्रियोपि स्वभावतः
क्षोभकः कालतत्त्वस्य पुनः कालेन संयुतः ईक्षणपूर्वकं कृत्वासृजत्खादिकं जगत् ३८ सृष्ट्वानुप्राविशत्सोहं सुराः संसारमंडले ज्ञेयज्ञात्रादिके
त शुद्धे स्वप्नतुल्ये महत्तरे ३९ अनाद्यंतेन शोभन्त्या सुराः कर्मानुरूपतः विचित्रां योनिमासाद्य सुखदुःखादिपीडितः ४० पूर्वजन्मार्जितात्पुण्या
न्नरो भूत्वा महीतले मत्प्रसादेन वेदोक्तं कर्म कृत्वा विशुद्धधीः विचार्य सर्वं दुःखाद्यमति संसारवर्जितं विरक्तो मोक्षमाकांक्षन्मोक्षोपायं मह
त्तरं ४२ वेदेन दर्शितं सम्यक् संप्राप्य स्वप्रसादतः आत्मनात्मपरं मुक्तिं मत्तो लब्धात्मा स्वयं सुराः सर्वेषामात्मविज्ञानादेव मुक्तिर्न चान्य
तः ज्ञानादन्यत्सुराः सर्वं विज्ञानस्यैव साधनं ४४ तत्र शांत्यादिकं सर्वमिहैव ज्ञानसाधनं मस्थाने मतिः शुद्धे वाराणस्यादिके सुराः प्र
अयोग्यानां च योग्यानां नराणां मरणात्परं विशुद्धब्रह्मविद्यायाः साधनं सुरसत्तमाः ४६ श्रीमत्पंचाक्षरो मंत्रो मंत्राणामुत्तमोत्तमः मार्गो

सू० सं० ऽन्ये वेदमार्गस्थमाप्यानां मुक्तिरुत्तमा देवतानां महं मुख्याः स्थानानां सुरसत्तमाः मम स्थानानि मुख्यानि तेषां वाराणसी तथा ४९ श्रीकाल
१८ हस्तिशैलाख्यं श्रीमद्वृद्धाचलाभिधं पुंडरीकपुरं तद्वच्छ्रीमद्वल्मीकमुत्तमं वेदारण्यसमाख्यं च स्थानं मुख्यं सुरोत्तमाः एषां मुख्यतमाख्या
ता श्रीमद्वाराणसीपुरी ५० पुंडरीकपुरमप्यतिमिदं वित्त सर्वसुरसत्तमाः मम भुक्तिमुक्तिकरमाशु देहिनां भक्तिलभ्यमतिशोभनं सदा ५१
अस्माभिः सुरसत्तमा अभि[illegible]दितं विज्ञानमत्यद्भुतं सुफाकं मुनिपुंगवैरपि तथा सर्वार्थपारंगतैः मद्भक्तैरनिरोधनं पुरवरं संसेवनीयं नरैर्मुक्त्यर्थं
परमार्थिकेऽतिनिपुणा ध्वीश्रुतिर्वक्ति हि ५२ सूत उ० एवं महेश्वरः साक्षाच्छ्रीमदभ्रसभापतिः देवदेवो जगन्नाथः पशुपाशविमोचकः आम्नायानेक
संवेद्यः साक्षात्सर्वस्य सर्वदा अंबिकासहितः श्रीमान्प्रोवाच ज्ञानमुत्तमं ५४ देवाश्च ब्रह्मविज्ञानं वेदांतोत्थं विमुक्तिदं श्रुत्वा सर्वेश्वरं मुदा प बि
णिपत्य महीतले लौकिकैर्वैदिकैः स्तोत्रैः स्तुत्वा भक्त्या सभापतिं पूजां च चक्रिरे देवाः श्रीमत्पंचाक्षरेण वै ५६ इति श्रीसूतसंहितायां मुक्तिखं
डे अष्टमोध्यायः मुनय ऊचुः भवता सर्वमाख्यातं संक्षेपाद्विस्तरेण च भवत्प्रसादादस्माभिर्विज्ञातं च विचक्षण तथापि देवदेवस्य शिवस्य
परमात्मनः विश्वाधिकस्य रुद्रस्य ब्रह्मणः सर्वसाक्षिणः २ नर्तनं द्रष्टुमिच्छामः शंकरस्यांबिकापतेः अतः कारुण्यतोस्माकं तदुपायं वदाद्रु १८

तं सूत उ० शृणुध्वं तत्प्रवक्ष्यामि श्रद्धया वेदवित्तमाः पुरा नंदीश्वरं धीमानपृच्छच्छौनको मुनिः ४ सोपि कारुण्यतः श्रीमान्नंदी वेदविदां वरः
शौनकायाब्रवीन्नत्वा महादेवं घृणानिधिं ५ नंदिकेश्वर उवाच कैलासे संध्ययोः शंभुः करोत्यानंदनर्तनं तद्धि वा केवलं पश्यत्यन्यस्तत्र
न पश्यति ६ पुंडरीकपुरे रुद्रः शौनकानंदनर्तनं श्रीमदभ्रसभामध्ये करोति भगवान्हरः ७ तत्रापि शौनकांबापि स्कंदो विघ्नेश्वरोपि च
लोकपालैर्मया सार्धं पश्यत्यन्यो न पश्यति ८ येषां प्रसादो देवस्य शौनकास्ति महत्तरः ते प्रपश्यंति तत्रैव महानर्तनमीश्वरं ९ तस्मात्प्रसा
दसिध्यर्थं शौनक श्रद्धया सह पुंडरीकपुरं गत्वा सो चापि स्थिते सति १० आर्द्रायां प्रातरेव त्वं शुचिर्भूत्वा समाहितः शिवगंगाभिधे
तीर्थे स्नानं कृत्वा महत्तरे ११ यथाशक्ति धनं धान्यं दत्वान्यद्वाऽनसूयवे उपोष्य दिनमेकं वा श्रीमूलस्थाननायकं १२ भक्त्या प्रदक्षिणी
कृत्य प्रणम्य भुवि दंडवत् श्रीमत्पंचाक्षरं मंत्रं जपित्वायुतमादरात् १३ दिने दिने मुने ह्यंते स्नानं कृत्वा यथापुरा प्रणम्य देवमीशा
नं श्रीमूलस्थाननायकं १४ पुनर्नित्यं महाभक्त्या श्रीमदभ्रसभापतिं प्रदक्षिणत्रयं कृत्वा प्रणम्य भुवि दंडवत् १५ श्रीमत्पंचाक्षरं मंत्रं ज
पित्वा पूर्ववत्पुनः वत्सरांते यथाशक्ति धनं दत्वा सभापते १६ पूजां पंचाक्षरेणैव कुरु द्वापुरःसरं पुनः प्रसादस्ते तस्य भविष्यत्येव शौनक

श्री

१७ वक्ष्ये देवदेवस्य नृत्तमत्र प्रसादतः दृष्ट्वा स्ववांछितं सर्वमाप्स्यवंतौ मुनीश्वराः १८ सूत उ० एवं नंदीश्वरवचनं श्रुत्वासौ शौनको मुनिः
सर्वं कृत्वा क्रमेणैव श्रद्धया मुनिसत्तमाः १९ प्रसादेन महेशस्य नर्तनं सर्वसिद्धिदं दृष्ट्वा दभ्रसभामध्ये भवान्या सह शौनकः २० अतीव प्रीति
मापन्नः स्तोत्रैः स्तुत्वा यथाबलं भक्त्या परवशो भूत्वा कंचित्कालं महामुनिः २१ पुनश्च दृष्ट्वा देवेशं नृत्यंतं देवनायकं प्रसादेन स्वयं विप्राः अ
करोदीडनर्तनं २२ देवदेवोपि संतुष्टः शौनकाय द्विजोत्तमाः प्राह गंभीरया वाचा शौनक त्वं महामुने २३ वेदानामादिभूतस्य ऋग्वेदस्य ममा
ज्ञया भव निर्वाहकस्तत्र शाकल्यस्य विशेषतः २४ एवमाज्ञापितस्तेन शिवेन मुनिसत्तमाः शौनको भगवान्विप्रास्तथा निर्वाहको भव
त् २५ तस्य शिष्यस्तु विप्रेंद्रास्तदाख्याश्वलायनः पूर्वोक्तेनैव मार्गेण भगवंतं त्रियंबकं २६ श्रीमद्दभ्रसभामध्ये नृत्यंतं देवनायकं द
ष्ट्वा प्रणम्य मेधावी प्रसादेन शिवस्य तु २७ अभवत्सूत्रकृद्विप्राः शाकल्यस्य महामुनिः एवं पूर्वोक्तमार्गेण श्रद्धया बहवो जनाः २८ दृष्ट्वा
दभ्रसभामध्ये नर्तनं शंकरस्य तु कृतार्था वेदविच्छ्रेष्ठा अभवन्नचिरेण तु २९ तस्माद्भवंतोपि पुरोक्तवर्त्मना शिवस्य नृत्यं शिवया निरीक्षितं द
ष्ट्वा महेशस्य शूलिनः प्रसादमात्रेण विमुक्तिभागिनः ३० भवत परमतत्त्वं प्राप्य पापोपयोक्तः सकलगुणवरेण्यसुत्तमो व्याससंज्ञः अ १९
स्फुरा

आषाढेव्रतिनीदंडीहिज्ञाकुधः

वरदतिरहस्यं मे पुरा श्रद्धयैव प्रवरगुणनिधानः पद्मनाभं शंभूतः ३१ एवमुक्त्वा मुनींद्रेभ्यः सूतः पौराणिकोत्तमः कृष्णद्वैपायनं व्यासं संस्मार श्रद्ध
यासह ३३ एतस्मिन्नंतरे श्रीमान्महाकारुणिकोत्तमः कृष्णाजिनी सोत्तरीय आषाढेन विराजितः ३४ भस्मोद्धूलितसर्वांगः शुद्धतिर्यक्त्रिपुं
ड्रधृक् रुद्राक्षमालाभरणो जपन्पंचाक्षरं मुदा ३५ शिष्यैस्तादृग्विधैर्युक्तो महात्मा स्वयमागतः तं दृष्ट्वा परमप्रीत्या प्रणम्य भुवि दंडवत् ३६
सूतः स्वशिष्यैर्मुनिभिः सह सत्यवतीसुतं तत्पादपंकजद्वंद्वं निधाय शिरसि क्रमात् ३६ चक्षुषोर्हृदये चैव संतोषाद्गद्गदस्वरः पादप्रक्षा
लनं कृत्वा पवित्रं तज्जलं पुनः ३७ पीत्वा यथार्हं संपूज्य व्यासं शिष्यगणावृतं तद्वाक्यं वेदवत्सत्यं स्वशिष्यान्वेदवित्तमान् ३८
श्रावयित्वा महाधीमान् सह तेनाखिलैरपि श्रीमद्व्याघ्रपुरं दिव्यमवाप पुरुषार्थदं ३९ पुनः सर्वे मुनिश्रेष्ठा वेदव्यासपुरोगमाः
चापेसत्यें स्थिते रौद्रनक्षत्रे श्रद्धया सह ४ स्नानं कृत्वा महातीर्थे शिवगंगाभिधे वरे यथाशक्ति धनं दत्त्वा ब्राह्मणेभ्यो मनीषिणः ४१
उपोष्यैकं दिनं दृष्ट्वा श्रीमूलस्थाननायकं प्रदक्षिणत्रयं कृत्वा प्रणम्य धरणीतले ४२ अघोरेण मंत्रेण श्रीमूलस्थाननायकं स
माराध्याशुतं नित्यं जपित्वा मंत्रमुत्तमं ४३ वत्सरांते च तीर्थेस्मिन्स्नानं कृत्वा महत्तरे प्रत्वा पूज्य देवेशं श्रीमूलस्थाननायकं ४४

स्क॰सु॰ ततःसभापतिंनित्यंप्रणम्यस्तुविदंडवत् मंत्रंषडक्षरंनित्यंजपित्वायुतमादरात् ४५ वत्सरांतेधनंदत्वाब्राह्मणानांयथाबलं श्रीमत्पंचाक्षरे
२० लैवसताहेणमहेश्वरं ४६ पूजयामासुरत्यंतंश्रद्धयैवसभापतिं ततःप्रसन्नोभगवान्महेश्वरोमुनीश्वराणामपिदृष्टिगोचरः प्रनृत्तमा
नोभवदंबिकापतिःसमस्तदेवानसभापतिःशिवः ४७ व्यासादयोवेदविदांवराहरंदिवाकराणांगतकोटिभिः समानतेजस्कमतीव
निर्मलंविशालवक्षस्थलमार्तिहारिणं ४८ दृष्ट्वाप्रसादेनमहत्तरेणतेप्रणम्यसर्वेसुरदंडवन्मुनः प्रजल्पभक्त्यादिवशाविचेष्टितानि
वृत्तबंधाअभवन्प्रसादतः ४९ पुष्पवृष्टिंम्बवृन्महत्तरांस्तत्रिमंगलतूर्यःस्वनाविच कोहलादिरवपूरितंजगत्तोषिताअपिसुरासुराजनाः ५०
आगताअपिसुरासुराजनाअप्सलेभिरखिलैरनुत्तमैः शंकरश्चभगवान्सभापतिःसर्वलोकहितकाम्यवांछया ५१ सहपरिकरवंधं
वैस्मंत्रेणकृत्वानिखिलभुवननाथोनीलकंठस्त्रिनेत्रः सकलजनसमूहैःसेव्यमानःस्वभक्तैस्तनयमुगलयुक्तोनंदिनानंदितेन
५२ महोत्सवविनोदेनभगवान्परमेश्वरः पुंडरीकपुरंदिव्यंप्रादक्षिण्यक्रमेणसः ५३ चरित्वाशिवगंगायाःसंभुस्तांडवमं
डितः स्नानंकृत्वाहरोतीर्थेसर्वेषांप्राणिनांहरः ५४ सुरासुरादयोप्यस्मिन्शिवगंगाभिधेवरे श्रद्धयासन्निधौतस्यस्नानं २०

कृत्वायथाबलं ५५ धनंधान्यंचवस्त्रंचतिलंगांभूमिरुत्तमां प्रदत्वाशिवभक्तेभ्यःशंकरंशशिभूषणं ५६ नीलकंठंविरूपाक्षंतुष्टुवुश्चसुरा
दयः नमस्तेरुद्रमन्यवउतोतइषवेनमः नमस्तेअस्तुधन्वनेकराभ्यांतेनमोनमः यातेरुद्रशिवातनूःशंतानस्तैनमोनमः ५८ न
मोस्तुनीलग्रीवायसहस्राक्षायतेनमः सहस्रपाण्येतुभ्यंनमोमीढुष्टमायते ५९ कपर्दिनेनमस्तुभ्यंकालरूपायतेनमः नमस्तेचातन्वस्त्रा
यनमस्तेशूलपाणये ६० हिरण्यपाण्येतुभ्यंहिरण्यपतयेनमः नमस्तेवृक्षरूपायहरिकेशायतेनमः ६१ पशूनांपतयेतुभ्यंपथीनांप
तयेनमः पुष्टानांपतयेतुभ्यंक्षेत्राणांपतयेनमः ६२ आततायिस्वरूपायवनानांपतयेनमः रोहितायस्थपतयेवृक्षाणांपतयेनमः ६३
नमस्तेमंत्रिणेसाक्षात्कक्षाणांपतयेनमः ओषधीनांचपतयेनमःसाक्षात्परात्मने ६४ उच्चैर्घोषायदेवायपत्तीनांपतयेनमः सत्वा
नांपतयेतुभ्यंधन्वानांपतयेनमः ६५ सहमानायशांतायशंकरायनमोनमः आधीनांपतयेतुभ्यंव्याधीनांपतयेनमः ६६ ककुभा
यनमस्तुभ्यंनमस्तेस्तुनिषंगिणे स्तेनानांपतयेतुभ्यंकृत्स्नायनमोनमः ६७ तस्कराणांनमस्तुभ्यंवातयेपापहारिणे वंचतेपरिवंचतेपरि
स्तायूनांपतयेनमः ६८ नमोनिचेरवेतुभ्यमरण्यपतयेनमः उष्णीषवेनमस्तुभ्यंनमस्तेपरमात्मने ६९ विस्तृतायनमस्तुभ्यंआ

स्कं० मु० सीनायनमोनमः श्यामायनमस्तुभ्यंसुसुखायनमोनमः ७० प्रबुद्धायनमस्तुभ्यंस्थिरायपरमात्मने सभारूपायतेनित्यंसभायाः
२१ पतयेनमः ७१ नमःशिवायसांबायब्रह्मणेसर्वसाक्षिणे ७२ सूतउवाच एवंसुरासुरैरन्यैःशंकरोभिष्टुतःपुनः हत्वामसाऽस्सर्वेषांतत्रैवांत
र्हितोभवत् ७३ अस्यतीर्थस्यमाहात्म्यंस्थानस्यास्यसभापतेः योवेत्तिश्रद्धयामुक्तिःसिद्धातस्यमहात्मनः॥७४॥यःपठेच्छृणुयाद्वापिमु
क्तिखंडमिमंसदा ससाक्षान्मुक्तिमाप्नोतिप्रसादेनसभापतेः ७५ नमोव्यासायगुरवेममविज्ञानदायिने नमःशिवायसोमायसाक्षिणे
भक्तगात्मने ७६ इतिश्रीस्कंदपुराणेसूतसंहितायांमुक्तिखंडेनवमोध्यायः ९ मुक्तिखंडंसमाप्तम् श्रीगणेशायनमः॥

मुक्तिखंडमिदंततीयं१

॥श्रीग

षष्ठवैभवखंडारंभः

॥श्रीगणेशायनमः॥ ऐशमाद्यंतनिर्मुक्तमतिशोभनमादरात् नमामिविघ्नहंसांबंसंसारविषभेषजं १ सत्रावसानेसन्नद्धाः सर्ववेदार्थवेदने
सर्वलोकहितेयुक्ताः सारासारविवेकिनः २ स्वाध्यायाध्ययनेयुक्ताः स्वच्छचित्ताः सुनिश्चलाः सर्वोपद्रवनिर्मुक्ताः सर्वशत्रुविवर्जिताः अभ्या
गतानामार्तानामतिथीनांप्रियंवदाः मैत्र्याकरुणयायुक्ताः कुमनावप्युपेक्षकाः ४ परपुष्टेमहाभीताः प्रजामानविवर्जिताः गवांशुश्रूषणेयु
क्ताः गुरुशुश्रूषणेरताः वृद्धसेवासुसंपन्नावेदवित्पुजनेरताः ऋजवोम्रदवः स्वच्छाः सर्वद्वंद्वविवर्जिताः ६ रुद्राक्षमालाभरणाः सितभस्माव
गुंठिताः त्रिपुंड्रावलिभिर्दीप्ताः जटावल्कलसंयुताः लिंगार्चनपरानित्यंशिवस्यामिततेजसः शिवाभिमानसंपन्नाः शिवभक्तिपरायणाः ८
शिवशब्दजपध्वस्तपापपंजरसुंदराः संसारविषवृक्षस्यमूलच्छेदनतत्पराः श्रौतस्मार्तसदाचाराः सर्वेगोत्रर्षयोवराः व्यासप्रसादसंपन्नं
विश्वज्ञानमहोदधिं १० विश्वासवेदिनंसाक्षाद्विध्वस्तभवकाननं स्मृत्वाभक्त्यामहात्मानंतुष्टुवुः सूतमुत्तमं एतस्मिन्नंतरेश्रीमान्म
हाकारुणिकोत्तमः सर्वज्ञः सर्वभूतानामभीष्टफलदःप्रभुः १२ प्रादुरासीन्महातेजारात्रौसूर्यइवस्वयं तंदृष्ट्वामुनयःसर्वेविस्मि
नागद्रस्वराः प्रणम्यदंडवद्भूमौदत्वातस्यासनंवरं पादप्रक्षालनंकृत्वाश्रद्धयापरयासह १४ गंधपुष्पादिभिर्दिव्यैः कृत्वपूजांपव

तांवरं समाश्वास्यचिरंकालंप्रसन्नमुखपंकजं पप्रच्छुःसर्ववेदार्थंब्रह्मभाग्यगौरवात् सोपिसूतःस्वभावार्थंस्मृत्वाशंभुंजगद्गुरुं १६ सर्वविद्या
मयीमीशंसाक्षाद्विघ्नविनायकं षण्मुखंचसदाशुद्धंप्रणम्यभुविदंडवत् कृतांजलिपुटोभूत्वामुनीनालोक्यसुव्रतान् वक्तुमारभतेसूतः
सर्ववेदार्थमुत्तमं १८ महेश्वरंसर्वजगद्विभासकंदिवाकरादिप्रथितौजसामपि अगोचरंभक्तिपुरःसरंसदानमामिसंसारमहाविषौष
धं १९ परानुभूतिंभवपाशनाशिनींसदाशिवस्याप्यतिशोभनप्रदां उमाभिधामुत्तमाचित्तवृत्तिदांनमामिनानाविधलोकवैभवां २०
इतिश्रीसूतसंहितायांयज्ञवैभवखंडेप्रथमोध्यायः सूत उ० अथवक्ष्यामिवेदार्थंशृणुतश्रद्धयाद्विजाः श्रद्धयारहितंसर्वंफलायन
कदाचन १ परापरविभागेनवेदार्थोद्विविधःस्मृतः वेदार्थःपरमःसाक्षात्परस्मात्परतरंपरं २ अपरोधर्मसंज्ञःस्यात्तत्परप्राप्तिसाधनं अ
धर्मपरिहारायवेदार्थत्वेनभक्तितः गीयतेमुनिशार्दूलैः कदाचिन्नतुमुख्यतः अधर्मपरिहारेणधर्मस्त्वव्याकुलोभवेत् ४ अव्या
कुलेनधर्मेणश्रद्धयानुष्ठितेनच वेदार्थःपरमःसाक्षात्सिध्यत्येवनसंशयः सोयंस्वपरयाशक्त्याबहुवत्प्रतिभासते एकैवपरमाशक्तिर्मा
यादुर्घटकारिणी ६ शिवस्यानंतरूपासाविद्ययातस्यनश्यतियाविनश्यतिसामायाचिन्मात्रेपरिकल्पिता अधिष्ठानावशेषोहिना

सू०य०वै० शकाल्पितवस्तुतः भावस्यैवस्वभावत्वंनाशोभावेस्यभावता ८ भावाभावस्वभावाभ्यामन्यएवहिकल्पितः अधिष्ठानस्यनाशोनसत्य
२ त्वादेवसर्वदा ९ सर्वाधिष्ठानमीशानंपश्यन्नेवविमुच्यते ईशानविषयंज्ञानंवेदांतश्रवणादिना जायतेपरहंसस्ययतेर्मुख्याधि
कारिणः नाश्रमांतरनिष्ठस्यक्रमात्तस्यापिजायते ११ ब्रह्मलोकमवाप्नोतिवनस्थोनैष्ठिकोपिवा गृहस्थःपितृलोकंचशिवज्ञानंतु
भिक्षुकः तत्रापिप्रथमोभिक्षुर्ज्ञाननिष्ठोस्यवाधकात् महापापादयत्नेनमुच्यतेमुनिपुंगवाः १३ द्वितीयःशांतिदांत्यादिज्ञानांगेच्छा
मवाप्नुयात् तृतीयोऽखिलवेदांतश्रवणेच्छामवाप्नुयात् चतुर्थोज्ञानमाप्नोतिवेदांतश्रवणेनतु सएवकर्मसंन्यासीपरहंससमाश्र
यः १५ अन्येकाम्यपरित्यागाद्भिक्षुकाइतिकीर्तिताः परोक्षंब्रह्मविज्ञानंशाब्दंदेशिकपूर्वकं बुद्धिपूर्वकृतंपापंकृत्स्नंदहतिवह्निवत् शाब्द
ब्रह्मात्मविज्ञानमपरोक्षंमहत्तरं १७ संसारनाशकंमोक्षंतमसश्चंडभानुवत् अतोविज्ञानलाभायपरहंसोभवेद्द्विजः कुटीचकाश्चहं
साश्चतथान्येचबहूदकाः येभविष्यंतितेकुर्युःमाजापत्येष्टिसंज्ञितां १९ अग्नेयेष्टिंद्विजाःकुर्युःपरहंसाभिलाषिणः पश्चाद्वैधानवींकुर्युःस
र्वेसंयतमानसाः येनाहिताग्नयोविप्रास्तेषांनेष्टिर्विधीयते स्वस्वमग्नौतुहोमंतेकुर्युर्मंत्रपुरःसरं २१ विरजाख्यैर्महामंत्रैराज्येनचरुणा
२

कौ०क्रमा०३

पिवा हुतशेषंचरुंसाज्यंप्राश्याचम्येवसर्पिषा पूर्णाहुतिंततःकुर्युःप्रणवेनाग्निमात्मनि समारोप्यपुनरावाय अयंतेयोनिरृत्विजः २३
इतिमंत्रेणकुर्युस्तेप्रैषोच्चारणमादरात् संन्यासाध्वर्युणादत्तंदंडंकाषायमेवच परिगृह्यगुरोःपादंप्रणम्यश्रद्धयासह वेदांतश्रवणंकु
र्युर्ज्ञानार्थंभिक्षवःकाम्यकर्मफलेदोषंविदित्वाप्रतिषिद्धवत् काम्यकर्मत्यजंस्तत्त्यो भिक्षुःफलतोभवेत् २६ नसंतितस्ययामंत्राश्च
परहंसस्यसर्वदा तथापिप्रथमंमंत्रंजपेन्नित्यंसमाहितः प्रणवात्परंजप्त्वाकरामुक्तोभविष्यति ॐकारःसर्वमंत्राणामुत्तमःपरि
कीर्तितः २८ ॐकारेणप्लवेनैवसंसाराब्धिंतरिष्यति तमाद्वचिग्रहोदेवोरुद्रःसत्यादिलक्षणः संसारतारकस्यास्यप्रणवस्यार्थउच्य
ते विष्ण्वादयोपिदेवाश्चरुद्रस्यास्यान्वयेनतु ३० कथंचित्प्रणवस्यार्थाभविष्यंतिनमुख्यतः यतिभिर्ज्ञानसिध्यर्थमविमुक्तंमहत्तरं
स्थानंसंसेवनीयंस्याच्चिंतनीयंतथैवच अविमुक्तेमहादेवःसाक्षाद्विश्वेश्वरःप्रभुः ३२ उपास्यमानःसुप्रीतोज्ञानंसाक्षात्प्रयच्छति
अविमुक्तेमहादेवमनुपास्यविमुक्तये नरःकिंचिद्द्विषंभुक्त्वाक्षुन्निवृत्तिंकरिष्यति तस्मान्मुमुक्षुभिर्भक्त्याज्ञानार्थमविमुक्तकं ३४
अधिमृत्तेतथाध्यात्म्येसेवनीयंतथैवच चिंतनीयोमहादेवस्तत्रोपास्योनसंशयः गृहस्थैश्चवनस्थैश्चतथैवब्रह्मचारिभिः शतरुद्रि

यसंज्ञस्तु मंत्रोजप्योमहत्तरः ३७ रुद्रजापीविमुच्येत महापातकपंजरात् सम्यग्ज्ञानंचलभते तेनमुच्येतेबंधनात् अनेनसदृशंजप्यं
नास्तिसत्यंश्रुतौस्मृतौ एषापंचाक्षरीविद्याशतरुद्रियमध्यगा ३८ पंचाक्षरेमहादेवः सर्वदासुप्रतिष्ठितः महादेवस्यसान्निध्या
द्धर्मभृताश्चदेवताः तत्रप्रतिष्ठिताएव वृक्षेशाखायथास्थिताः वृक्षस्यमूलसेकेनशाखाःपुष्यंतिवैयथा ४० शिवेरुद्रजपात्प्री
तेप्रीताएवान्यदेवताः अतोरुद्रजपादेवभुक्तिर्मुक्तिश्चसिध्यतः मायामाहेश्वरीशक्तिःसत्वादिगुणभेदतः जीवमात्रस्यसंसारेभ्राम
यत्यनिशंद्विजाः ४२ सत्वात्सुखंचज्ञानंचवैराग्यंशीलमेवच दुःखंप्रवृत्तिःकामश्चलोभोदियंरजसोभवेत् मोहोभ्रांतिस्तथाल
स्यंकार्पण्यंचतमसोभवेत् एवमुत्तमरूपाश्चपदार्थाःसत्वसंभवाः ४४ तथामध्यमरूपाश्चपदार्थाराजसाःस्मृताः विहीनास्ता
मसाएवपदार्थाःसंग्रहेणतु अतोमायामयःसाक्षात्संसारःसर्वदेहिनां सशिवज्ञानमात्रेणसद्यएवनिवर्तते ४६ ज्ञानय
ज्ञेनविमाणमास्तिकानाममानिनां जायतेपरमंज्ञानंनान्यथामुनिपुंगवाः ४७ यज्ञश्चद्विविधःप्रोक्तःस्थूलसूक्ष्मविभेदतः क
र्मयज्ञःसमाख्यातःस्थूलःसर्वार्थवित्तमैः ज्ञानयज्ञोभवेत्सूक्ष्मःसाक्षात्संसारबाधकः कर्मयज्ञाभिधःस्थूलस्त्रिःप्रकारोव्यवस्थि

तः ४९ कायिकोवाचिकश्चैवमानसश्चेतिसुव्रताः नित्योनैमित्तिकाद्यस्तुकायिकःपरिकीर्तितः मंत्राणांजपरूपस्तुवाचिकोवेदवि
त्तमाः देवताध्यानरूपस्तुमानसःपरिकीर्तितः ५१ कायिकादधिकःप्रोक्तोवाचिकोमतिमत्तमैः मानसोवाचिकाच्छ्रेष्ठोमानसोबहुधा
स्मृतः ध्येयभेदेनसोप्येवमुत्तमाधमभेदतः द्विविधस्तत्रदेवस्यशिवस्यध्यानमुत्तमं ५३ विष्ण्वादीनांतुदेवानांध्यानंबाध
मभिष्यते अतोमोक्षार्थिभिःप्राज्ञैःशिवएकःशिवंकरः ध्येयःसर्वंपरित्यज्यशिवादन्यत्तुदैवतं अस्मिन्नर्थेश्रुतिःसाध्वीसमाप्ता
वेदवित्तमाः ५५ अपक्वचित्तैर्भोसाधवेब्रह्मविष्ण्वादयोपिच ध्येयाःपक्वैःशिवोध्येयःसाक्षात्संसारमोचकः रुद्रंविष्ण्वाधिकंविष्णुंब्र
ह्माणंचान्यमेवच समंसंचिंतयन्साक्षात्संसारेपरिवर्तते ५७ महापापवतांपुंसांपूर्वजन्मसुसुव्रताः विष्णुःसर्वाधिकोभाति
नसाक्षात्परमेश्वरः विष्णुःसर्वाधिकोभातिनारकीसनसंशयः विष्णुःसर्वाधिकोनान्यइतिचिंतयतांनृणां ५९ नास्तिसंसा
रविच्छित्तिःकल्पकोटिशतैरपि तेषांनैवचमोक्षाशाकल्पकोटिशतैरपि ब्रह्मादिदेवतानांचविष्ण्वाधिक्यंवदंतिये अधोमुखो
र्ध्वपादास्तेयास्यंतिनरकार्णवं विष्णोर्वाब्रह्मणोवापितथैवान्यस्यकस्यचित् साम्यंवदंतियेतेषांनसंसाराद्विमोक्षणं ६२ वि

सू.य.वै. ह्मप्रजापतीन्द्रादिदेवतासुमुनीश्वराः निहीनासुशिवंपश्यन्मुच्यतेभवबंधनात् शिवरुद्रमहादेवब्रह्मेशानादिनामतः वि
४ ष्णवादिदेवताःपश्यन्क्रमान्मुच्येतबंधनात् ६६ शिवंसर्वोत्तमंविप्राहरिविष्णवादिनामतः चिंतयन्घोरसंसारेपतत्येवनसंश
यः यथामात्यादिबुद्ध्यातुराज्ञिबाधायदेहिनां तथाविष्ण्वादिबुद्ध्यातुशिवेबाधायदेहिनां अतःशिवंसदाध्येयःप्राधान्येनमनी
षिभिः ज्ञानयज्ञात्परोयज्ञोनास्तिनास्तिश्रुतौस्मृतौ ६७ ज्ञानयज्ञैकनिष्ठस्यनकिंचिदपिदुर्लभं महापापवतांनृणांज्ञानयज्ञोन
रोचते ६८ प्रत्युतज्ञानयज्ञस्यप्रद्वेषोभासतेसतः विशुद्धज्ञानसुखत्वंयस्यतस्यमहात्मनः शिवरुद्रमहादेवब्रह्मेशादिनामसु रु ना
द्रन्निष्ठसर्वासुशांतिदांत्यादिसाधने ७० तिर्यक्त्रिपुंड्रेरुद्राक्षेतथाभस्मावगुंठने शिवस्यलिंगपूजायांशिवस्थानेषुसुव्रताः
प्रियबुद्धिःप्रजायेतस्वभावादेवसर्वदा यस्यविज्ञानिनस्तेषुप्रद्वेषोवाविजायते ७२ उपेक्षावानसज्ञानीपशुर्विज्ञानवंचकः स
र्वत्रनास्तिविद्वेषःसाध्यसाधनपूर्वकैः साक्षाद्विज्ञानिनोविप्राउपेक्षाबुद्धिरेवहि तथाप्युक्तेषुसर्वेषुशैवेषुद्विजपुंगवाः
७४ प्रियबुद्धिःस्वतोभातिबाधिताकाररूपतः बाधिताकारतोवापिप्रियस्यबुद्धिःस्वतोनहि ७५ एवंसोनेवविज्ञानीध्रौ ६

तएवनसंशयः कर्मावलंबनेनैवकेचिज्जीवंतिमानवाः ज्ञानावलंबनेनैवजीवंत्यन्येविमोहिताः अनेककोटिभिःकल्पैर्ज्ञानयज्ञस्य
वैभवं ७८ मयामद्गुरुणान्यैर्वानशक्यंपरिभाषितुं तथापिमुनयःश्रद्धामात्रमासाद्यकेवलं प्रशंसंतिमहाभाग्याज्ञानयज्ञस्यवैभवं तत्रा
अशक्ताअपिविज्ञातुंज्ञानयज्ञस्यवैभवं ८० श्रद्धयास्वाधिकारेणवदंतिज्ञानवैभवं पुनःकणादकपिलप्रभृतीनामपिस्वतः ८१
दोषोनविद्यतेज्ञानेविरोधेपिपरस्परं नैस्तैर्निरूपितंज्ञानंवस्तुतोनैवदर्शनं उपचारेणविज्ञानंश्रद्धापूततयाद्विजाः व्यासःसाक्षाच्छिवज्ञानी
शिवस्यैवप्रसादतः ८२ तत्प्रसादादहंसाक्षाच्छिवज्ञानीनसंशयः मयातत्संग्रहेणैवप्रोक्तंयुष्माकमादरात् मत्प्रसादेनविज्ञानंयज्ञवैभ
वमास्तिकाः ज्ञातवंतःकृतार्थाश्चयूयंसत्यमिदंवचः ८४ इतःपूर्वंमयान्येषांनायमर्थोभिभाषितः व्यासोममगुरुःपूर्वंरहस्यंमेभ्यभाषत ८५
सारात्सारतरःसाक्षादयमर्थःप्रभाषितः गोपनीयस्त्वयंनित्यंभवद्भिःपरमास्तिकैः ८६ इतिश्रीसूतसंहितायांयज्ञवैभवखंडेद्वितीयोध्यायः सू
तउ॰ अथातःसंप्रवक्ष्यामिकर्मयज्ञस्यवैभवं कर्मयज्ञस्त्रिधाप्रोक्तोमुनिभिःसूक्ष्मदर्शिभिः एकःकाम्योपरोनित्यस्तथानैमित्तिकोपरः प्राधा
न्येनफलंसिद्धिरार्थिकीकाम्यकर्मणः २ प्राधान्येनफलंशुद्धिर्नित्यस्यफलमार्थिकं केवलंप्रत्यवायस्यनिवृत्तिरितरस्यतु काम्यरूपेषुयज्ञे

सू॰ य॰ वै॰ ष्वयतंते श्रद्धयासह मंदभाग्या नरा विप्रा नित्यनैमित्तिकात्मके ४ महाभाग्याः प्रवर्तंते तेषां मुक्तिरयत्नतः विध्युक्तमिति बुध्या ये वर्तंते श्रद्ध
५ यासह एषु यज्ञेषु सर्वेषु तेषां मंदफलं भवेत् शिवाराधनबुध्या ये यतंते श्रद्धयासह ६ एषु यज्ञेषु ते शीघ्रं विमुक्तिफलमाप्नुयुः अकर्ताहमभो
क्ताहमसंगोहमहं शिवः इति विज्ञायमानेन स्वात्मानंतर्कतोपि च कर्मयज्ञेषु ये नित्यं यजंते श्रद्धयान्विताः ८ ते महादेवाज्ज्ञानमपरोक्षम
वाप्नुयुः यज्ञरूपं महाविष्णुं यज्ञे पश्यंति ये द्विजाः ते तु विज्ञानमासाद्य कैवल्यं ज्ञानमाप्नुयुः प्राधान्येन महादेवो यज्ञैरीज्यो न चापरः १० इति
ज्ञात्वा यजंते ये पि विज्ञानमाप्नुयुः विष्णुं ब्रह्माणमिंद्रं वा देवतांतरमेव वा प्रधानबुध्या ये यज्ञैर्यजंते मोहतो पि वा ते यांति नरकं घोरं यावदाभूतसं
प्लवं १२ नाम तत्स्वार्थतो यस्मान्महादेवो महेश्वरः स एव सांबः सर्वज्ञ ईज्यः सर्वमहामखैः यानि लोके निषिद्धानि कर्माण्यविहितानि च तानि
शंभोर्महापूजेत्येतज्ज्ञानं महामखः १४ यानि कर्माणि सर्वाणि निषिद्धानि श्रुतौ स्मृतौ तानि चाराधनं शंभोरिति ज्ञानं महामखः ईश्वरार्थ
धिया पापान्यपि कर्माणि सुव्रताः भवंति पुण्यान्यत्यंतं सत्यमेव न संशयः १६ आर्द्रकाष्ठं महानग्निः शुष्कं कुर्याद्दहेद्यथा तथेश्वरधिया पापं शु
द्धविज्ञानदं भवेत् विध्युक्तकर्मनिष्ठानामिष्टस्य करणं तु यत् सोपि साक्षान्महायज्ञः सम्यग्ज्ञानस्य कारणं १८ विध्युक्तकर्मनिष्ठानामनिष्टकरणं ५

तु यत् तन्महापातकं प्रोक्तं संसारस्य प्रवर्तकं दुराचारिषु सर्वेषु विना दोषस्य दर्शनं उपेक्षाबुद्धिरत्यन्तासा तस्यायं महामखः २० बुद्धा
र्हतादिमार्गस्थदेवताप्रतिमासु च देवताबुद्धिमात्रं य सोपि यज्ञः प्रकीर्तितः वैदिकं तांत्रिकं हित्वा मार्गस्थप्रतत्याद्विजाः यत्र यो देवताबुद्धिं करो
ति श्रद्धयासह २२ सोपि यज्ञ इति प्रोक्तो मया वेदार्थवित्तमाः श्रद्धासहितं सर्वं श्रेयसे प्रेयसे भवेत् स्वबुध्या वेदशास्त्रोक्ते तंत्रोक्तेपि द्विजोत्त
माः आस्तिक्यं देवताबुद्धिरपि लाभाय देहिनां २४ फलेषु तारतम्यं तु विद्यते सूक्ष्मदर्शिने कायिकः कर्मयज्ञस्तु कथितः संग्रहेण तु भवंतोपि महा
यज्ञं कायिकं कुरुत द्विजाः २५ इति श्रीसूतसंहितायां यज्ञवैभवखंडे तृतीयोध्यायः सूत उ॰ अथाहं वाचिकं यज्ञं वक्ष्यामि श्रद्धयासह परा
त्परतरात्साक्षाच्छिवाच्चैतन्यलक्षणात् १ स्वशक्तिसहितादेव द्विजाज्ज्योतिर्मयः परः शब्दः सूक्ष्मः स्वभावेन प्रादुरासीदखंडितः २ स शब्दः पुनरा
धारे प्राणिनामास्तिकोत्तमाः पिंडीभूततया भाति तत्र जंतोः सनातनः ३ स पुनर्ब्रह्मनाड्यां तु प्रविश्य हृदयांबुजं विभक्तः सूक्ष्मरूपेण भाति वह्नि
प्रभः स्वतः ४ ब्रह्मरंध्रं पुनः साक्षाच्छिवस्य स्थानमुत्तमं पिंडीभूततया प्राप्य प्रकाशानंदलक्षणे तत्र सान्निहिते शंभौ विश्रांतिं लभते स्वतः आ
धारे परशक्त्यात्मस्थानेन प्रकाशितः ६ परमेकाक्षरं साक्षाद्ब्रह्म सत्यं तु शोभनं आज्ञासंज्ञान्महास्थानादूर्ध्वं यत्स्थानमुत्तमं तत्रस्थो यं द्विजा

२ह्रूपं अयमाद्यः परोमंत्रः सुप्रसिद्धः स्वभावतः ८

सू.सं.वै. :शब्दः सूक्ष्मैकाक्षरतामियात् तृतीयेपरमाधारेद्वरकेसुख्यभाजने एकाकारत्वमाप्नोतिस्वभावेनार्थमननत्राणरूपत्वान्मंत्रइत्यभिशब्दितः मातृ
६ कापरमादेवीमंत्रमातामहेश्वरी १० अस्मादाद्यान्महामंत्रादाविर्भूतास्वभावतः अधोमुखीभवेदेकारएकाऊर्ध्वमुखीभवेत् तस्माच्छ्रीमातृ
काशुद्धाचाद्यमंत्रात्मिकीभवेत् आद्योयंपरमोमंत्रःसुप्रसिद्धोपिसुव्रताः १२ गुरूपदेशतोज्ञेयोनान्यथाशास्त्रकोटिभिः सर्वेषामादिभूत
स्यशिवस्यपरमात्मनः॥स्वप्रकाशस्वरूपस्यवाचकोयंपरोमनुः॥नास्त्यतःपरमोमंत्रोनसमश्चास्यसुव्रताः॥१४॥सत्यंसत्यंपुनःसत्यमुद्धृत्य
भुजमुच्यते त्रिचतुर्वत्सरंशिष्यंपरीक्ष्यसततंपुनः ईश्वरादेशतोज्ञेयोमंत्रोयंमंत्रिसत्तमैः अपरीक्ष्यप्रदानेभ्रशीघ्रंमृत्युमवाप्नुयात् १६ अर्जितः
पुरुषार्थोपिद्विथाभवतितस्यतु अस्यमंत्रस्यवैशिष्ट्यंमयावक्तुंनशक्यते मुनिभिश्चतथादेवैःसर्वज्ञेनशिवेनच मंत्राणामात्मभूताचमातृ
कापरमेश्वरी १८ बुद्धिस्थामध्यमाभूत्वाविभक्ताबहुधाभवेत् सापुनःक्रमभेदेनमहामंत्रात्मनातथा १९ मंत्रात्मनाचवेदादिशब्दाकारेणचस्व
तः सत्येतरेणशब्देनाप्याविर्भवतिसुव्रताः २० यथापरतरःशंभुर्द्विधाशक्तिशिवात्मना तथैवमातृकादेवीद्विधाभूताभवेत्स्वयं एकाकारेणशक्ते
स्तुवाचकश्चेतरेणतु शिवस्यवाचकःसाक्षाद्द्वियेयंपदगामिनी २२ अपदंपदमापन्नंपरंवाथपरंभवेत् पदापदविभागंचयःपश्यतिसपश्यति ६

र्ल.

पदस्यस्यजितामंत्राभवेयुःपंडितोत्तमाः पदाभ्यासपराणांतुनकिंचिदपिदुर्लभं २४ अंशएकःपदस्यायमुपकारायदेहिनां भवेत्षोडशधापूर्वंपंचधा[illegible]
चद्विधापुनः यदस्यांशोपरःपूर्वोद्भवात्रिंशद्भेदमाप्नुयात् त्रयस्त्रिंशत्पुनर्भेदंतथैवद्विविधंभवेत् २६ एवंलोकोपकारायपदंबहुविधंभवेत् एकैकाक्ष
रतश्चैकेकार्यसिद्धिर्भवेत्स्वतः वैदिकान्केचनाकारानुपजीवंतिसिद्धयेतांत्रिकांश्चतथाकारानुपजीवंतिसिद्धयेकेचन २८ लौकिकानपिचाकारानुप
जीवंतिकेचन यथासर्वेमहादेवमुपजीवंतिसर्वदा यथावाशक्तिमीशस्ययथावाभूतपंचकं तथासर्वेपदाकारानुपजीवंतिसर्वदा ३० मातृका
परमादेवीस्वपदाकारभेदिता वैखरीरूपतामेतिकरणैर्विशदास्वयं स्थूलासूक्ष्मासुसूक्ष्माचत्रिविधामातृकेश्वरी सादेवीशक्तिसंभिन्नाशिवस्यामि
ततेजसः ३२ वाचामगोचराकारोमातृकायास्तथापरः ब्रह्मविष्ण्वादिदेवानामचिंत्यःसूक्ष्मतावधिः चिन्मयःपरचिद्रूपःशिवासभिन्नएवहि बुध्वा
मंत्रजपंकुर्यादेवमंत्रस्यवैभवं ३४ आचार्यमुखतःप्राज्ञाःसिद्ध्यत्येवाचिरेणतु आचार्यरहितोमंत्रःपुंसोनर्थस्यकारणं ३५ इतिश्रीसूतसंहितायांयज्ञ
वैभवखंडेचतुर्थोध्यायः सूतउ० प्रणवंसंप्रवक्ष्यामिसमासेननविस्तरात् परापरविभागेनप्रणवस्तुद्विधामतः १ परःपरंतरंब्रह्मप्रज्ञानंदादिलक्षणं र
प्रकर्षेणनवंयस्मात्परंब्रह्मस्वभावतः अपरःप्रणवःसाक्षाच्छब्दरूपःसुनिर्मलः प्रकर्षेणनवत्वस्यहेतुत्वात्प्रणवःस्मृतः ३ परमप्रणवप्राप्तिहेतुत्वात्

स॰प॰मे॰ एवोथवा पुराप्रजापतिः साक्षाद्रुद्रंयाचस्यासह ५ भस्मोद्धूलितसर्वांगस्त्रिपुंड्रांकितमस्तकाः जितेंद्रियो जितक्रोधो जटावल्कलसंयुतः सदापंचा
७ ग्निमध्यस्थः सावधानपरायणः ततापपुरमं घोरं तपः संवत्सरत्रयं ६ स पुनः शंकरस्यास्य प्रसादाद्दंविकापतेः पृथिवीमंतरिक्षं च स्वर्गं चासृजदात्ति
काः स तानभ्यतपल्लोकांस्तेभ्यो वेदविदांवरः त्रीणि ज्योतींषि जायंत पृथिव्या एव तत्तु ८ अजायताग्निर्वायुश्चान्तरिक्षतः दिवो दिवाकरः
साक्षाज्जगच्चक्षुरजायत तानि चाभ्यतपज्ज्योतींष्यजस्तेभ्यो महाद्द्विजाः त्रयो वेदा अजायंत वेदानां प्रथमो नलान् १० यजुर्वेदस्तथा वायोरादित्यात्सा
मसंज्ञितः वेदानभ्यतपत्तांश्च ब्रह्मा तेभ्यो महाद्द्विजाः त्रीणि शुक्राण्यजायंत तत्र ब्रह्मविदांवराः ऋग्वेदाद्देव भूस्तद्वद्यजुर्वेदाद्भुवस्तथा १२ सामवे
१५ दात्सुवस्तानि शुक्राण्यतपत्स प्रभुः तथा तेभ्यो मितेभ्यस्त्रयो वर्णा द्विजोत्तमाः अजायंत क्रमेणैव कोदिस्स सर्वसमप्रभाः अकारश्च तथोकारो मकारश्चेति
सुव्रताः १४ तानेकधा समभरद्ब्रज ओमित्यति प्रभुः तस्मिंस्त्रेति शिवः सांबः सर्ववस्त्ववभासकः प्रतिबिंबितवांस्तेन प्रणवस्तस्य वाचकः तप्तलोहं
दिवच्छंभोरभेदात्प्रणवोपि सः १६ सर्वावभासको नित्यप्रभवत्यंदितोत्तमाः ज्ञानार्थे ज्ञातमित्येवं वक्तव्ये सति तद्द्विना ओमिति प्राह लोकोयं तेन ज्ञात
स्य वाचकः अज्ञातार्थे तथाज्ञानमिति भाषे तु वाचके १८ ओमिति प्राह लोकोयं तेनाज्ञानस्य वाचकः संदिग्धार्थे तु संदिग्धमिति भाषेतु वाचके ओमि ७

ति प्राह लोकोयं तेन संदिग्धवाचकः आकाशादिपदार्थानां ये शब्दा वाचका भुवि २० विनातानखिलान्शब्दान्लोक ओमिति भाषते अतः प्रयोगबाहुल्यात्
घटकुड्यादिशब्दवत् आकाशादिपदार्थानां वाचकः प्रणवः स्मृतः सर्वावभासकत्वेन ब्रह्मणा सदृशः स्मृतः २२ सर्वावभासकं मंत्रमियं जपति यो द्विजाः
सर्वमंत्रजपस्योक्तफलं स लभते चिरात् अतः सर्वं परित्यज्य सदा मंत्रमिमं जपेत् ऋषिर्ब्रह्मास्य मंत्रस्य गायत्रं छंद उच्यते २४ परमात्माभिधः शंभुर्देव
ता परिकीर्तिता अकारो बिंदुसंयुक्तः शक्तिस्तैरं द्विजोत्तमाः उकारश्च मकारश्च हृदयं बीजं प्रकीर्तितं मोक्षार्थे विनियोगोस्य प्रोक्तो वेदांतवेदिभिः २६ अग्निश्च
वायुः सूर्यश्च वर्णानां मुनयः क्रमात् गायत्री च तथा त्रिष्टुप् बृहती च यथाक्रमं छंदांसि ब्रह्मविच्छ्रेष्ठा वर्णानां च यथाक्रमं ब्रह्मा विष्णुश्च रुद्रश्च वर्ण
नां देवताः क्रमात् २८ रक्तं शुक्लं चेतरं चक्रमाद्वर्णा उदाहृताः जाग्रत्स्वप्नः सुषुप्तिश्चावस्थाः प्रोक्ता यथाक्रमं भूम्यंतरिक्षस्वर्गाश्च स्थानानि क्रमशो वि
दुः उदात्तप्रमुखा विप्राः स्वराः प्रोक्ता मनीषिभिः ३० ऋग्यजुःसामसंज्ञाश्च वेदाः प्रोक्ता यथाक्रमं अग्नयो गार्हपत्याग्निर्दक्षिणाग्निस्तथैव च
प्रोक्तश्चाहवनीयाग्निर्वर्णानां क्रमशो द्विजाः प्रातर्मध्यंदिनं सायं कालाः प्रोक्ता यथाक्रमं ३२ रजः सत्वं तमश्चैव गुणाः प्रोक्ता यथाक्रमं सृष्टिस्थितिश्च
संहारः क्रियाः प्रोक्ता यथाक्रमं उत्पत्तौ च स्थितौ नाशे विनियोगा उदाहृताः अंगुष्ठादिकनिष्ठांतमंगुलीनां च संधिषु ३४ क्रमाद्वर्णत्रयं न्यासः कर्तव्यः सिद्धि

सू.प.भं. मिकना अंगुलीषुचसर्वासुप्रणवन्यासईरितः भूरग्न्यात्मनइत्यादिमंत्राश्चक्रमशोद्विजाः विन्यसेत्व्यश्चसिध्यर्थमंगुलीषुद्विजन्मना ३६ क्रमा
८ द्धृदयंन्यासोनाभौहृदिचमूर्द्धनि कर्तव्यःसर्वयत्नेनप्रणवेनतथैवच हृदयादिप्रदेशेषुक्रमेणैवद्विजोत्तमाः भूरग्न्यात्मनइत्यादिमंत्राणांन्यासईरि
तः ३८ एवंन्यस्यविधानेनध्यात्वासावित्रियंबकं जपेन्मंत्रवरंभक्त्यालक्षाणांदशकंद्विजाः ततःसिध्यतिमंत्रोयंसत्यमेवनसंशयः षट्कर्मा
णिप्रसिद्ध्यंतित्वथैवाष्टविभूतयः ४० अपवर्गःस्वतःसिद्धःपापैःसर्वैःप्रमुच्यते सर्वविद्यालयोभूत्वायथेप्सफलमाप्नुयात् ४१ इतिश्रीसूतसं
हितायांयज्ञवैभवखंडेप्रणवविवरणंनामपंचमोध्यायः सूतउवाच सावित्रीमथवक्ष्यामिव्याहृत्याशिरसासह भूरादिव्याहृतीनांतुमुनयःप
रिकीर्तिताः अत्रिर्भृगुश्चकुत्सश्चवसिष्ठोगौतमस्तथा काश्यपश्चांगिराश्चेतिक्रमेणमुनिपुंगवाः २ व्याहृतीनांक्रमेणैवछंदांसिकथितानितु दे
वीगायत्रमाद्यंस्यादुष्णिहातदनंतरं अनुष्टुप्बृहतीपंक्तिस्त्रिष्टुप्चजगतीतथा अग्निर्वायुस्तथार्कश्चवागीशोवरुणस्तथा ४ इंद्रश्चविश्वेदे
वाश्चक्रमेणैवतुदेवताः व्याहृतीनांतुसर्वत्रविनियोगःप्रकीर्तितः ५ विश्वामित्रोमुनिःछंदोगायत्रंदेवतारविः सावित्र्यावेदवित्प्रश्रेष्ठाः शि
वएवाधिदेवता ६ त्रिपदासातुसावित्रीविज्ञेयाब्रुवतैश्चतुष्पदा जपेसात्रिपदाज्ञेयाहुज्ञायांसाचतुष्पदा ओमापोज्योतिरित्येतद्गायत्र्याशिरउत्तमं ८

ऋषिर्ब्रह्मास्यमंत्रस्यछंदोनुष्टुप्प्रकीर्तितं ८ देवतापरमात्मैवप्रोक्तोवेदार्थवेदिभिः यथेष्टसाधनेचास्यविनियोगाउदाहृताः सावित्री
त्रिपदाज्ञेयाषट्कुक्षिःपंचशीर्षका अग्निवर्णमुखाप्रोक्तापुंडरीकदलेक्षणा १० ऋग्यजुःसामरूपाश्चपादाअस्याःप्रकीर्तिताः पूर्वदिक्प्रथमा
कुक्षिर्द्वितीयादक्षिणामता पश्चिमादिकृत्तीयाचचतुर्थीचोत्तरामता ऊर्ध्वादिक्पंचमःकुक्षिःषष्ठ्यधोदिक्प्रकीर्तिता १२ अष्टादशपुराणानिनाभिरस्या
मुनीश्वराः जगच्छरीरंसावित्र्याआकाशमुदरांतरं स्तनौछंदांसिहृदयेधर्मशास्त्रमकल्मषं बाहवोन्यायशास्त्रंतुकर्णौसांख्यद्वयंतथा १४ शिक्षाद्यं
गानिशीर्षाणिवक्त्रमग्निर्महाद्युतिः मीमांसालक्षणंतस्याश्चेष्टाचाथर्वणीश्रुतिः ब्रह्मास्त्रंशिखारुद्रोविष्णुरात्माप्रकीर्तितः तस्याःसूक्ष्मश
रीरंतुशास्त्रंवेदांतसंज्ञितं १६ अंतर्यामीशिवःसाक्षात्सांबश्चंद्रार्द्धशेखरः स्वशरीरेतुसावित्रींविन्यसेदक्षरक्रमात् पादांगुष्ठेतुगुल्फेतुजंघेजानुप्र
देशके ऊरुदेशेचगुह्येचवृषणेचतथैवच १८ कटिप्रदेशेनाभौचजठरेस्तनयोर्हृदि कंठेचवदनेतालौनासिकायांचचक्षुषोः भ्रुवोर्मध्येलला
टेचपूर्ववक्त्रेतथैवच दक्षिणेपश्चिमेचैवतथैवब्राह्मणोत्तमाः २० ब्रह्मरूपात्मनस्तस्मादेतस्माच्छक्तिमिश्रितात् ३४ अपंचीकृतआकाशःसं
भूतोरज्जुसर्पवत् आकाशाद्वायुसंज्ञस्तुस्पर्शोपंचीकृतःपुनः ३५ वायोरग्निस्तथाचाग्नेरापअद्भ्योवसुंधरा तानिभूतानिसूक्ष्माणिपंची

सू०ब्र०गी०
८

हृत्यशिवाज्ञया ३६ तेभ्यएव सुराः सृष्टं ब्रह्मांडाख्यमिदं मया भुवनानि विशिष्टानि निर्मितानि शिवाज्ञया ३७ ब्रह्मांडस्योदरे देवा देवाश्च विविधा
अमी देवादयो मनुष्याश्च तथा पश्वादयो जनाः ३८ तत्तत्कर्मानुरूपेण मया सृष्टाः शिवाज्ञया अस्थिस्नाय्वादिरूपं च शरीरं भाति देहिनां ३९ तस्मात्प्रा
णमयो ह्यात्मा विभिन्नश्चांतरो यतः योयं प्राणमयो ह्यात्मा भाति सर्वशरीरिणां ४० ततो मनोमयो ह्यात्मा विभिन्नश्चांतरः स्वतः योयं मनोमयो ह्यात्मा
भाति सर्वशरीरिणां ४१ विज्ञानमय आत्मा च ततोन्यश्चांतरो यतः विज्ञानमय आत्मा यो विभाति सकलात्मनां ४२ आनंदमय आत्मा च ततोन्य
श्चांतरो यतः योयमन्नमयः सोयं पूर्णः प्राणमयेन तु ४३ मनोमयेन प्राणोपि तथा पूर्णस्वभावतः तथा मनोमयो ह्यात्मा पूर्णो ज्ञानमयेन तु ४४
आनंदेन सदा पूर्णस्तथा ज्ञानमयः सुराः तथानंदमयश्चापि ब्रह्मणान्येन साक्षिणा ४५ सर्वांतरेण संपूर्णो ब्रह्मणा नान्येन केनचित् यदिदं ब्रह्म
पुच्छाख्यं सत्यज्ञानाद्वयात्मकं ४६ सारसः सर्वदा साक्षान्नान्यथा सुरपुंगवाः एतमेव रसं साक्षाल्लब्ध्वा देही सनातनं सुखी भवति सर्वत्र नान्यथा सुरसत्त
माः असत्यस्मिन्परानंदे स्वात्मभूतेखिलात्मनां ४८ को जीवति नरो देवाः को वा नित्यं विचेष्टते तस्मात्सर्वात्मतां चित्ते भासमानो रसो हरः आ
नंदयति दुःखाढ्यं जीवात्मानं कृपाबलात् यदा ह्येवैष एतस्मिन्नदृश्यत्वादिलक्षणे निर्भेदं परमेकत्वं विंदते सुरसत्तमाः ५० तदैवाभयमत्यंतं क
८

ल्याणं परमामृतं स्वात्मभूतं परं ब्रह्म सत्यानित्यसर्गवासिनः ५१ नाभिकंदे समौ कृत्वा प्राणापानौ समाहितः मस्तकस्थामृतस्वादं पीत्वा ध्या
नेन सादरं ३३ दीपाकारं महादेवं ज्वलंतं नाभिमध्यमे अभिषिच्यामृतेनैव हंसहंसेति योजयेत् ३४ जरामरणरोगादि न तस्य भुवि विद्यते
एवं दिने दिने कुर्यादणिमादिविभूतये ईश्वरत्वमवाप्नोति सदाभ्यासपरः पुमान् बहवोनेन मार्गेण प्राप्ता नित्यत्वमास्तिकाः ३६ हंसविद्यामृ
ते लोके नास्ति नित्यत्वसाधनं यो ददाति महाविद्यां हंसाख्यां पारमेश्वरीं तस्य दास्यं सदा कुर्यात्प्रज्ञया परया सह शुभं वाशुभमन्यद्वा यदु
सं क्तं गुरुणा भुवि ३८ तत्कुर्यादविचारेण शिष्यः संतोषसंयुतः हंसविद्यामिमां लब्ध्वा गुरोः शुश्रूषया नरः आत्मानमात्मना साक्षाद्ब्रह्म बुध्वा सु
निश्चलः देहजात्यादिसंबंधान्वर्णाश्रमसमन्वितान् ४० वेदान् शास्त्राणि चान्यानि पदपांसुमिव त्यजेत् न गुरुं संत्यजेन्नित्यं जानन्नस्य
कृतं नरः गुरुभक्तिं सदा कुर्याच्छ्रेयसे भूयसे नरः गुरुरेव शिवस्तस्य नान्य इत्यब्रवीच्छ्रुतिः ४२ श्रुत्या यदुक्तं परमार्थमेव तत्र संशयो नात्र ततः
समस्तं श्रुत्याविरोधे च भवेत्प्रमाणं नो चेदनर्थाय न च प्रमाणं ४३ इति श्रीसूतसंहितायां यज्ञवैभवखंडे हंसविद्याविवरणं नाम सप्तमो
ध्यायः सूत उवाच षडक्षरं प्रवक्ष्यामि समासेन सुशोभनं येन संसारविच्छित्तिर्ब्रह्मेंद्रादिविभूतयः १ ऋषिर्ब्रह्मास्य मंत्रस्य गायत्रं

सू॰यम॰ छंद उच्यते देवतास्यशिवःसाक्षात्सत्यज्ञानसुखादयः २ शक्तिर्माहेश्वरीसाचभुवनेशाक्षरंभवेत् बीजंमायाविशिष्टास्तुशिवःद्वेर्वोकल
१० क्षणः सोपिनत्छन्दएवस्यान्न्यासःपंचाक्षरैःक्रमामात् अंगुष्ठादिकनिष्ठांतंविन्यसेदक्षरंक्रमात् ४ मस्तकेचललाटेचहृदिनाभौपदद्व
ये पुनःपंचाक्षरैरेवपंचांगंविन्यसेत्क्रमात् प्रणवंप्रथमंविद्याद्द्वितीयंतुनकारकंमकारंतत्परंविद्याच्छिकारंतुततःपरं ६ वकारंपंचमंविद्या
द्यकारंषष्टमेवच इत्यंषडक्षरंविद्याज्जाबालोपनिषद्गतं मंत्रःसांगःसमाख्यातोमंत्रार्थःकथ्यतेधुना सत्यज्ञानपरानंदस्वरूपस्यशिवस्य
तु ८ असंवृत्तया शिवस्यायंशिवशब्दस्तुवाचकः नमःशब्दोनमस्कारवाचकःपरिकीर्तितः प्रह्वतालक्षणःप्रोक्तोनमस्कारःपुरातनैः प्रह्व
तानामजीवस्यशिवात्सत्यादिलक्षणात् १० भेदेनभासमानस्यमाययानस्वरूपतः संबंधएवतेनैवसोपितादात्म्यलक्षणः ११ नित्यसिद्धःशि
वःसाक्षात्स्वरूपःसर्वदेहिनां तस्माद्भुत्सोजीवस्यनोपादेयंहितंसदा १२ नहेयमहितंतद्वत्स्तनोनमतीतितः एवंविद्यात्प्रकारार्थमकारा
र्थउदीर्यते मकारोममशब्दार्थोलुप्तस्तेकोमकारकः व्यावहारिकदृष्ट्यायंनमस्कारप्रकीर्त्यते १४ तस्माच्चतुर्थीशब्दस्तुप्रोच्यतेनेनहिवस्तुतः
ॐकारशब्दःसर्वार्थवाचकःपरिकीर्तितः प्रयोगादेवसर्वत्रसर्वार्थःशिवएवहि तस्माच्छिवस्यप्रणवस्यप्रणवोवाचकःस्मृतः १६ वाच्यवाचकभा
वा॰ १०

वश्वरूपस्यलक्षणतापिच अन्योन्यतापिनास्त्येवपरमार्थनिरूपणे अभावादेवसर्वस्यशिवादन्यस्यसर्वदा अस्तिनास्तिप्रथाभातिनभातीत्यादिना
यया १८ कल्पितंचित्सुखानंतपरमात्मशिवात्मनि मायातत्कार्यमथास्माच्छिवात्सत्यादिलक्षणात् प्रत्यक्षसिद्धात्रास्त्येवपरमार्थनि
रूपणे अथकिंबहुनोक्तेनशिवादन्यत्नविद्यते २० शिवस्वरूपमेवाहुर्जगदेतद्विचक्षणाः सर्वस्वरूपमज्ञानाद्दृश्यतेनतुवस्तुतः २१
एषएवहिमंत्रार्थःसत्यंसत्यंनचान्यथा वेदाःसर्वेपुराणानिस्मृतयोभारतंतथा २२ अन्यान्यपिचशास्त्राणितर्कोश्चसर्वशः शैवाग
माश्चविविधाश्चागमावैष्णवाअपि २३ अन्यागमाश्चाविद्वाप्यमनुस्मृतिस्तथैवच अस्मिन्नर्थेस्वसंवेद्येपर्यवस्यंतिनान्यथा २४ बाध्यबा
धकतांयांतिव्यवहारेपरस्परं समुद्रेइवकल्लोलाइतिवेदार्थसंग्रहः २५ मंत्रार्थःकथितःकृत्स्नःपौरश्चर्याधुनाच्यते ता आचार्यमुखतो
मंत्रंज्ञात्वासार्थंसमाहितः २६ यथाशक्तिधनंतस्मैप्रदत्वातदनुज्ञया स्नानंत्रिषवणंकृत्वाभस्मनाशाकभाजनः २७ फलमूलाशनोवा
पिहविष्याशीयथाबलं पर्वताग्रेनदीतीरेसागरांतेशिवालये २८ वनेवानिर्भयेशुद्धेमाऽसुखोदङ्मुखोपिवा समाहितमनाभूत्वासु
खमासनमास्थितः २९ प्राणायामत्रयंकृत्वामुनिंछंदस्तथैवच देवताचतथाशक्तिंबीजंस्मृत्वामनोरपि ३० करन्यासंपुनःकृ

स्नानयांगन्यासमेवच पंचांगमपि विन्यस्य गुरुं स्मृत्वाभिवंद्य च ३१ हृत्पुंडरीकमध्ये तु सोमसूर्याग्निमंडले विद्युल्लेखेव कल्याणं ज्वलंतं चंद्र
११ रूपिणं ३२ शिवं ध्यात्वा जपेन्मंत्रं लक्षाणां षट् समाहितः तर्पयेल्लक्षमेकं तु जुहुयात्तु सहस्रकं आज्येन पयसा वापि पलाशकुसुमेन वा
ततः सिध्यति मंत्रोऽस्य भुक्तिमुक्तिफलप्रदः ३४ अथ वा सांबमीशानं श्रीसदाशिवमेव च [illegible]न्त्यमानं तथा देवं ध्यात्वा मंत्रं तु साधयेत् अथवाप्राह
त्मभावं स्वीयमुत्सृज्य सर्वदा शिवोऽहमिति संचिंत्य साधयेदिदमुत्तमं ३६ मंत्रस्य साधनं प्रोक्तं विनियोगः प्रकीर्त्यते नित्यं द्वादशसाहस्रं जपेद्वन्यास
माहितः सम्यग्ज्ञानं ध्रुवं लब्ध्वा संसाराब्धिं तरिष्यति लक्षपंचाशतं जप्त्वा कारणेश्वरमाप्नुयात् ३८ लक्षाणां तु शतं जप्त्वा साक्षाद्रुद्रत्वमाप्नुया
त् अशीतिलक्षं जप्त्वा तु नरो विष्णुत्वमाप्नुयात् षष्टिलक्षं जपेनैव लभते ब्रह्मणः पदं चत्वारिंशतिभिर्लक्षैर्विराडात्मानमाप्नुयात् ४० विं
शल्लक्षजपेनैव दीर्घमायुरवाप्नुयात् वह्वर्माणि प्रसिद्ध्यंति दशलक्षजपेन तु विनियोगसमाख्यातं पूजा देवस्य कीर्त्यते हृत्पद्मकर्णिका
मध्ये मंत्रेणानेन पूजयेत् ४२ अथवा मंडले सौरे चंद्रमंडलके थवा ता आसनं प्रथमं दद्या॰ अग्नौ वा प्रतिमायां वा शिवलिंगे प्रपूजयेत्
दद्यात्पाद्यं चैव त तःपरं ४४ आसनं प्रथमं दद्यादावाहनमनंतरं अर्घ्यं ततः परं पुनराचमनं दद्यात्स्नापयेत्तु ततः परं वासो दद्यात्पुनर्यज्ञोपवीतं भूषणिका मध्यात्कुर्या ११

दद्यात्पाद्यं चैव ततःपरं ४४

षणानि च गंधं पुष्पं तथा धूपं दीपं मोदनमेव च माल्यमालेपनं दद्यात् नमस्कृत्य विसर्जयेत् ४६ षडक्षरेण मंत्रेण सर्वं कुर्याद्विचक्षणः हृत्प
द्मकर्णिकामध्यात्कुर्यादावाहनं बुधः उद्वासनं च तत्रैव नरः कुर्यात्समाहितः सर्वसुक्तं समासेन नराणां भुक्तिमुक्तये ४८ तस्मात्सर्वं परित्य
ज्य षडक्षरपरो भवेत् षडक्षरेण सर्वाणि सिद्ध्यंत्येव न संशयः ४९ इति श्रीसूतसंहितायां यज्ञवैभवखंडे पंचाक्षरीविवरणं नाम षष्ठो
ध्यायः सूत उ० ध्यानयज्ञमथेदानीं प्रवक्ष्यामि समासतः शृणुत श्रद्धया युक्तं भुक्तिमुक्तिफलप्रदं १ परात्परतरं तत्त्वं ध्येयं सत्यास
नैव तु न स्वरूपेण साक्षित्वात् सत्त्वादिष्वपि चित्ततः २ भेदाभावाच्च भेदस्य भ्रमत्वादेव वस्तुतः उमार्द्धविग्रहा शुक्ला चंद्रार्धकृतशेखर
रा ३ नीलकंठी त्रिनेत्रा च प्रसन्नवदना शुभा वराभयहस्ता च विचित्रमुकुटोज्ज्वला ४ सर्वलक्षणसंपन्ना सर्वाभरणभूषिता स्वस्वरू
पानुसंधानप्रमोदा देवके वलात् महाताण्डवसंयुक्ता ब्रह्मविष्णुशिवादिभिः ध्येयाद्यंत विनिर्मुक्ता या मूर्तिः श्रुतिदर्शिता ६ सैवासाधार
णमूर्तिः परात्परतरस्य तु येऽपरापरमां मूर्तिं ध्यायंति हृदयांबुजे इमां ते परमां मुक्तिं प्रक्रमान्नैवं विंदति ज्ञानाज्ञानमहामाया लक्षणावि
[illegible]
द्यया सह ८ अभेदेन स्थितं विप्राः परात्परतरं परं सम प्रधानतयोपास्य तथैवासमधानतः ९ सम प्रधानरूपेणाथादरेण मनीषिभिः

१२ स्वप्रधानतयातत्त्वमुपास्तेशुद्धमानसः १० तथैवात्मकचिन्मात्रपरतत्त्वंद्विजोत्तमाः अस्वप्रधानरूपेणतथामर्त्यैस्तु मः ११ स्वप्र
धानरूपेणतत्त्वंध्यायन्तिसादरं जाड्याकारस्तुयःशक्तेस्तेनाभिन्नंपरंपदं १२ स्वप्रधानादिरूपेणत्रिधोपास्यंविचक्षणैः तथाशक्ते
स्तुयोज्ञानाकारस्तेनैकतांगतं परतत्त्वंत्रिधोपास्यंपरिज्ञानवतांवराः मायाकारैकतापन्नमपितत्त्वंमनीषिभिः १४ उपास्यंत्रिविधं
प्रोक्तंतथैवाविद्ययैवतु अभेदेनस्थितंब्रह्मत्रिधोपास्यंमनीषिभिः अन्येचशक्तेराकारायेविद्यंतेविचक्षणाः तैरप्येकत्वमाप
न्नंतत्त्वंतद्वन्मनीषिभिः १६ उपास्यंत्रिविधंनित्यमनात्मश्रद्धयासह ईशस्तूपाधिसंपन्नंपरतत्त्वमपिद्विजाः स्वप्रधानादिरूपेणत्रिधो
पास्यमतिप्रियात् सत्त्वंरजस्तमश्चेतिगुणायेब्रह्मशक्तिजाः १८ तैरप्येकत्वमापन्नंपरंब्रह्मयथाक्रमं रुद्रःप्रजापतिर्विष्णुरितिभेदस्तु
यैतिच तेजगन्नाशसर्गादेःकर्तारःकार्यरूपिणः उपास्यास्त्रिविधानित्यंतेपिसत्त्वमुपाधिभिः २० तैर्यद्धीतास्तथाविप्रामूर्तयस्त्रिप्रकार
तः चित्तपाकानुगुण्येनचिंतनीयामनीषिभिः अग्न्यादित्यादिदेवायेनिहीनामध्यमाःपराः तेचब्रह्मात्मनानित्यमुपास्याएवसाद
रं २२ शब्दस्पर्शादिसंज्ञायेपदार्थाःपंचतेपिच उपास्याब्रह्मरूपेणमहात्माज्ञैर्मनीषिभिः आकाशादीनिभूतानियानितानिमनीषिभिः १२

ब्रह्मरूपतयानित्यमुपास्यानिमनीषिभिः २४ भौतिकाअंडभेदाश्चब्रह्मरूपेणसादरं चिंतनीयाश्चविद्वद्भिर्वेदवेदांतपारगाः अंडमध्येस्थिता
लोकास्तेपिब्रह्मवित्तमाः ब्रह्मरूपतयानित्यमुपास्याएवसूरिभिः २६ लोकांतर्वर्तिनोदेशास्तेपिद्विजपुंगवाः ब्रह्मरूपतयानित्यमुपा
स्यामतिमत्तमैः २७ मेरुमंदरपूर्वाश्चपर्वताविविधाद्विजाः ब्रह्मरूपतयानित्यमुपास्यावेदवित्तमाः २८ नदीनदादयःसर्वेदेवर्ष्यादिविनिर्मिताः
ब्रह्मरूपतयानित्यमुपास्याःपुरुषोत्तमैः वापीकूपतडागाद्या अपिवेदपरायणाः ब्रह्मरूपतयानित्यमुपास्यानितपोधनैः समुद्राश्चसदावि
प्राःसमुद्रांतर्गताअपि संगमाअपिसद्ब्रह्मध्यातव्याएवकेवलं ३२ दिशश्चविदिशश्चैवदिवारात्रंतथैवच अनागतादयःकालाउपास्याब्रह्म
रूपतः अंडजंजारजंचैवस्वेदजंचोद्भिजंतथा ब्रह्मरूपतयानित्यमुपास्यामोहवर्जितैः ३४ ब्राह्मणाःक्षत्रियावैश्याःशूद्राअपिचसंकराः ब्रह्मरूपत
यानित्यमुपास्याएवसूरिभिः आश्रमाब्रह्मचर्याद्यास्तदाचारा अपिद्विजाः ब्रह्मरूपतयानित्यमुपास्याःपरमास्तिकैः ३६ महापातकपूर्वाणिपा
पानिसुबहूनिच ब्रह्मरू०मुपास्यानिमहत्तमैः धर्मसंज्ञाश्चयेविप्रा उत्तमाधममध्यमाः तेपिब्रह्मतयानित्यमुपास्याःपंडितोत्तमैः ३८ सुखं
दुःखंतयोर्भोगःसाधनंतस्यसुव्रताः ब्रह्म०सर्वमुपास्यंसत्यवादिभिः कर्ताकारयिताकर्मकरणंकार्यमेवच ब्रह्म०सर्वमुपास्यंचेतनेतन

सू॰ मैः ४० प्रमाताच प्रमाणंच प्रमेयं प्रमितिस्तथा ब्रह्म॰मुपास्यं मानमानिभिः विषयश्चनिषेधाश्च विधाविधेतथैव च ब्रह्म॰मुपास्यं वेदवे
दिभिः ४२ अबंध्याश्च तथा बंध्या वादाश्च विविधा अपि ब्रह्म॰मुपास्यं वाक्यवेदिभिः यद्यदस्ति तथा भाति यद्यन्नास्ति तथापि च तत्तद्ब्रह्मत
१३ यानित्यमुपास्यं ब्रह्मवित्तमैः ४४ इत्थं सर्वत्रयः साक्षाद्ब्रह्मोपास्ते सनातनं सयातिमिध्यानयज्ञेन साक्षाद्विज्ञानमैश्वरं ध्यानयज्ञस्य माहा
त्म्यं कल्पानां कोटिकोटिभिः मयामन्नोधिकैरन्यैरपि वक्तुं न शक्यते ४६ ध्यानयज्ञं विनामुक्तौयतंते मोहिता जनाः पायसान्नं परित्यज्य
भक्षयंति महाविषं ध्यानयज्ञं विना किंचित्कुर्वाणो मुक्तिसिद्धये अक्ष्णाविशब्दं गच्छति विनाश्रोत्रेण केवलं ४८ अन्यमेधादयो यज्ञा अशे
षा वेददर्शिताः मुनींद्राध्यानयज्ञस्य कलां नार्हंति षोडशीं ध्यानयज्ञपरो मर्त्यः शिव एव न चापरः ध्यानयज्ञैकनिष्ठस्य न किंचिदपि दुर्लभं
५० ध्यानयज्ञापराणां तु प्रसादं कुरुते शिवः शिवोपि साक्षात्सर्वज्ञः संसारविनिवर्तकः बहुनोक्तेन किं सर्वं समासेन मयोदितं कुरुध्वं वेदवि
न्मुख्या ध्यानयज्ञमशंकिताः ५२ इति श्रीसूतसंहितायां यज्ञवैभवखंडे नवमोध्यायः सूत उवाच अथेदानीं प्रवक्ष्यामि ज्ञानयज्ञ
स्य वैभवं ज्ञानयज्ञात्परो यज्ञो नास्ति विप्राः श्रुतौ स्मृतौ १ ज्ञानं बहुविधं प्रोक्तं वेदार्थज्ञानपारगैः स्वरूपमेकं विज्ञानं शिवस्य परमात्म १३

नः २ तदेव मायातत्कार्यभेदेन बहुधा भवेत् मायाकारेण संबद्धं जडशक्तेः शिवस्य तु ज्ञानमीश्वरसंज्ञं च नियंतृ जगतो भवेत् शक्तेरवि
द्याकारेण संबद्धं जीवसंज्ञितं ४ जीवसंज्ञं तु विज्ञानं द्विधा लोके व्यवस्थितं अर्थतो मुख्यमेकं तु ज्ञानमन्यत्स्वतीतितः अविद्याबद्धविज्ञा
नमर्थतो मुख्यमुच्यते स्थूलसूक्ष्मशरीराभ्यामवच्छिन्नं मतीतितः ६ स्वप्रचाराश्रयं चित्तं जीवरूपप्रकाशकं ज्ञानत्वहेतु जीवस्य दुःखि
त्वादेश्च कारणं प्रमाणभ्रांतिसंदेहाद्याकारेण मुनीश्वराः बहुरूपं भवेच्चित्तं कर्मविपाकतः ८ तत्तदाकारसंभिन्नं विज्ञानं मुनिपुंगवाः प्र
माणभ्रांतिसंदेहज्ञानमित्युच्यते नघाः अदुष्टकारणोत्पन्नविज्ञानं मुनिपुंगवाः प्रमाणज्ञानमित्युक्तं मुनिभिः सूक्ष्मदर्शिभिः १० दुष्टका
रणविज्ञानं भ्रांतिज्ञानं प्रचक्षते कोटिद्वयावलंबि स्यात्संदेहज्ञानमास्तिकाः इत्थमेवेदमित्येवं स्फुरणं बुधाः स एव निश्चयः प्रोक्तः सम्य
ग्दर्शनतत्परैः १२ ज्ञानस्यतेन संबंधः प्रामाण्यं कथितं मया प्रमाणज्ञानसामग्र्यः षण्मयाभिहिता बुधाः १३ तत्रैकाऽभावविज्ञानसामग्री
कथिता द्विजाः अन्यास्तु भावविज्ञानसामग्रीः परिकीर्तिताः १४ यद्योग्यानुपलब्ध्येवजन्यं विज्ञानमास्तिकाः तत्स्यादभावविज्ञानं धा
र्मिकावेदवित्तमाः इंद्रियोत्पन्नविज्ञानं प्रत्यक्षं परिभाषितं व्याप्तिजन्यपरिज्ञानमनुमानमितीर्यते १६ सादृश्यहेतुजं ज्ञानमुपमानमुदा

हतं अर्थापत्तिरितिप्रोक्तं विप्रा अनुपलब्धिजं तात्पर्याख्येन शब्दोऽस्य ज्ञानं शाब्दमुदाहृतं शब्दस्तु ब्रह्मविच्छ्रेष्ठास्त्रिविधः परिकीर्तितः १९ अक्षरा
१४ णि तथा विप्राः पदानि च तथैव च वाक्यानि चेति तत्रापि केषांचिद्द्विजपुंगवाः अर्थानामक्षराण्येव वाचकानि तथैव च अर्थानामपि के
षांचित्पदान्येव द्विजोत्तमाः २० वाचकानि च वाक्यानि तथैव ब्रह्मवित्तमाः अर्थानामपि केषांचित्प्रमाणानि प्रदीपवत् भवंत्येकाक्ष
राण्येव पदानि द्विजपुंगवाः अक्षराणि च संभूय पदानि स्युस्तथैव च २२ पदानां समुदायस्तु भवेद्वाक्यं द्विजोत्तमाः प्रधानं गुणभूतं च द्वि
विधं वाक्यमीरितं महावाक्यमिति प्रोक्तं प्रधानं मुनिपुंगवैः गुणभूतं तु यद्वाक्यं तदवांतरसंज्ञितं २४ उभयं चैकवाक्यं स्यादर्थैकत्वविवक्षया
पदानि शक्त्या स्वार्थानां वाचकानि तथैव च तात्पर्याद्देव वाक्यानि स्वार्थानां बोधकानि च तात्पर्यं तु द्विधा विप्राः प्रोक्तं वाक्यविशारदैः २६
महातात्पर्यमेकं स्यादवांतरमथेतरत् महातात्पर्यशेषस्यादवांतरसमाह्वयं तत्रैवं सति वाक्यानि कानिचित्संशितोत्तमाः निषेधरूपाण्ये
व स्युस्तथा विप्रास्तु कानिचित् २८ विधिरूपाणि चान्यानि कानिचिद्द्विजपुंगवाः सिद्धार्थबोधकान्येव तत्रैवं सति वाडवाः २९ कर्तव्यं
विषयाण्येव निषेधा विधयोऽपि च सिद्धार्थबोधकं वाक्यं लौकिकं वैदिकं तु वा ३० द्विप्रकारमिति प्रोक्तं मुनिभिः सूक्ष्मदर्शिभिः प्रमानमा
१४

णि परं चैकमपरं पंडितोत्तमाः निवृत्तस्यास्य तः साक्षाद्दोषस्यैव निवर्तकं प्रत्यक्षादि प्रमाणानि पंच च ब्राह्मणोत्तमाः ३२ कर्तव्यविषयं वाक्यमना
त्मविषयाणि तु परागर्थैकनिष्ठत्वात्स्वत्वाकारात्मवस्तुनः अतः प्रत्यक्षपूर्वैस्तु प्रमाणैरखिलैरपि प्रत्यगभूतः शिवो ज्ञातुं न शक्यः सर्वजं
तुभिः ३४ प्रत्यगात्मा शिवः साक्षान्न परागर्थ आस्तिकाः पराचीनस्य सर्वस्य ह्यनात्मत्वप्रदर्शनात् सिद्धार्थबोधकं वाक्यं लौकिकं किंचिदास्तिकाः
अनात्मविषयं तेन शिवो ज्ञातुं न शक्यते ३६ किंचित्सिद्धार्थकं वाक्यं लौकिकं श्रुतिपूर्वकं प्रत्यग्रूपे शिवे साक्षात्प्रमाणं भवति द्विजाः वेदांताना
महावाक्यं प्रत्यग्ब्रह्मैकतार्थकं ब्रह्मानंदशिवप्राप्तिसाधनं परिकीर्तितं ३९ तदेव भ्रांतिसिद्धस्य संसारस्य निवर्तकं आत्मा स्वभावतो बद्धो यदि स्याद्
द्विजोत्तमाः नैव मुच्येत संसाराज्जन्मांतरशतैरपि यस्माद्यो वेदविच्छ्रेष्ठाः स्वतो धर्मो न चान्यथा ४० धर्मिणा सह तन्नाशो भवत्येव न चान्यथा आत्मनो
नैव नाशोऽस्ति कदाचिदपि सुव्रताः ४१ यतो घटादेर्नाशस्तु दृष्टो विप्रा अनात्मनः आत्मभेदस्तथैवात्मब्रह्मभेदश्च सुव्रताः ४२ उपाधिने
व क्रियते न स्वतो मुनिपुंगवाः घटाद्युपाधिसंपर्कादाकाशस्य भिदा यथा एकमेवेति वेदांतास्तात्पर्येण महेश्वरं आहुश्चिद्रूपतो भेदश्चितो
नास्त्येव सर्वथा ४४ चेत्यरूपेण भेदस्तु चेत्यस्यैव चितो न हि आत्मभूतः शिवः साक्षाच्चिन्मात्रज्योतिरेव हि घटादीनां तु चेत्यानामना

त्मत्वस्य दर्शनात् आत्मनोपि स्वतो भेदमाहुः केचिन्मुनीश्वराः ४६ तत्प्रसंगतनेवस्यादात्माभेदस्य साधकः भेदसाक्षी शिवो ह्यात्मा कथं भिन्नो
 भवेद्द्विजाः ४७ अत आत्मनि भेदस्य भ्रांतिसिद्धो न वस्तुतः एकस्य न भवेद्भेदो यथा भ्रांत्या प्रतीयते ४८ यस्य यत्स्वत एव स्यात्तदन्यत्तस्य सुव्रताः
अन्योपाधिप्रयुक्तं स्यादिति लोके व्यवस्थितं ४९ अतः स्वतो द्वितीयस्य भेदो भ्रांतः परात्मनः अंगीकृत्य घटादीनां भेदं वेदार्थपारगाः ५० निरस्त
श्चात्मभेदस्तु घटादीनां भिदापि च भ्रांतिसिद्धा न सत्योक्तात्तर्कतश्च प्रमाणतः ५१ घटादीनां भिदा नात्र भ्रांत्यैव प्रतीतितः प्रतीत्या सत्यरूपे
व्यवहारे मुनीश्वराः ५२ स्वरूपत्वेन वा विप्रा धर्मत्वेनैव वा भिदा अविचार्यशतेनापि वस्तुतो न निरूप्यते ५३ अन्यतोन्यस्य भेदः स्यान्नैक
स्यैव सदा खलु अन्यत्वं वस्तुनो भेदे सिद्धे सिध्यति यौक्तिकं ५४ एकमेवाद्वितीयं सदित्याह श्रुतिरादरात् मायामात्रमिदं द्वैतमिति चाह परा श्रु
तिः एकत्वं पश्यतो मोहः कः शोक इति चाह हि द्वितीयाद्वै भयं नाल्पे सुखमित्यपि चाह हि ५७ अतस्तर्कप्रमाणाभ्यां वस्त्वैकत्वं सुनिश्चितं वि
दुषामनुभवाच्चैव वस्त्वैकत्वं सुनिश्चितं वस्त्वैकत्वं महावाक्यादेव जानंति ये जनाः ते मुक्ता एव हि संसारपाशात्सम्यक्प्रबोधनात् ५८ भेददर्शनमास्थाय
मुक्तिं वांछंति ये नराः ते महाघोरसंसारे पतंत्येव न संशयः ५९ सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि संपश्यन्नात्मयाजी स्यात्स्वाराज्यमधिग

च्छति ६० सर्वभूतानि संपश्यन्नात्मन्येव मुनीश्वराः संसारसागरादस्मादुत्तीर्णः स्यान्न संशयः बहवो द्वैतविज्ञानोद्विमुक्ता भवबंधना अद्वैतज्ञान
नयज्ञेन तु तुल्यो विद्यते क्वचित् ६२ द्वैतविज्ञानमासाद्य मुक्तिं वांछंति ये नराः ते महामोहसंसारसर्पदष्टा न संशयः आत्मयाथात्म्यविज्ञान
यज्ञं मुक्त्वा नराधमाः क्रियारूपेषु यज्ञेषु यतंते मायया वृताः ६४ ये लंघयंति संमूढं कर्मयज्ञं ततः ते महातमसा सर्वे पश्यंत्येव रविं विना ज्ञा
नयज्ञोडुपेनैव ब्राह्मणो वांत्यजोपि वा संसारसागरं तीर्त्वा मुक्तिपारं हि गच्छति ६६ अहो माहेश्वरं ज्ञानयज्ञवैभवमास्तिकाः अविज्ञा
य नरा लोके यतंते सारवर्जिते अपि देवा न जानंति ज्ञानयज्ञस्य वैभवं किं पुनर्मानवा विप्राः शिवो जानाति सर्ववित् ६८ सर्वधर्मसमोपे
ताः शिवभक्तिपरायणाः प्रसादादेव रुद्रस्य जानंति ज्ञानवैभवं प्रसादहीनैः पापिष्ठैर्मनुष्यैर्ब्राह्मणोत्तमाः ज्ञानयज्ञः परिज्ञातुं न शक्यः सर्व
साधनैः ७० ज्ञानयज्ञैकनिष्ठानां नानावार्यं विद्यते क्वचित् न हेयं विद्यते सर्वं ब्रह्मरूपेण भाति हि न मया शक्यते वक्तुं ज्ञानयज्ञस्य वैभवं मु
निभिश्च तथा देवैस्तथान्यैरपि जंतुभिः ७२ श्रुत्वा शिवेन वा विप्रा ज्ञानयज्ञस्य वैभवं कथंचिदुच्यते वक्तुं सत्यमेव न संशयः ७३ इति श्रीसू
तसंहितायां यज्ञवैभवखंडे दशमोध्यायः सूत उ॰ भूयोपि ज्ञानयज्ञं तु प्रवक्ष्यामि समासतः महाप्रीत्या मुनिश्रेष्ठाः शृणुतानंदसिद्ध

ये १ धर्माधर्मास्तिताबुद्धिर्येषामस्तिमुनीश्वराः तेपिविज्ञानसंपन्नाइतिमेनिश्चितामतिः २ धर्माधर्मफलास्तित्वज्ञानंयेषांहृदिस्थि
तं तेपिवि० ३ श्रुतिस्मृत्यादिविश्वासोयेषामस्तिसदाहृदि तेपिवि० ४ परलोकास्तिताबुद्धिर्येषामस्तिमुनीश्वराः तेपिवि० ५ यमतत्किं
करास्तित्वज्ञानंयेषांहृदिस्थितं तेपिवि० ६ भूतप्रेतादिसद्भावज्ञानंयेषांहृदिस्थितं तेपिवि० ७ यज्ञरक्षादिसद्भावोयेषांभातिप्रमाण
तः तेपिविज्ञान० ८ मुनीनामस्तिताबुद्धिर्येषामस्तिमुनीश्वराः तेपि० ९ इंद्रादिदेवतास्तित्वंयेषांचित्तेप्रकाशते तेपि० १० ब्र
ह्माविशिष्टोदेवानामितिजानंतियेजनाः तेपिवि० ११ ब्रह्मणोविष्णुमुत्कृष्टंयेजानंतिप्रमाणतः तेपिवि० १२ विष्णोर्विशिष्टंरुद्रंयेविजानंति
प्रमाणतः तेपिवि० १३ रुद्रादीश्वरमुत्कृष्टंयेजानंतिसुनिश्चितं तेपिवि० १४ ईश्वरादधिकोभातियेषांचित्तेसदाशिवः तेपिवि० १५
सदाशिवादपिश्रेष्ठंब्रह्माणंयेजनाविदुः तेपिवि० १६ ब्रह्मणःपरमंसाक्षाद्विष्णुंजानंतियेजनाः तेपिवि० १७ विष्णोरपिपरंसाक्षाद्रुद्रं
जानंतियेजनाः तेपिवि० १८ ईक्षितारंपरंरुद्राद्येविजानंतिमानवाः तेपिवि० १९ ईक्षितुर्येविजानंतिसर्वज्ञंनितरांपरं तेपिवि० २०
कारणंब्रह्मसर्वेषांविशिष्टमितियेविदुः तेपिवि० २१ कारणत्वोपलक्ष्यंयेसर्वोत्कृष्टंशिवंविदुः तेपिवि० २२ अस्तिजीवोननास्तीतियेजा १६

नंतिप्रमाणतः तेपिवि० देहादन्यतयाजीवंयेजानंतिप्रमाणतः तेपिवि० २४ प्राणादन्यतयात्मानंयेजानंतिप्रमाणतः तेपिवि०
२५ इंद्रियेभ्यःपरंजीवंयेजानंतिप्रमाणतः तेपिवि० २६ मनसोन्यतयात्मानंयेजानंतिप्रमाणतः तेपिवि० २७ क्षणप्रध्वंसि
विज्ञानादात्मानंयेपरंविदुः तेपि० २८ दुःखाहंकारतोजीवंयेविदुर्भिन्नमास्तिकाः तेपि० २९ चित्तादन्यतयात्मानंतिप्रमाणतः तेपिवि०
३० सर्वप्रत्ययिनोजीवंविभक्तंयेविदुर्बुधाः तेपिवि० ३१ जाग्रत्स्वप्नप्रभावंवेदधामत्रयंतुयः सएवात्मानतद्दृश्यंदृश्यंतस्मिन्प्रकल्पि
तं ३२ त्रिधामसाक्षिणंसत्यज्ञानानंदादिलक्षणं त्वमहंशब्दलक्ष्यार्थमसक्तंसर्वदोषतः ज्ञाताज्ञातद्वयादन्यंज्ञाताज्ञातस्यभासकं प्र
माणभ्रांतिवृत्तीनामगम्यंतत्प्रकाशकं ३४ स्वयंभातंनिराधारंयेजानंतिसुनिश्चितं तेपिविज्ञानसंपन्नाइतिमेनिश्चितामतिः उक्त
लक्षणमात्मानमुक्तलक्षणमीश्वरं एकंपश्यंतियेविप्रास्तर्कतश्चप्रमाणतः ३६ तथास्वानुभवेनैवगुरूणांचप्रसादतः तएवज्ञानसंपन्ना
स्त्विर्वःशपथयाम्यहं ३७ अतिरहस्यमिदंकथितंमयागुरुपरंपरयाचसमागतं श्रुतिशिरोरितमात्मविशुद्धयेनपठितव्यमसज्जनसं
सदि ३८ इतिश्रीसूतसं० यज्ञ० एकादशोध्यायः सूतउ० भूयोविज्ञानयज्ञंतुप्रवक्ष्यामिसमासतः मुनयःपरयाभक्त्याशृणुतातीव

सू॰ य॰ वै॰ शोभनं ब्रह्मसत्यपरानंदप्रकाशानंतलक्षणं अप्रच्युतात्मभावेनसंस्थितंसर्वदैवतु २ आत्मशक्तिसमायोगादनाद्यंतादतर्कितात् अ
१७ प्रतीतमिवाभातिस्वयंभातमपिद्विजाः सदप्यसदिवप्राज्ञः सदेकमपिभिन्नवत् तादृशाकारमापन्नसंसारीवावभासते ४ ब्रह्मणो
भिन्नरूपेतुचेतनाचेतनाचेतनात्मकः विभागःकल्पितःशक्त्यानस्वतःपंडितोत्तमाः ब्रह्मणश्चेतनाकारेकल्पिताचेतनाभिदा ।
सर्वज्ञत्वादिकासत्त्वपर्यंतामाययैवतु ६ उत्कर्षश्चापकर्षश्चमाययात्तेषुकल्पितः नियंतृत्वनियम्यत्वाद्याकाराश्चप्रकल्पिताः ब्रह्मणो
चेतनाकारेमहामायाबलेनतु महदादिजगच्छून्यपर्यंतंपरिकल्पितं ८ उत्कर्षश्चापकर्षश्चजगत्यपिमुनीश्वराः कल्पितःसर्व
तोद्रिक्तंव्यवहारेतुमायया वर्णास्तथाश्रमाविप्रावर्णानांकर्ममेवच तद्धर्माश्चविभागेनमाययैवप्रकल्पिताः १० नियोज्यत्वंचक
र्तृत्वंभोक्तृत्वंचतथैवच वर्णाश्रमादिनिष्ठानांमाययैवप्रकल्पितं विधयश्चनिषेधाश्चश्रुतिस्मृत्यादिरूपिणः मायया देवदे
वस्यसत्यवत्परिकल्पिताः १२ धर्माधर्मौनयोर्विप्राःफलेतत्साधनान्यपि कल्पितानिमहामोहाब्रह्मणोनस्वभावतः रागद्वेषादयो
दोषाःशांतिदांत्यादयोगुणाः अणिमाद्यैश्वर्यंज्ञानंमाययैवप्रकल्पितं १४ वैदिकास्तांत्रिकामार्गाअपभ्रंशास्तथैवच स्वतंत्रस्यांविका १७

भर्तुर्माययैवप्रकल्पिताः यद्यदस्तितथाभातियद्यन्नास्तितथातथा तत्तत्सर्वंमहादेवमाययापरिकल्पितं १६ चेतनाचेतनाकारेब्रह्मणोयौ
प्रकल्पितौ तौशिवादन्यतोनस्तःसम्यगर्थनिरूपणे सर्वज्ञत्वादिकाभेदास्तंबांतायेप्रकल्पिताः तेशिवादन्यतोनिसंनसंत्येवनिरूपणे १८ उत्कर्ष
श्चापकर्षश्चयस्तेषुपरिकल्पितः सोपिनैवास्तिभेदेनशिवात्सम्यङ्निरूपणे ब्रह्मणोचेतनाकारेकल्पितंयज्जगद्बुधाः तच्चनैवास्तिभेदेनशिवा
यो त्सम्यङ्निरूपणे २० उत्कर्षश्चापकर्षश्चजगत्यपिकल्पितः सोपिनैवास्तिभेदेनशिवा॰ २१ वर्णाश्रमादयोभावामाययायेप्रकल्पिताः तेपिशंभो
र्नभेदेनसंतिसम्यङ्निरूपणे २२ नियोज्यत्वादयोभावामाययायेप्रकल्पिताः तेपिशं॰ २३ विधयश्चनिषेधाश्चमाययायेप्रकल्पिताः तेपिशं॰ २४
धर्माधर्मादिरूपेणमाययायेप्रकल्पिताः तेपिशं॰ २५ रागद्वेषादिरूपाश्चमाययायेप्रकल्पिताः तेपिशं॰ २६ वैदिकास्तांत्रिकामार्गाअपभ्रंशाश्च
येद्विजाः तेपिशं॰ २७ यद्यदस्तितथायद्यन्नास्तिवस्तुमुनीश्वराः तत्तच्छंभोर्नभेदेनविद्यतेसत्यदर्शने २८ अतश्चसंक्षेपमिमंशृणुध्वंजगत्समस्तं
चिदचित्प्रभिन्नं स्वशक्तिकॢप्तंशिवमात्रमेवनदेवदेवात्पृथगस्तिकिंचित् २९ इतिश्रीसूतसंहितायांयज्ञवैभवखंडेद्वादशोध्यायः सूतउ॰ भयो
पिज्ञानयज्ञंतुप्रवक्ष्यामिसमासतः गुह्याद्गुह्यतमंसत्यंशृणुतश्रद्धयाद्विजाः १ चिन्मात्राश्रयमायायाःशक्त्याकारेद्विजोत्तमाः अनुपविश

स्.पं.दे

यासंविन्निर्विकल्पास्वयंप्रभा २ सदाकरापरानंदासंसारोच्छेदकारिणी सा शिवापरमादेवीशिवाभिन्नाशिवंकरी ३ जगत्कारणमापन्नः शिवोयोमु
नि निसत्तमाः सातस्याशीभवेच्छक्तिस्तयाहीनोनिरर्थकः ४ सर्वज्ञत्वंगतोयस्तुशिवःसाक्षादुपाधिना सातस्या० ५ ईशित्वंगतोयस्तुशिवः० सा
तस्या० ६ यस्तुरुद्रत्वमापन्नःशिवः०सातस्या० ७ यस्तुविष्णुत्वमापन्नःशिवः० सातस्या० ८ यस्तुब्रह्मत्वमापन्नःशिवः सातस्या
९ सदाशिवत्वंयःप्राप्तःशिव सातस्या १० ईश्वरत्वंगतोयस्तुशिवं०साम०११ हिरण्यगर्भत्वंयस्तुशिवः० सात० १२ सूत्रा
त्मत्वंतथायस्तुशिवःप्राप्त० सात० १३ विराड्रूपंगतोयस्तुशिवः० सातस्या० १४ स्वराड्रूपंगतोयस्तुशिवः० सातस्या १५
सम्राड्रूपंगतोयस्तुशिवः०सातस्या० १६ इंद्रादिलोकपालानांरूपंयःप्राप्तवांछिवः सातस्या० १७ देवादीनांगतोयस्तुरूपं
शंभुरुपाधिना सातस्या० १८ मनुष्यत्वंगतोयस्तुशिवः ० सातस्या० १९ तिर्यगादिस्वरूपंयःशिवः०सातस्या० २० ओ
षधीनांस्वरूपंयःशिवः०सातस्या० २१ वनस्पतीनांरूपंयःशिवमाप्त०० सातस्या० २२ भक्ष्यभोज्यादिरूपंयःशिवप्राप्त०
सातस्या०२३ नदीनदादिरूपंयःशिवःप्रा० सातस्या० २४ पर्वतादिस्वरूपंयःशिवःप्रा० सातस्या० २५ समुद्ररूपंयःप्रा १८

पु
तःशिवःसाक्षा० सातस्या० २६ विष्णुरूपंगतोयस्तुशिवःसा० २७ सर्वाकारंगतोयस्तुशिवःसातस्या०२८ एषासासाक्षिणीशक्तिः
शंकरस्यापिशंकरी शिवाभिन्नातयाहीनःशिवःसाक्षान्निरर्थकः २९ नशिवेनविनाशक्तिर्नशक्तिरहितःशिवः उमाशंकरयोरैक्यंयः
भैदंचे श्यतिसपश्यति ३० उमाशंकरयोर्भेदंपश्यंतिनराधमाः अधोमुखोर्ध्वपादास्तेयास्यंतिनरकार्णवं ३१ यथामातापितृभ्यांतुवर्द्धते
मानवाभुवि तथैताभ्यामिदंकृत्स्नंवर्द्धतेनात्रसंशयः ३२ उपासतेयेपरमांसर्वलोकैकमातरं तेभिप्सितंसमालभ्यांतिविद्यांमुक्ति
प्रदामपि ३३ पार्वतीपरमादेवीब्रह्मविद्याप्रदायिनी विशेषेणैवजंतूनांनात्रसंदेहकारणं ३४ लक्ष्मीवागादिरूपेणशिवारत्न
श्री लुमुनीश्वराः नर्तकीवान्यथासर्वमचिरादेवसिध्यति ३५ अस्याएवप्रसादेनब्रह्मेंद्रादिविभूतयः अनयारहितंसर्वंमसदेवनस
द्भवेत् ३६ एतामेवसमाराध्यश्रद्धयासहवैदिकाः लभंतेकांक्षितंसर्वंनान्यथामुनिपुंगवाः ३७ शैवाभागवतास्तेषामुपभेदाव
लंबिनः अस्याआराधनेनैवलभंतेभीप्सितंफलं ३८ देगंबरास्तथाबौद्धाअपभ्रंशावलंबिनः अस्याआराधनेनैवलभंतेभीप्सि
तंफलं यथायथाशिवामेतांयोवाकोवादरेणतु आराधयतिसोभीष्टंलभतेफलमास्तिकाः ४० करुणासागरामेतांयःप्रजय

सू॰ यं॰ वै॰ निशांकरी किंन्नसिध्यतितस्येदंतस्याएवप्रसादतः शिवामेनानुभामेनाजडशक्तिंतथैवच जडकार्यंजगज्जीवंतेषांभेदंतथैवच
४२ अन्यच्चास्तीतथाभानंतथानास्तीतिशंकितं सर्वंपूर्णंशिवंपश्यन्स्वयंपूर्णःशिवोभवेत् पूर्णमेवस्वकंरूपमपूर्णंभातिमा
यया पूर्णरूपतयामायांपश्यन्पूर्णोभवेत्स्वयं ४४ स्वपूर्णात्मातिरेकेण जगज्जीवेश्वरादयः नसंतिनास्तिमायाचनहिप्र
ह्यात्मवेदनं स्वपूर्णात्मशिवानंदनिष्ठमासाद्यमानवः तदैवलभतेमुक्तिंस्वपूर्णात्मशिवात्मिकीं ४६ स्वपूर्णात्मशिवानंदप्र
काशबलतःपुमान् स्वछंदंवर्ततेलोकेकोवातस्यनिवारकः सार्वभौमोयथाराजास्वछंदंवर्ततेभुवि स्वपूर्णात्मशिवज्ञानीस्वछं
दंवर्ततेतथा ४८ प्रतीतमखिलंयस्यस्वात्मनाभासतेस्वयं संसारस्तस्यमुक्तिर्वाकथंसिध्यतियोगिनः संसारोवाविमुक्तिर्वा
यस्यभातिमुनीश्वराः तस्यैवहिनिषेधाश्चविधयश्चनयोगिनः ५० स्पृशतेमृत्तिका विप्रैश्चंडालैरपिकेवला सैवकुंभादिरूपे
णनीचैर्नस्पृश्यतेयथा ५१ तथाब्रह्मात्मनासार्वमनिंद्यमपियोगिनः निंद्यानिंद्यतयाज्ञस्यभातिसर्वंस्वरूपतः ५२ वैदिको
लौकिकश्चापिव्यवहारस्तुकल्पितः भेदविज्ञानिनोमोहाद्भासतेसनयोगिनः आत्मविज्ञानिनोविप्रालौकिकोनहिवैदि १८

कः व्यवहारःस्वतःसर्वःस्वात्मनाभातिकेवलं ५४ आत्मविज्ञानसंज्ञस्यमहायज्ञस्यवैभवं कल्पकोटिशतेनापिमयावक्तुंनशक्यते
भवंतोपिमहात्मानामहादेवप्रसादतः मत्तोलब्धपरिज्ञानाःकृतार्थाश्चनसंशयः ५६ इतिश्रीसूतसंहितायांयज्ञवैभवखंडेत्रयोदशो
ध्यायः सूतउ॰ अथोपिज्ञानयज्ञंतुप्रवक्ष्यामिसमासतः इतःपूर्वंमयानोक्तमपिकस्यचिदास्तिकाः एकएवशिवःसाक्षात्सत्य
ज्ञानादिलक्षणः विकाररहितःशुद्धःस्वशक्त्यापंचधास्थितः २ ईशानश्चेतितत्पुरुषश्चेतिसुव्रताः अघोरश्चेतिविप्रेंद्रावाम
देवइतिद्विजाः सद्योजातइतिप्राज्ञानस्वरूपेणभेदिनः तत्रैवंसतिशब्दंसाक्षादीशानसंज्ञितः ४ स्पर्शस्तत्पुरुषोरूपमघोरःप
रिकीर्तितः वामदेवोरसःप्रोक्तोगंधःसद्यउदाहृतः सदाशिवेश्वरोरुद्रोविष्णुर्ब्रह्माचसुव्रताः क्रमाच्छब्दादिरूपाणांदेवताश्चप्रकी
र्तिताः ६ ताश्चेशानादयःप्रोक्ताःक्रमेणैवमुनीश्वराः सर्वाण्येतानिविप्रेंद्राःशिवएवनसंशयः एतानिशिवरूपेणपश्यन्मुच्येतबंध
नात् आकाशाख्यंमहाभूतमीशानःपरिकीर्तितः ८ वायुस्तत्पुरुषोज्ञेयोवह्निश्चाघोरइतिस्मृतः अंभोवामस्तथाभूमिःसद्यो
जातःप्रकीर्तितः अनंतशिवसंज्ञश्चतथानंतेश्वराभिधः कालाग्निरुद्रोविप्रेंद्रास्तथानारायणाभिधः १० ब्रह्माचतुर्मुखःसाक्षात्

स॰ पु॰ काशादेस्तुदेवताः एतानिशिवरूपेणपश्यन्मुच्येतबंधनात् श्रोत्रमीशानएवस्यात्त्वक्तत्पुरुषःस्मृतः चक्षुश्चाघोरएवस्यात्जिह्वावा
मःसमीरिता १२ घ्राणंसद्यःसमाख्यातःक्रमात्तेषांमुनीश्वराः दिग्वाय्वादित्यवरुणपृथिव्याख्यास्तुदेवताः एतानिशिवरूपेण
पश्यन्मुच्येतबंधनात् पादईशानएवस्यात्पाणिस्तत्पुरुषःस्मृतः १४ वागघोरइतिप्रोक्तापुपस्थोवामईरितः पायुःसद्यइतिप्रोक्तः
साक्षाद्वेदांतपारगैः त्रिविक्रमस्तथाचेंद्रोवह्निश्चैवप्रजापतिः मित्रश्चमुनिशार्दूलाःक्रमात्तेषांचदेवताः १६ एतानिशिवरूपे
णपश्यन्मुच्येतबंधनात् मनईशानएवस्याद्बुद्धिस्तत्पुरुषःस्मृतः अहंकारस्त्वघोरःस्याच्चित्तंवामःसमीरितं एषांचकारणंविप्रा
अंतःकरणसंज्ञितं १८ सद्योजातइतिप्रोक्तंसर्ववेदार्थपारगैः मनसोदेवताचंद्रोबुद्धेर्वाचस्पतिस्तथा अहंकारस्यकालाग्निरुद्रः
कालहरोपिवा चित्तस्यदेवतादेवीशिवांतःकरणस्यतु २० हिरण्यगर्भोभगवान्देवतामुनिपुंगवाः एतानिशिवरूपेणपश्यन्मुच्येत
बंधनात् २१ प्राणईशानएवस्याद्पानःपुरुषःस्मृतः व्यानोघोरस्तथोदानोवामदेवःसमीरितः २२ समानःसद्यएवस्यात्तत्त्वा
त्माकारणोनिलः विशिष्टोविश्वसृट्विश्वविश्वयोनिरजाजया क्रमेणदेवताःप्रोक्ताघ्राणादीनांमुनीश्वराः एतानिशिवरूपेण 20

पश्यन्मुच्येतबंधनात् २४ पृथिव्यादिषुभूतेषुयोगुणःसत्वसंज्ञितः सक्रमेणनिवृत्यादिकलासंज्ञामुपैतिच भूमौनिवृत्तिर्विप्रेंद्राम
तिष्ठापयसिस्थिता विद्यावन्हौतथाशांतिर्वायौव्योम्निमुनीश्वराः २६ शांत्यतीतकलाचैताश्च क्रमेणमुनीश्वराः भवंतिपंचब्रह्माणि
तथाभूतेषुपंचसु स्थितोरजोगुणोविप्रा आकाशादिक्रमेणच स्पंदश्चैवपरिस्पंदःप्रक्रमःपरिशीलितः २८ प्रचारइतिविद्भिः
कथिताःपंचचक्रियाः एतानिपंचब्रह्माणिभवंतिमुनिसत्तमाः तथाभूतेषुसर्वेषुसंस्थितस्तमसोगुणः छादकंबाधकंमुग्धंनोदकं
भंजकंभवेत् ३० एतानिचतथापंचब्रह्माणिमुनिसत्तमाः एतानिशिवरूपेणपश्यन्मुच्येतबंधनात् अन्यानिविप्रेंद्राःपंचधासंस्थि यानि
तानिच तानिचब्राह्मणाःपंचब्रह्माणिस्युर्नसंशयः ३२ पंचब्रह्मतयाभिन्नंजगत्सर्वंचराचरं शिवरूपेणसंपश्यन्मुच्यतेभवबं
धनात् माययैवशिवःसाक्षात्पंचधासमवस्थितः साशिवस्यसदामायासर्वदुर्घटकारिणी ३४ एवमात्मिकयाब्रह्ममाययाका
रणंभवेत् तत्सर्वंतथान्येषांनियंतृत्वनिरूपणैः वस्तुतःशंभुरानंदःसत्यःसंपूर्णविग्रहः माययामोहितामर्त्यास्तेभेदेनवि
दुर्बुधाः ३६ दासोहमितिसंमोहस्ततःसोहमितिभ्रमः अहंसइतिसंमोहस्तथात्रीणिपरित्यजेत् निर्भेदेनिर्मलेनित्येनिराधारेनीरंज

सू.य.वै ने दासः सोऽहमहंसोपीत्यास्मन्येत कथं भवेत् ३९ तस्मादज्ञानमायोत्थमिदं सर्वं जगद्बुधाः तद्विवेकप्रदीपेन शिवं पश्यन्विमुच्यते विवेक
२१ लोकहस्तस्य ज्ञानमार्गेण गच्छतः स्वात्ममुक्तिगृहं प्राप्तिः स्यात्त्विवाचिरेण तु ४० संसारार्णवमग्नानां जंतूनामविवेकिनां अगतीनां
गतिः साक्षात् ज्ञानमेव हि केवलं सर्वजंतोः शत्रुभूतानां रागादीनां दुरात्मनां छेदने वेदनं शस्त्रं केवलं खलु नेतरत् ४२ संसारदुःखतप्तानाम्
ज्ञानामृतांभसा तापशांतिर्न चान्येन सत्यमेव न संशयः स्वतः सिद्धस्य यस्य सर्वं जगत्तेन प्रकाशितं स्वरूपतया तु ध्वांतदंति स्वात्मनास्व त्य
यं ४४ यथा सुवर्णं कटकं सृजति ग्रसते स्वयं तथा शंभुरिदं सर्वं सृजति ग्रसते स्वयं यथोर्णनाभिः सृजति तंतुं गृह्णाति च स्वयं तथा श
भुरिदं सृष्ट्वा ग्रसते च स्वयं विभुः ४६ भूमिः सृजति गृह्णाति यथौषधिवनस्पतीन् तथा शंभुरिदं सर्वं सृष्ट्वा च ग्रसते स्वयं स्वयमेव यथात्म
प्रसूतं गृह्णाति चेतनः तथा शंभुरिदं सर्वं सृष्ट्वा च ग्रसते स्वयं ४८ स्वस्वमात्मप्रबोधेन स्वात्ममात्रं यथा भवेत् तथैव स्वप्रपंचोपि स्वयं
स्यात्स्वप्रबोधतः स्वस्वरूपतया सर्वं वेद स्वानुभवेन यः स धीरः स तु सर्वज्ञः स शिवः स तु दुर्लभः ५० लोकवासनया जंतोः शास्त्रवास
नयापि च देहवासनया ज्ञानं यथावन्नैव जायते जायते पूर्णविज्ञानं केषांचित्पुण्यगौरवात् तथापि प्रतिबंधः स्यात्प्रसादेन विना कृतं ५२ प्र २१

सादादेव रुद्रस्य ज्ञानं वेदांतवाक्यजं प्रतिबंधविनिर्मुक्तं भवेन्नहि विमुक्तिदं शिवशंकररुद्राख्यः सांबः सत्यादिलक्षणः परमात्मा हि विज्ञान
प्रसादं कुरुते सदा ५४ ज्ञानप्रसादं कुरुते न विष्णुर्न पितामहः न चेंद्रो न च तिग्मांशुर्न चंद्रो नान्यदेवताः विशुद्धमनसां नृणां विष्णुः सर्वाश्च देव
ताः यथाधिकारं कुर्वंति मार्गं सत्यमीरितं ५६ कलुषरहितचित्तानां विष्णुब्रह्मपुरोगमाः यथाधिकारं कुर्वंति प्रसादं मुक्तिसिद्धये अतो ज्ञानप्र
सादार्थं शिवः सांबः सनातनः उपासितव्यो मंतव्यः श्रोतव्यश्च मुमुक्षुभिः ५८ शिवप्रसादेन हि मुक्तिरुत्तमा शिवः प्रसादेन हि मुक्ति
रुत्तमा शिवप्रसादेन विना न मुक्तयः शिवप्रसादेन विना न मुक्तयः ५९ शिवप्रसादेन गुरुप्रसादतः शिवप्रसादेन च शंभुभक्तितः वि
शुद्धविज्ञानदिवाकरः स्वयं प्रदृश्य पापस्य ततो विनाशकृत् ६० शिवः प्रशस्तं परमार्थतस्तथा शिवः समस्तं व्यवहारतोपि च इति प्रजानंत्य हि वेदनं तद्
गुणं तरंति संसारमहोदधिं ते ६१ इति श्रीसूतसंहितायां यज्ञवैभवखंडे चतुर्दशोऽध्यायः सूत उ० भूयोपि ज्ञानयज्ञं तु प्रवक्ष्यामि समासतः
शृणुत श्रेयसे विप्राः श्रद्धया परया सह घटकुड्यकुसूलादिपदार्थेषु मुनीश्वराः सत्ता या भासते सैका सत्ताकारतयैव तु २ सा विशेषेण रू
पेण विभिन्नेति च केचन तदसंगतमेवेति प्रवदंति मनीषिणः विशेषरूपस्याभावाद्भेदाभावेन हेतुना सति भेदे विशेषस्याप्यभेदो हि मुनी

या॰

स्त॰ यं॰ भं॰ भ्वरः ४ भेदाकारस्तु सत्तायाविद्यतेयदिवस्तुतः भेदाकारस्तु सत्तायाभिन्नश्चेच्छून्यतत्त्ववत् शून्यमेवभवन्नैवभेदाकारोभवेद्द्विजाः भेदाकार

२२ ससत्तायाअभिन्नश्चेत्ससैवहि ६ भिन्नाभिन्नौयदिस्यातांदोषद्वयसमागमात् तस्मात्सत्तातिरेकेणविशेषार्थोनविद्यते ७ विशेषार्थ

सत्तीनिरस्तश्चांतिसिद्धान्नसंशयः अतएकासदासत्तासैवब्रह्मपरात्परं ८ सत्तायदिभिन्नाचेद्ब्रह्मासत्त्याच्छशंगवत् तत्रैवंसतिविश्वेंद्रायै

पदार्थाघटादयः ९ नैतुसत्तातिरेकेणनविद्यंतेकथंचन ब्रह्मैवेदमितिप्राहश्रुतिरप्यतिनिर्मला १० विद्धामनुभूतिश्चतथैवहि

नसंशयः अतःसर्वमिदंशंभुरितिविनविचक्षणः ११ मच्छरावादिरूपेणयथाभातिस्वभावतः तथासर्वतयाभातिशिवःसर्वावभासकः

१२ कटकादिविभेदेनयथाहेमप्रकाशते तथासर्वतयाभातिशिवःसर्वावभासकः १३ शुक्तिकारजताकारायथाभातिस्वभावतः तथास

र्वतयाभातिशिवःसर्वावभासकः १४ स्त्रमरक्त्स्वमरूपेणयथाभातिस्वभावतः तथासर्वतयाभातिशिवःसर्वावभासकः १५ अंधकारप्र

काशश्चयथाकाशेप्रकाशते जडाजडमिदंसर्वंतथाभातिपरात्मनि १६ वीचीतरंगफेनाद्याःयथाभांतिमहोदधौ महदादिविशेषांतंजगद्भाति

तथात्मनि भूतानिशंभुर्भुवनानिशंभुर्देवानिशंभुर्गिरयश्चशंभुः सएवसर्वंनततोतिरिक्तंततःसएकःपरमार्थमेतत् १९ इज्यश्चय २२

५

इज्यश्चयमेवशंभुर्लभ्यश्चदानैरखिलैस्तथैव जप्यश्चमंत्रैरखिलैर्विशिष्टैर्मृग्यश्चदेवैरमरेंद्रपूर्वैः १९ तपोभिरुग्रैःसततंविशिष्टामहेशमे

नंपरमप्रियेण सपूजयंत्येवमुनीन्द्रवृंदानमंतिनित्यंवचसामृतवेति २० यतीन्द्रवृंदाहृदिसन्निविष्टंगुरुप्रसादाच्चशिवप्रसादात् अहंपदप्र

त्ययसाक्षिभूतंचिदात्मरूपंविदुरेनमेव २१ शिवमेशेषमिदंपरिपश्यतःसकलजन्मजरामरणादयः निखिललोकगतिश्चनिरंकुशंप

रमरूपतयैवविभातिहि २२ अमलबोधतयावरमेश्वरेसकलवेदवचोभिरयत्नतः परमयोगबलेनचपश्यतःकथमशेषजगत्प्रतिभाभ

वेत् २३ परमशिवमशेषंपश्यतामादिभूतंतस्यहृदयकुहरमध्येसंचितंकर्मवृंदं झटितिभवतिदग्धंतूलवद्वह्नियुक्तंनफलनिकरभोगप्राप्त

येनतद्वेद्य २४ कर्मभिःसकलैरपिलिप्यतेनमहाविदात्मवरश्चनसर्वथा पद्मपत्रमिवाद्भिरहोपरब्रह्मविन्नरस्युतुवैभवं २५ पुण्यपापतयाप्र

भाति विभासतेकर्मजातमनात्मप्रतिस्तदा ब्रह्मरूपतयैवहिभातिचेद्ब्रह्मवेदनमेवतदुत्तमं २६ सर्पादिभावेनविभासमानारज्जुर्नसर्पादिस

दैवरज्जुः तद्वत्प्रपंचात्मतयाविशिष्टोनविश्वशिवएवतत्त्वं २७ यथैवतोयात्मतयामरीचिंनरोविजानन्नपिवेदमेदिनीं तथैवविश्वा

त्मतयाभिपश्यन्नपिमपश्यत्यमलप्रबोधं २८ अतःप्रपंचानुभवःसदानहिस्वरूपबोधानुभवःसदाखलु इतीवपश्यन्परिपूर्णवे

ति

इयं वेदस्य शरा हिनिका मुनीश्वरः

सू.सं.य.वै. दत्तो न बद्धो मुक्तो न च बद्ध एव तु २९ स्वस्वरूपतया स्वयमेव सः प्रस्फुरत्यमलः परमेश्वरः नमः यच विभासनमस्य ततः कस्यचिन्न बंधनमोचने ३०
२३ शालामपि शंकरस्य तु इतोऽन्यथा ये विदुरंधकूपे पतंति ते मोहकृतो दरशाः ३१ इति श्रीसूतसंहितायां यज्ञवैभवखंडे पंचदशोऽध्यायः सूत
उ० अथातः संप्रवक्ष्यामि ज्ञानोत्पत्तेस्तु कारणं विना येन शिवज्ञानं न जायेत कथंचन १ मुमुक्षुरनिसं तुष्टः सिध्यत्येव गतिर्मम इति श्रद्धया तु नि
दिक्तप्रतिबंधनिवृत्तये २ देवताः सकला नित्यं प्रार्थयेन्मतिमान्नमः शन्नो मित्रः शं वरुणः शं वरुणः शं नो भवत्वर्यमा शन्न इंद्रो बृहस्पतिः शं
न्नो विष्णुरुरुक्रमः नमोऽस्तु ब्रह्मणे वायो नमोऽस्तु तव शोभनं ४ त्वमेव साक्षाद्ब्रह्मासि त्वां वदिष्यामि शंकरं ऋतं च सत्यं चाहं त्वां वदिष्यामि विशेष
तः तन्मामवतु कल्याणं तद्वक्तारं च शोभनं मां भयो वतु वक्तारमपि चावतु शोभनं ६ शांतिः शांतिः पुनः शांतिर्दोषत्रयनिवृत्तये इत्येवं प्रा
र्थनामासं ज्ञानार्थं पुनरास्तिकः जपेन्नित्यं गुरोर्लब्ध्वा मंत्रं यच्छंदसामिति मेगोपायेति पर्यंतमत्यंतं श्रद्धया सह ८ संकोचो देहयात्रायां यदि
ज्ञानार्थिनो भवेत उपक्षीणा भवेद्बुद्धिस्तत्र तस्य न संशयः अतः संकोचहानाय विद्यार्थं तु दिने दिने आज्येनान्नेन चोभाभ्यामावहंती मि
मंत्रतः १० जुहुयाच्छ्रद्धया सार्धं ब्रह्मचारी गृही वनी भिक्षुकस्तु जपेन्मंत्रमनग्निः श्रद्धया सह नियमाचार्यशुश्रूषां कुर्याद्भक्तिपूर्व २३

खडु:

कं उत्थायोत्थाय पट्त्रीणि प्रणामान्द्वादशापवा १२ कृत्वाचार्यं यथाशक्ति मुमुक्षुर्भुवि दंडवत् वेदांतश्रवणं कुर्यान्मननं च समाहितः नित्यं
लिंगे महादेवं पूजयेद्भक्तिपूर्वकं शांतो दांतो भवेन्नित्यं विरक्तो भिक्षुको भवेत् १४ शीतोष्णसुखेषु तथा मानापमानयोः सहिष्णुश्च भ
वेन्नित्यं तथैव काम्यमना भवेत् रुद्राक्षधारणं कुर्याद्रुद्राक्षधारणात् प्रतिबंधकबाहुल्यात् ज्ञानं नित्यं न जायते १६ आलस्यं च सु
ते चैव तथाभक्ष्यस्य भक्षणे अदृश्यदर्शने हो च जपेत्प्राज्ञः पंचाक्षरं षडक्षराणि वर्तंते जिह्वाग्रे यस्य संततं संभाषणादिकं तेन कुर्याद
विचारतः १८ संभाषणादिकं नो चेत्कुर्यान्मोहतोऽपि वा प्रदिशुर्यात्प्रमादेन प्रायश्चित्ती भवेद्द्विजः १९ स्वजातिविहिताचारैरन्या
चारैस्तथैव च विशिष्टा अपि नीचाः स्युर्न संभाष्या द्विजोत्तमैः २० अग्निहोत्रं द्विजं भस्म सितं प्राहायसादरं अग्निरित्यादिभिर्मंत्रैर्जा
बालोक्तैश्च सप्तभिः अभिमंत्र्य महादेवं भावयित्वा समाहितः भस्मना तेन सर्वांगं समुद्धूल्य ततः परं २२ तिर्यक्त्रिपुंड्रमुक्तेन व
र्त्मना मतिसत्तमाः ललाटे च तथा स्कंधे तथैवोरसि धारयेत् चिरंतनानि स्थानानि शिवस्यामिततेजसः प्रतिमासं विशेषेण सेवनीयानि भ
क्तितः २४ शिवस्यायतनसेवार्थं गच्छेच्छ्रद्धापुरःसरं उत्सवं सेवमानस्य मुक्तिर्हस्तस्थिता भवेत् विशिष्टमन्नं भुंजीत चित्तशुध्यर्थमात्मनः शि

सू॰ यभ॰ मील्यंचनिवेद्यंचविशेषेणाविवर्जयेत २६ रुद्रेणभुक्तंनिर्माल्यंनतथादेवतांतरैः निवेद्यंविष्णुनाभुक्तमादतंचान्यदेवतैः गुरुद्विषंपु
२४ रोडाशंभवत्येवनसंशयः निर्माल्यंचनिवेद्यंचभुक्त्वाचांद्रायणंचरेत् २८ वर्णाश्रमाद्विहीनानांकुर्यात्सेवांनमानवः सहवासंनतैःकु
र्यात्सहसंभाषणंतथा सहप्रमोदंसंस्पर्शंसहपंक्तौतुभोजनं सहैवगमनंसख्यंसहसंबंधमेवच ३० देवानांचमनुष्याणांतथान्येषां
चलांछनं नकुर्यान्मोहतोवापियदिकुर्यात्सतत्पधः कस्यचिल्लांछितोमर्त्योनसाक्षीसर्वथाभवेत् श्रौतस्मार्तसदाचारेनाधिकारीचलां
छितः ३२ लांछिताश्चनसंभाष्यानस्पृश्याश्चतथैवच नदर्शनीयास्तान्राजादेशाद्विप्रवासयेत् अकुर्वन्नपिविध्युक्तंनिषिद्धंपरिवर्जये
त् निषिद्धपरिहारेणविशुद्धहितेलभतेमतिं ३४ सत्याद्धर्माच्चकुशलाद्भ्रमनोहूलनादपि त्रिपुंड्रधारणाच्चापिस्वाध्यायाध्ययनाद
पि दैवाच्चपित्र्याच्चकार्याच्चमातापित्रादिपूजनात् तथान्येभ्यश्चकर्मभ्यःश्रौतेभ्यश्चतथैवच ३६ स्मार्तेभ्यश्चमुमुक्षुश्चेत्सदानप्र
च्युतोभवेत् उक्तसाधनसंपन्नोज्ञानाद्ब्रह्माभ्यधिगच्छति ३७ शिवस्वरूपंपरमंभासनाद्ब्रह्मसंमतं मदेवश्रीयमायोसौ मयामं
मायास्वर्थवत् देहंअनुभवितंतद्रूपंभस्मलेपंमुत्तरतं तेनत्वेनैवदेवेयःप्रतिबिंबेनभासनात् स्वतंत्रोबिंबभूतस्तुसर्वेषांदूषितात्मनांवः २५

मण्वज्जनीयस्तुब्रह्मविष्णुसुरोत्तमैः ४० तत्प्रसादेनसर्वेषांदेवत्वंनस्वभावतः स्वभावाद्देवदेवत्वंदेवदेवस्यशूलिनः तंविदित्वाविमुच्यंते
शांतादांतायतीश्वराः गृहस्थाश्चतथैवान्येसत्यधर्मपरायणाः ४२ भस्मसंछन्नसर्वांगास्त्रिपुंड्रांकितमस्तकाः रुद्राक्षमालाभरणाः
श्रीमत्पंचाक्षरप्रियाः नित्यंलिंगार्चनपरायज्ञाद्यैर्दग्धकल्मषाः अतोज्ञानार्थिभिर्ज्ञानसाधनानिमनीषिभिः ४४ संपाद्यानिमहा
यासाज्ज्ञानान्मुच्येतबंधनात् ज्ञानंवेदांतविज्ञानंब्रह्मात्मैकत्वगोचरं तस्माज्ज्ञातंविजानातिविमुक्तश्चविमुच्यते निवर्तनेनिरतश्च
मुक्तस्सर्वस्यैवसंग्रहः ४६ अयमर्थोमहादेवप्रसादरहितैर्नृभिः ज्ञात्वंधगजरस्थैकोटिशःपरिकल्प्यतेब्राह्मणोवायजोवापितथागर्भ
स्थितोपिवा महादेवप्रसादेनमुच्यतेभवबंधनात् ४८ महादेवेमहानंदेमहाकारुणिकोत्तमे प्रसन्नेसतिकीटोवापतंगोवाविमुच्यते
गुरूपदिष्टोवेदार्थःसंग्रहेणमयोदितः मदुक्तार्थेतुविश्वासंकुरुध्वंयत्नतोद्विजाः ५० इतिश्रीसूतसंहितायांयज्ञवैभवखंडेषोड
शोध्यायः सूतउवाच अथातःसंप्रवक्ष्यामिवैराग्यंदुःखार्थनाशनं येनसाक्षाच्छिवज्ञानंजायतेमोक्षसाधनं १ प्रत्यगात्मैकता
ज्ञानाद्वैतवस्तुसमुद्भूतं द्वैतवस्तुनिविभ्रंशःपूर्ववासनयातथा २ आज्ञयादेवदेवस्यकालपाकेनकर्मणां शोभनाशोभनभ्रांतिःक

स्व॰ येते

स्थिताः परमार्थवत् शोभनत्वेन संकल्पे विषये वासनावलात् इच्छा नित्यं प्रजायते नराणां मूढचेतसां ४ शोभनत्वेन संकल्पितः पदार्थो द्विविधः स्मृ
२५ तः एक ऐहिक आख्यात इतरः पारलौकिकः ऐहिकानिन्द्रियैरर्थान्भुंक्ते देही निरंतरं पुनर्भुंक्तेषु चार्थेषु तत्समानेषु मानवः ६ करोति कां छा
मवशः कल्याणां मतिमोहितः शोभनत्वेन यः कल्पितः पदार्थः पारलौकिकः तत्र बुद्धिं स्वर्गं शास्त्रमुखादयति निश्चितं भ्रमान्न द्वेग वां
छा च जायते सर्वदेहिनां ८ इहानुश्राविकद्वारा बुद्धिसंनतिरात्मनः कस्यिते विषये नित्यं जायते वेदवित्तमाः तथा यो शोभनत्वेन पदा
र्थः परिकल्पितः इह लोके परत्रापि द्वेषस्तत्र हि जायते १० रागद्वेषार्गलाबद्धा धर्माधर्मवशंगताः देवतिर्यङ्मनुष्यादि निरयं यान्ति मा
त्वा नवाः भुक्तं च शोणितं दृष्ट्वा स्पृष्ट्वास्पृष्टं तु मानवः उद्गारं कुरुते तद्धि शरीरं चेतनेन यत् १२ तस्मिं छरीरे हं बुद्धिं सदा कः कुरुते जनः मूढोहं मम बु
द्धिभ्यामिदं गच्छाति विग्रहं दृष्ट्वा स्पृष्ट्वा तथास्पृष्ट्वा चर्म भ्रमितले स्थितं उद्गारं कुरुते मर्त्यः स्वयं तद्दोषदर्शनात् १४ तथैवात्मतयाग्ना
त्वेशरीरे चर्मयद्भवेत् तस्मिंश्चर्मे त्वहं बुद्धिं सदा कः कुरुते नरः मूढोहं मम बुद्धिभ्यामिदं गच्छाति संततं दृष्ट्वा स्पृष्ट्वा तथास्पृष्ट्वा मांसं
भ्रमितले स्थितं १६ उद्गारं कुरुते मर्त्यः स्वयं तद्दोषदर्शनात् तथैवात्मतयाग्नात्वे देहे मांसं तु यद्भवेत् तस्मिन्मांसे त्वहं बुद्धिं सदा कः २५

ठो

कुरुते जनः मूढोहं मम बुद्धिभ्यामिदं गच्छाति संततं १८ दृष्ट्वा स्पृष्ट्वा तथास्पृष्ट्वा शिरां भ्रमितले स्थितां उद्गारं कुरुते मर्त्यः स्वयं तद्दोषदर्शना
त् तथैवात्मतयाग्नात्वा शरीरस्या च या शिरा तस्यामेव त्वहं बुद्धिं सदा कः कुरुते जनः २० मूढोहं मम बुद्धिभ्यामिदं गच्छाति संततं दृष्ट्वा स्पृष्ट्वा
तथास्पृष्ट्वा चास्थि भ्रमितले स्थितं २१ उद्गारं कुरुते मर्त्यः स्वयं स्वयं तद्दोषदर्शनात् तथैवात्मतयाग्नात्वं शरीरस्यास्थि यद्भवेत् २२ तस्मि
न्नेव त्वहं बुद्धिं सदा कः कुरुते जनः मूढोहं मम बुद्धिभ्यामिदं गच्छाति संततं दृष्ट्वा स्पृष्ट्वा तथास्पृष्ट्वा रोमपुंजं भुवि स्थितं उद्गारं कुरुते मर्त्यः
स्वयं तद्दोषदर्शनात् २४ तथा देहस्थितं रोम निचयं यद्द्विजोत्तमाः तस्मिन्नेव त्वहं बुद्धिं सदा कः कुरुते जनः मूढोहं मम बुद्धिभ्यामिदं गच्छाति संत
तं दृष्ट्वा स्पृष्ट्वा तथास्पृष्ट्वा रक्तं भ्रमितले स्थितं २६ उद्गारं कुरुते मर्त्यः स्वयं तद्दोषदर्शनात् तथैवात्मतयाग्नात्वं रक्तं यद्देहसंस्थितः तस्मिन्नेव त्व
हं बुद्धिं सदा कः कुरुते जनः मूढोहं मम बुद्धिभ्यामिदं गच्छाति संततं दृष्ट्वा स्पृष्ट्वा तथास्पृष्ट्वा पूयं भ्रमितले स्थितं उद्गारं कुरुते मर्त्यः स्वयं तद्दोषद
र्शनात् तथैवात्मतयाग्नात्वा दोषं यद्देहसंज्ञिते तस्मिन्नेव त्वहं बुद्धिं सदा कः कुरुते जनः ३० मूढोहं मम बुद्धिभ्यामिदं गच्छाति संततं दृष्ट्वा स्पृष्ट्वा त
थास्पृष्ट्वा श्लेष्मराशिं भुवि स्थितं उद्गारं कुरुते मर्त्यः स्वयं तद्दोषदर्शनात् तथैव पुरमध्यस्थे श्लेष्मराशौ विचक्षणाः ३२ कः करोति त्वहं बुद्धिं

२८ नुष्यः पंडितो नमः मूढोहं मम बुद्धिभ्यामिदं गृहानि संततं दृष्ट्वा स्पृष्ट्वा तथा स्मृत्वा पित्तं भ्रमितले स्थितं उद्गारं कुरुते मर्त्यः स्वयं न दोषदर्श
नात् ३७ तथा देहस्थिते पित्ते हृये वेदांतपारगाः कः करोति त्वहं बुद्धिं मूढ एव करोति हि दृष्ट्वा तथा स्मृत्वा मूत्रं भ्रमितले स्थितं उद्गारं कु
रुते मर्त्यः स्वयं न दोषदर्शनात् ३६ तथा देहस्थिते मूत्रे हृद्वे वेदांतपारगाः कः करोति त्वहं बुद्धिं मूढ एव करोति हि दृष्ट्वा स्पृष्ट्वा तथा स्मृत्वा पु
रीषं भूतले स्थितं उद्गारं कुरुते मर्त्यः स्वयं न दोषदर्शनात् ३८ तथा देहस्थिते हृये पुरीषे मतिमन्नमः कः करोति त्वहं बुद्धिं मूढ एव करो
ति हि चंदनागरुकर्पूरमसुखा अपि शोभनाः मलं भवंति यत्स्पर्शात्तत्कथं शोभनं वपुः ४० भक्ष्यभोज्यादयः सर्वे यत्स्पर्शाद्वापि शोभ
नाः मलं भवंति यत्स्पर्शात्तत्कथं शोभनं वपुः सुगंधशीतलं तोयं मूत्रं यत्संगमाद्भवेत् तत्कथं शोभनं पिंडं भवेद्ब्रूत द्विजोत्तमाः ४२ अति
धवलाः शुद्धाः पटाः यत्संगमेन तु भवंति मलिनावर्णाः कथं तच्छोभनं भवेत् रक्तजाः क्रिमयोनंताः मांसजाः कृमयस्तथा कृमिकोशमिदं वर्ष्म
दुःखाय न सुखाय हि ४४ गर्भे तु कललावस्थं कृमिभिर्भक्षितं भवेत् दुःखमेव तदा सौख्यं न किंचिदपि विद्यते बुद्बुदाकारतापन्नं भक्ष्यं तिक
लेवरं कृमयो दुःखमेव स्यात्तदा सौख्यं न किंचन ४६ जठराग्नौ भवेत्तप्तं गर्भे मातुः सदैव तु दुःखमेव तदा तस्य सुखं किंचिन्न विद्यते जठ २६

रे वायुसंचारघूर्णितं गर्भतां गतः दुःखमेव तदा तस्य सुखं किंचिन्न विद्यते ४८ पुरीषमूत्रसंस्पर्शे जठरे गर्भतां गतः दुःखमेव सदा या
ति न किंचित्सुखमाप्नुयात् जरायुमध्ये निश्छिद्रे निमग्नो गर्भतां गतः दुःखमेव सदा याति न किंचित्सुखमाप्नुयात् ५० रौरवादिषु य
द्दुःखं नरकेषु निरंतरं गर्भे तत्कोटिगुणितं भवेद्दुःखं न संशयः ५१ गर्भे तु जायमानस्य दुःखं वक्तुं न शक्यते अहो दुर्वासस एव स्याद्गर्भवा
सो मुनीश्वराः ५२ बाल्ये पीडा महत्ता तु रोगानां पीडा महत्तरा पिपीलिकादिपीडा च परिहर्तुं न शक्यते व्याधिपीडा महामीनां बासुत्पीडा च दिने
पिपासा च महापीडा कथं याति सुखं नरः ५४ अक्षरग्रहणे पीडा पीडा च पठने तथा शब्दजालस्य दुःखाब्धेर्न पारो दृश्यते मया श्रौत
स्मार्तसदाचारमहापीडा च दारुणा निषिद्धपरिहारात्र कथं याति सुखं नरः ५६ यौवने च महाद्दुःखं स्त्रीसंसर्गे महत्तरं स्त्रीभोगात्मक
ता दुःखं दुःखमेव विचारतः स्त्रीणामाराधने दुःखं तासां संरक्षणेपि च तासां परिभवे दुःखं दुःखमेव विचारतः ५८ वस्त्रसंपादने दुःखं भू
षणानां तथैव च रक्षणे च तथा नेपां दुःखमेव विचारतः गृहक्षेत्रधनादीनां दुःखं संपादने तथा रक्षणे च तथा दुःखं दुःखमेव विचारतः
६० पुत्रमित्रादिजं तत्तां दुःखं तु तथैव च जन्मनाशभयाद्दुःखं दुःखमेव विचारतः राज्यभारे महाद्दुःखममात्यत्वे महत्तरं दासभावे महाद्दु

सू॰ सं॰ ३७

खंदुःखमेवविचारतः ६२ वेदमार्गेनंद्भ्रमेमार्गेनिमहाद्दुःखंतथैवच मार्गोत्कर्षपरिज्ञानेदुःखमेवविचारतः स्वदारेभ्योमहाद्दुःखंपरस्त्री
दर्शनेतथा परैःसाम्येमहाद्दुःखंदुःखमेवविचारतः ६४ वायुपीडाग्निपीडाचतोयपीडातथैवच सर्पादिदर्शनेपीडादुःखमेवविचारतः
भूतप्रेतपिशाचानांयक्षादीनांतथैवच पश्यतोमहाद्दुःखंमेवविचारतः ६६ इहलोकेमहाद्दुःखंमाजायस्वमहन्नरं बिहुलोकेचरी
देचदुःखमेवविचारतः बहुनोक्तेनकिंदेहेहंममज्ञानवान्यदि दुःखमेवसदायातिनकिंचन ६८ दुःखंदुःखात्मनाकिंचिज्जानातिविनश्यःपु
मान् सुखात्मनाचजानातिभ्रमाद्दुःखंकदाचन आत्मनस्तुस्वरूपंहिसुखंनान्यद्विचारतः तदज्ञानवलेनैवसुखत्रेसान्दराबुधाः ७० तदज्ञा
प्रा नेनिवृत्तेतुममेतिसुखंस्वतः जहातिदुःखमप्राप्तंस्वतःसत्यंमयोदितं अज्ञानस्यनिवृत्तिश्चज्ञानादेवनकर्मणा ज्ञानंनामहृदेवज्ञानंवेदांत
वाक्यजं ७२ विरक्तस्यहिसंसाराज्ज्ञानंनान्यस्यकस्यचित् यदासर्वेप्रमुच्यंतेकामायेस्यहृदिस्थिताः तदामर्त्योमृतोभवत्यत्र ब्र
ह्मसमश्नुते ७३ वैराग्यहीनस्यनसत्यवेदनंनमुक्तिसिद्धिर्नचवंधनच्छिदा नधर्मसिद्धिश्चततःपुरातनैरिदंविशिष्टंकथितंकृपावलात्
७४ इतिश्रीसूत॰य॰ सप्तदशोध्यायः सूतउवाच अथानित्यंप्रवक्ष्यामिसमासेननविस्तरात् यज्ज्ञानेनैवसंसाराद्वैराग्यंजा ३७

यतेदृढं १ अनात्माजडरूपोयःसएवानित्यमुच्यते अनात्मनामनित्यत्वंघटादीनांजडात्मनां २ आबालपंडितंदृश्यंततोनःपंडितोत्त
माः कार्यस्यैवह्यनित्यत्वंवर्णयंतीहकेचन नतद्युक्तमकार्यस्याप्यनित्यत्वप्रसिद्धितः अकार्यस्यघटादीनांप्रागभावस्यजंतुभिः ४ दृष्ट
मेवह्यनित्यत्वंनादृष्टंपंडितोत्तमाः भावरूपस्यकार्यत्वमनित्यत्वेप्रयोजकं अपिसर्वस्यपूर्वोक्तमनात्मत्वप्रयोजकं दिक्कालाका
शपूर्वाणामनित्यत्वमनात्मनां ६ श्रुतयोनित्यतोमेषांप्रवदंतिहिसादरं श्रुत्यनुग्राहकस्तर्कोनस्वतंत्रइतिस्थितिः दृष्टसाम्येनवेद
ज्ञाःखलुतर्कार्थसाधकाः श्रुतिरन्यानपेक्षाहिद्विजेंद्राअर्थसाधिका ८ प्रत्यक्षादिप्रमाणानांपंचानांपंडितोत्तमाः अगम्यंब्रह्मधर्मश्चा
धर्मःश्रुत्यैवगम्यते अंतरेणश्रुतिंवोहुयत्तंनेतीद्रियंपरं नेकरेणपिमाधुर्यंजानंत्येवसुनिश्चितं १० पुराकश्चिन्महामूर्खःसंगिरोनाम
वाडवः पूर्वजन्मकृतात्पापाद्देवश्रद्धाविवर्जितः तर्कशास्त्ररतःशश्वद्भूतातींद्रियमव्ययं धर्माधर्मौचतर्केणकेवलेनमुनीश्वराः
१२ अक्रोशेनपरिज्ञातुमकारोद्यत्नमुत्तमं तर्कोनानाविधस्तस्यप्रतिभातोमुनीश्वराः तेनमोहावृतःसद्यःसंगिरोमुनिपुंगवाः च
कारदीक्षांपाखंडमार्गेश्रद्धापुरःसरं १४ पुनस्तर्कप्रतिष्ठानात्संगिरोतीवमोहितः चकारदीक्षांपाखंडविशेषेषुयथारुचि पुनस्तर्कप्र

२८ निःखानान्मायया परिमोहितः सत्कापाखंडमार्गं च चाचार च यथारुचि १६ पुनर्मोहावृतः साक्षात्स्वसारं मातरं तथा गत्वा ममार काले
न संगिरः स हसा द्विजः अमुष्मा अतिसत्त्वदा यमदूता भयंकराः संगिरं तु समादाय शीघ्रं विमायमं ययुः १८ यमस्तं संगिरं क्रुद्धो विलो
क्याह भयंकरं यथाशक्ति भटा एष पीड्यतां मम सन्निधौ इति माह यमः सोपि संगिरो यमकिंकरैः अतिविपीडितो विप्रा अभवच्च विचेष्टित
: २० पुनश्च तीक्ष्णया वाचा यमः प्राह सुदारुणं भिद्यतां संगिरा दुःखः छिद्यतां रत्नतामयं दृश्यतुं यंत्रादिषु क्षेपः पीड्यतुं मनिशं भृशः ना
अन्यैर्नानाविधैः क्रूरैरुपायैः पीड्यतामिति २२ संगिरो यमदूतैश्च क्रमेण नरकार्णवे यंत्रैर्नानाविधैरन्यैरुपायैरतिदारुणैः अती
व पीडितो विप्रा अभवत्कोटिवत्सरं पुराकृतमहापुण्यपरिपाकबलेन च २४ प्रसादादेव रुद्रस्य शिवस्य परमात्मनः अकस्मादागत
स्तत्र महातेजा महामतिः शंभुभक्तः शतानंदो नाम्ना शंभुरिवापरः स पुनः पीड्यमानं तं विलोक्य करुणाबलात् २६ प्राहोच्चैः शिवाये
ति मंत्रराजं षडक्षरं नष्टे च नरकः साक्षात्स्वर्गलोकोभवद्द्विजाः २७ पुष्पवृष्टिरभवत्सुमंगलाः सिद्धयक्षमुनयः सनातनाः नृत्यन्त्र
तिशोभनं सुराश्चक्रुरग्निविमला विचक्षणाः २८ ननृत्ता गीतसुरवरा अपि द्विजाः अप्सरोभिरतिशोभना सह यक्षकिन्नरपुरः सारा भृ

२८

११

शं नृत्तगीतसुखभोगिनोभवत् २९ देवैरेशैरमराधिपः स्वयं सह प्रमोदेन ननर्त शोभनं प्रजापतिश्चापि ननर्त भार्यया श्रिया च विष्णुः सह
मोदसंयुतः ३० यमोतिभीतः परमेश्वराज्ञया प्रवर्तमानश्च कृतांजलिर्द्विजाः सहस्रकीर्येरपि कंपितः स्वयं ब्रह्मणामं शिवशंकया करोत्
३१ यमं शतानंद समाह्वयो मुनिर्विलोक्य भीतं कृपयैव वल्लं विमुंच भीतिं यम शंकराज्ञया प्रवर्तमानेति वचः सुखावहं ३२ अब्रवीदस्
भमतिभापहः शुद्धबोधसुखवस्तुनिस्थितः तद्वचःश्रवणभग्नसंशयो निर्भयश्च नरसाभवद्यमः ३३ पुनः शतानंदसमाह्वयो मुनिर्यमं स
क माहूय समस्तसन्निधौ इदं वभाषे वचनं सुखावहं समस्तलोकस्य मुनीश्वरेश्वरः ३४ शतानंद उवाच विष्णुप्रजापतीन्द्रादिदेवताभ्यो महेश्वरं
विशिष्टं यो विजानाति तं त्वं परिहर प्रभुं ३५ शिवरुद्रादिशब्देभ्यो विशिष्टं वेदमानवः नारायणादिशब्देभ्यस्तं त्वं परिहर प्रभुं ३६ उमया
सहितं शुद्धं त्रिनेत्रं चंद्रशेखरं परस्य मूर्तिं यो वेद तं त्वं० ३७ समस्तजगतो मूलं समस्तस्यावभासकं यो वेदात्मतया नित्यं तं त्वं० ३८
त्रिपुंड्रं भस्मना स्कंधे ललाटे च तथा हृदि यो दधाति महाप्रीत्या तं त्वं व ३९ अग्निरित्यादिभिर्मंत्रैर्भस्मनैवावगुंठितं यः करोति स्वकं देहं तं वी
त्वं ४० नित्यं लिंगे महादेवं साक्षात्संसारमोचकं आराधयति यो मर्त्यस्तं त्वं ४१ रुद्राक्षं त्रीणि वा द्वैकं परया श्रद्धया सह दधाति नित्यं यो म

२८ र्धिस्तत्वं० ४२ शांतिदांत्यादिसंयुक्तः शंकरे भक्तिसंयुतः यः सर्वकर्मसंन्यासी नंतत्वं० ४३ वेदांतश्रवणं नित्यं मननं चिंतनं तथा यः करोति महामी
स्यानेतत्वं० ४४ वेदवेदांतनिष्ठस्य गुरोः शुश्रूषणे रतः यः करोतीह शुश्रूषां तंत्वं० ४५ यज्ञदानतपोहोमस्वाध्यायाध्ययनादिभिः योरुद्रं यजते
मीत्यानंतत्वं० ४६ श्रौतस्मार्तसमाचारैरन्यैरपि शिवार्चनं यः करोति महामीत्यातंत्वं० ४७ उत्कर्षं सर्वदेवेभ्यः शिवस्य परमात्मनः योन व
क्ति सदा मीत्यानत्वं धानयद्दुर्जनं ४८ महादेवसमं विष्णुं ब्रह्माणं वान्यमेव वा मनुते यः स्वमोहेन तंत्वं धा० ४९ श्रौतस्मार्तसदाचारं श्रद्धयैव
दिने दिने योनाचरति मोहेन तंत्वं० ५० मानुषं दैविकं चान्यत्स्वशरीरेक नंनरः यः करोति भ्रमाद्दापि तंत्वं० ५१ ऊर्ध्वपुंड्रं त्रिशूलं वा वर्तुलं य
स्तु वैदिकः दधाति मोहतो वापि तंत्वं० ५२ अश्रौताचारसंपन्नः श्रौताचारपराङ्मुखः गुरुद्रोही च यो मर्त्यस्तं त्वं० ५३ उत्कर्षं वेदमार्गस्य
योन जानाति मानवः वेदादन्यस्य चोत्कर्षं तंत्वं ५४ सूत उ० एवमुक्त्वा मुनिः श्रीमाञ्छतानंद समाह्वयः कैलासमगमद्द्रष्टुं तत्र स्तोतुं कुतू
हलात् ५५ वयमोपि संगिरं विप्राः समाहूय त्वरेण च विनैव वेदं तर्कस्य केवलस्य परिग्रहात् ५६ त्वया भुक्तं महद्दुःखं अप्रसह्यमनेकशः
पुराकृतेन पुण्येन महादेवप्रसादतः षडक्षरमहामंत्रश्रवणाच्च तथैव च दुःखादपि विनिर्मुक्तस्त्वं महात्मन्सुखमरं ५८ ब्राह्मण्यं प्राप्य वेद २८

स्य विद्विश्वावैभवं पुनः तदुक्तं धर्ममास्थाय पुनर्वेदांतवाक्यजं शिवज्ञानमवाप्याशु विमुक्तो भववंधनात् इत्युक्त्वा शुयमः श्रीमानगमत्स्व पुरं प्रति
६० अतो वेदोदितोर्थः सम्यगर्थः सुनिश्चितः तर्कसिद्धोपि दुस्थोर्थः प्रत्यवायस्य कारणं यद्रवः केवलं तर्कसमाश्रित्य विना श्रुतिं रौरवादिषु
संतप्ता अभवन्वेदविद्रमाः ६२ हैतुकैः सहवासश्च सहपंक्तौ तु भोजनं स्पर्शस्तेषां नराणां तु नरकाय न संशयः हैतुकस्य महापापीन
हापापकिनासमः ननस्य निष्कृतिस्तस्माद्धैतुकं परिवर्जयेत् ६४ तस्माद्वेदोदितेनैव प्रकारेण विचक्षणः विजानीयादनात्मानमनित्य
मिति निश्चितं आत्मनोन्यस्य सर्वस्य पदनित्यत्ववेदनं तद्धि संसारवैराग्यजनकं नापरं द्विजाः ६६ विरक्तस्य हि संसारात्किमन्यत्कांक्षितं
भवेत् वैराग्ये सति संसारात्सर्वं दुःखं न विद्यते रागेणैव हि संसारमहादुःखं तु देहिनां विरक्तस्य न रागोस्ति ततो वैराग्यता सुखं ६८ त
तस्माद्वैराग्यलाभाय चराचरमिदं जगत् अनित्यमिति जानीयादनात्मानमशेषतः घटादीनामनित्यत्वं स्वतएव प्रकाशते गृहमासा
दपूर्वाणामपि वेदविदांवराः ७० पुत्रमित्रकलत्रादिभोगो विद्युदिवस्वतः विनश्यति महामोहान्नित्यं तं मनुते जनः मंडलाधिपति
र्मर्त्यो महाभोगसमन्वितः विनाधिपत्यं नत्त्वं भ्रष्टो दृष्टः स्वभावतः ७२ तथा राजा महाभ्रमैः स्वयमेकोधिपः सुखी विना राज्य

स्कं॰ य॰ भे॰ सुखं दुःखादिदृष्टं सर्वजनैरपि एवं सत्यपि मोहांधः तमसा परिवेष्टितः इह नैसुखभोगाय त्वहो मोहस्य वैभवं ७२ परलोकसुखं चापि कर्मणा
३० साध्यते यतः अनंतरपि विप्रेंद्राः नश्यत्येव न संशयः महाभूमिरियं नष्टा भविष्यति महोदधौ प्रलयेन हता लोका अपि नश्यंति सर्वथा
७६ समुद्राः सप्त विप्रेंद्राः नश्यंति वडवानलैः वडवा च महावह्निः वह्निर्वायौ विनश्यति वायुर्नश्यति चाकाशे तथाकाशः स्वकारणे शब्दादी
नि च भूतानि नश्यंत्येव न संशयः ७८ भूतानामपि नाशेन भौतिकान्यखिलान्यपि नश्यंत्यवस्तुभावेन किं नित्यं गम्यतेऽनघाः ७९ ब्र
ह्मांडानां तु सर्वाश्च चेतना विविधा अपि नश्यंत्यवस्तुभावेन किं नित्यं गम्यतेऽनघाः ८० बिंदुर्विश्वजगद्योनिः प्रादुर्भावैः स्वकैः सह विना
शं प्रलये याति किं नित्यं गम्यतेऽनघाः अतः साक्षात्स्वयंज्योतिःस्वभावः परमेश्वरः एक एव हि जानीयात्ततोऽन्यत्सकलं मृषा ८२ अनात्म
भूतं सकलं जडात्मकं मृषैव निश्चयन् श्रुतिभिश्च युक्तिभिः क्रमेण शंभुं सततोदितं प्रभुं यथातिसत्यं परिभाषितं मया ८३ इति श्रीस्कंद
पुराणे सूतसंहितायां यज्ञवैभवखंडेऽष्टादशोऽध्यायः सूत उ॰ अथातः संप्रवक्ष्यामि नित्यं वस्तु समासतः यज्ज्ञानेन शिवज्ञानं जा
यते सुदृढं द्विजाः य आत्मा केवलः शुद्धो निर्विकारो निरंजनः स एव नित्यश्चिन्मात्रः साक्षी सर्वस्य सर्वदा २ अनित्यता जडस्यैव न चि ३०

द्रूपस्य वस्तुनः अनित्यता चितः कैश्चिन्न दृष्टा खलु सुव्रताः घटादिप्रत्ययस्यापि नानित्यत्वं विचारतः चित्तवृत्तिनिमित्ता हि प्रतीतिः प्रत्ययस्य तु
४ प्रत्यये तु चिदाकारो वृत्त्याकारश्च सुव्रताः विद्यते मोहमाहात्म्यादेकाकारावभासनं भावांशः करणांशश्च विद्यते प्रत्ययेऽपि च भावांशस्त
चिदाकारो वृत्त्यंशः करणांशस्तु चिदाकारकः ६ वृत्त्यंशः प्रनश्यत जडत्वात्कुंभवत्खलु चिदंशेनैव नष्टस्या दृष्टत्वान्न केनचित् अत्रापि ज्ञप्तिमा न
त्रस्य विनाशो नैव दृश्यते ज्ञप्तिग्रस्तस्य भावस्य खलु नाशः प्रकाशते ८ अतो नाशप्रतीतिः स्याद्भ्रमो भावांशकस्य तु चित्तवृत्त्या विभिव्यक्तं चिदा
कारं विमोहिताः जातमित्यभिमन्यंते न विद्वांसः कदाचन वृत्तिनाशेन हि नित्यं चिदाकारं मुनीश्वराः १० अनभिव्यक्ततो ज्ञानान्नष्टमेवेति मन्य
ते अतश्चैतन्यमात्रस्य नास्त्यनित्यत्वमास्तिकाः ज्ञाताज्ञातार्थजातस्य यः साक्षी भासते स्वयं स एव साक्षाच्चिन्मात्रस्वभावात्मा न चापरः १२ तस्य
जन्मविनाशौ तु न विद्येते विचारतः जन्मकाले तु साक्षित्वाज्जन्मनो जनिरस्य न विनाशसाक्षित्वे नाशस्तथा नैव भविष्यति सत्ताकाले तु स
त्वाच्च विनाशः सुतरां न हि १४ जन्मनाशप्रतीतिस्तु नांतरेणैव साक्षिणं जन्मनाशौ मुनिश्रेष्ठाः स्वत एव न सिध्यतः दृश्यत्वेन जड
त्वाच्च घटकुड्यादिवत्खलु साक्षिणो जन्मनाशौ तु चान्येनैव न सिध्यतः १६ जडरूपेण चान्येन जन्मनाशौ न सिध्यतः साक्षि

नाशो
३१ रूपेण चान्येन जन्मनैन सिध्यतः अभावादेव चान्यस्य साक्षिरूपस्य सुव्रताः साक्ष्याकारेण चैकत्वात् साक्षिभेदो न सिध्यति १८ साक्ष्यरूपेण
भेदस्तु साक्ष्यस्यैव न साक्षिणः साक्षिमात्रतया भेदाभावेप्यस्यैव साक्षिणः विशेषाकारतो भेदं वदंति सुविवेचन तेमहामोहसर्पेण दष्टा एव न संशयः
२० विशेषरूपं चिद्रूपं जडरूपं तु वा भवेत् न रूपांतरमेवस्यात् तादृशस्यानिरूपणात् चिद्रूपं साक्षिमात्रं स्यान्न चान्यत् परमार्थतः जडरूपं तु
नास्त्येव साक्षिणः परमार्थतः चिद्रूपस्य जडाकारो विरोधाच्चैव सिध्यति प्रकाशस्य तमोरूपं यथा लोके न सिध्यति अतो विशेषाकारेण भे
दंस्ये सर्वसाक्षिणः वदंति ते महाभ्रांता निमग्नाश्च पुराणानि भारतादीनि चास्ति काभवार्णवे २४ आत्मनः सर्वसाक्षित्वं एकत्वं च न ये
वच नित्यत्वं चैव शुद्धत्वं स्वमानं स्वयमेव च ब्रह्मत्वं च द्विजा वेदा वदंति श्रद्धया सह स्मृतयश्च पुराणानि भारतादीनि चास्तिकाः २६ महादेवश्च
विष्णुश्च ब्रह्मा च मुनयस्तथा नित्यत्वं शुद्धबुद्धत्वं आत्मनः प्रवदंति हि तस्मात् आत्मैव विप्रेंद्राः नित्यं वस्तु न चापरं जिह्वायां परशुं तप्तं धारयामि
न संशयः २८ इति सूतसंहितायां यज्ञवैभवखंडे एकोनविंशोध्यायः स्कंद उ॰ अथातः संप्रवक्ष्यामि विशिष्टं धर्ममादरात् शृणुताश्च
तकल्याणं मुनयः परया मुदा पुरा वेदविदां मुख्याः काश्यपा महर्षयः सत्यावसाने संभूय श्रद्धया परया सह २ विचार्य सुचिरं कालं विशिष्टं धर्म ३१

मास्तिकाः पुनः संशयमापन्ना विषण्णा विवशाश्च ते गत्वा हिमवतः पार्श्वे त्रिकालस्नानसंयुताः भस्मोद्धूलितसर्वांगास्त्रिपुंड्रांकितमस्तकाः
४ रुद्राक्षमालाभरणा जटावल्कलसंयुताः लिंगार्चनपरा नित्यं शंभोरमिततेजसः तत्तवंतस्तपः सर्वे वत्सराणां चयं महत् महादेव
प्रसादेन महाकारुणिकोत्तमः ६ शक्तिपाणिर्महातेजा द्वितीय इव शंकरः स्कंदः सर्वजगत्स्वामी प्रत्यक्षमभवत्स्वयं तं दृष्ट्वा मुनयः सर्वे प्र
सन्नेंद्रियमानसाः भक्त्या परमया युक्ताः विवशा गद्गदस्वराः ८ प्रणम्य दंडवद्भूमावुत्थायोत्थाय सादरं स्तोत्रैः स्तुत्वा महात्मानं समभ्यर्च्य
यथाबलं कृतांजलिपुटा भूत्वा पप्रच्छुर्धर्ममुत्तमं सोपि सर्वजगत्स्वामी तारकारिर्महाद्युतिः १० सर्वविज्ञानरत्नानामाकरः करुणाकरः सु
प्रसन्नः स्वयं प्राह मुनीनां धर्ममुत्तमं ११ स्कंद उ॰ शृणुध्वं मुनयः सर्वे महाभाग्यसमन्विताः वदामि संग्रहेणाहं युष्माकं धर्ममुत्तमं १२ स
मनीषिकयोत्पन्नो निर्मूलो धर्मसंज्ञितः श्रद्धया सहितो यश्च सोपि धर्म उदाहृतः निर्मूलोपि स्वबुध्यैव कल्पितोपि महर्षयः देवता
राधनाकारो धर्मः पूर्वोदिताद्वरः १४ देवताराधनाकारान्निर्मूलाद्बुद्धिकल्पितात् धर्माच्छ्रेष्ठः समाख्यातः समूलो धर्म आस्तिकाः समूले
षु च धर्मेषु बुद्धागमसमन्वितः धर्मश्रेष्ठ इति प्रोक्तो मया वेदार्थपारगाः १६ बुद्धागमोदितात् धर्मात् दृष्टागमसमीरितः धर्मश्रेष्ठ इति प्रोक्तो

स्०उ०भै

धर्मतत्त्वविशारदैः अर्हागमोदिताद्धर्मात्प्राजापत्यागमोदितः धर्मश्रेष्ठ इति प्रोक्तः सर्वधर्मार्थवेदिभिः १९ प्राजापत्यागमप्रोक्ताद्धर्माद्वेदवि
३२ शंवराः मयाश्रेष्ठ इति प्रोक्तो धर्मो विष्णावागमोदितः विष्णावागमोदिताद्धर्माद्दशोधारास्तिकोत्तमाः शैवागमोदितो धर्मो वरिष्ठो नैव संशयः
२० शैवागमोदितो धर्मो द्विधा पूर्वमुदीरितः अधस्रोतोद्भवस्त्वेक ऊर्ध्वस्रोतोद्भवोऽपरः अधस्रोतोद्भवाद्धर्मादूर्ध्वस्रोतोद्भवः परः कामि
कादिप्रभेदेन स भिन्नोऽनेकधा द्विजाः २१ अधस्रोतोद्भवो धर्मो बहुधा भेदितस्तथा ऊर्ध्वस्रोतोद्भवाद्धर्मात्स्मार्ता धर्मा महत्तमाः स्मार्ते
भ्यः श्रौतधर्माश्च वरिष्ठा मुनिसत्तमः तेषां शान्त्यादयः श्रेष्ठास्तेषां भस्मावगुंठनं २४ रुद्राक्षस्य धारणं चापि शिवाद्याख्याभिभाषणं शि
वलिंगार्चनं भक्त्या शिवोऽहमिति भावना शिवज्ञानैकनिष्ठस्य मुमुक्षा च विशिष्यते श्रौतवेदान्तवाक्यानां तात्पर्यस्य निरूपणं २६ वरिष्ठं सर्वधर्म ते
भ्यो ज्ञानं मोक्षैकसाधनं ज्ञानात्स्वात्तिपरो धर्म इति वेदार्थनिर्णयः २७ पूर्वोदितेभ्यः सर्वेभ्यः सत्यधर्मपरायण ज्ञानांगेभ्यः समासेन भस्मै
कं परमं मतं २८ भस्मसाधननिष्ठानां साक्षाद्ब्रह्म शिवाभिधं प्रकाशते यथा शान्त्या शान्तं वस्तु परात्परं ज्ञानस्य कारणेभ्यस्तु श्रुतिरेव महत्त
रा ज्ञानानां शंभुविज्ञानं वरिष्ठं नेतरद्भवेत् ३० वेदवाक्यसमुत्पन्नं शिवज्ञानं निरूपणे सम्यक् ज्ञानं प्रख्यातं इतरद्व्यवहारतः चोदनालक्षणे ३२

धर्मोऽधर्मः साक्षात्तन्निरूपणे इतरो व्यवहारे तु धर्म इत्याभिधीयते ३२ आस्तिकान्वयमात्रेण धर्माभासेऽपि सुव्रताः प्रयुक्तो धर्मशब्दस्तु मुख्यो
धर्मस्तु वेदजः यथा शंभुसमो देवो नास्ति पुण्यवतां वराः तथा वेदसमं मानं नास्ति तत्र न संशयः ३४ यथा विप्रसमो मर्त्यो नास्ति वेदविदां वराः
तथा वेदसमं मानं नास्ति तत्र न संशयः यथैवान्नसमं भोज्यं नास्ति लोके विचक्षणाः तथा वेद० ३६ यथा गंगासमा ख्याता नदी लोके न विद्यते त ३
था वे० ३७ यथा वाराणसीतुल्या पुरी लोके न विद्यते० तथा वे० ३८ यथा दभ्रसभातुल्यं स्थानं लोके न विद्यते० तथा वे० ३९ षडक्षरसमो मंत्रो यथा
लोके न विद्यते तथा वे० ४० यथा गुरुसमस्त्राता नास्ति संसारसागरात् तथा वे० ४२ अतश्च संक्षेपमिदं वदामि वः श्रुतिप्रमाणं शिव एव केवलः
वरिष्ठ उक्तः सितभस्मगुंठनं विशुद्धविद्या च न चेतरत्परं ४३ सूत उ० एवमुक्त्वा मुनीन्द्रेभ्यः श्रीमान्बर्हिणवाहनः जगत्स्वामी महातेजास्तत्रैवांत
र्हितोऽभवत् कावषेया अपि श्रेष्ठाः संसारोत्तारकारिणः महादेवं महात्मानं द्रष्टुः स्वयमागतं ४४ तं प्रणम्य महादेवं सर्वज्ञमपराजितं श्रीम
त्पंचाक्षरेणैव पूजयामासुरादरात् देवदेवो महादेवो देवानामपि देशिकः मुनिभ्यः कावषेयेभ्यः स्वात्मज्ञानं ददौ मुदा ४६ मुनीन्द्रा अपि ते सर्वे शुद्ध
विज्ञानिनां वराः प्रणम्य देवमीशानं सांबं संसारभेषजं प्रसादयित्वा देवेशं कृतार्था आत्मवेदनात् निस्पृहाः स्वात्मनोऽन्यत्र प्रययुर्हिमवतो गुहां ४८

विशिष्टधर्मः कथितः समासतो मयैव वेदार्थविचारलक्षणः इतीतिशिवं सकलं यलालवद्धानलाभाय विशुद्धचेतसा ४८ इति श्रीस्कंदपुराणे सूतसं
३३ हितायां यज्ञवैभवखंडे विंशोऽध्यायः सूत उ० अथातः संप्रवक्ष्यामि मुक्तिसाधनमास्तिकाः शृणुत श्रद्धया साक्षात्साक्षाद्वेदांतदर्शिनं १ पुरा श्वेतादि
नेरेष्यंता मुनयो मुनिसत्तमाः संख्याचरणतमेतेषां सह द्वादशसंख्यया २ तएते नरमदिग्धांगास्त्रिपुंड्रांकितमस्तकाः रुद्राक्षमालाभरणा रुद्राध्
यायनतत्पराः तपश्चेरुर्महातीव्रं श्रद्धया परया सह श्रीमद्दक्षिणकैलासे साक्षात्संसारनाशके ४ यस्य दर्शनमात्रेण पापानि सकलानि तु नश्यंति व
ह्निसंयुक्तं यथा तूलमदह्यते यस्मिन्विवसतां नृणां मरणकाले महेश्वरः ददाति परमां मुक्तिमचिरेण द्विजोत्तमाः ६ यत्र भस्मरतानां तु द्विजा
नां प्रतिवत्सरं यथाशक्ति धनं दत्वा मुच्यते भवबंधनात् यत्र प्रतिदिनं तु सांभकानामीश्वरस्य तु मुष्टिमात्रप्रदानेन महापापाद्विमुच्यते ८ यत्र सा
क्षाच्छिवज्ञाननिष्ठस्यातिप्रियेण तु भोजनं च तथा वस्त्रं दत्वा मुच्येत बंधनात् यत्र जप्तं हुतं दत्तं चिंतितं च दिने दिने ब्राह्मणानां तथान्येषामनंतं भ
वति ध्रुवं १० तपसा शंकरस्तेषां प्रसन्नः करुणानिधिः सान्निध्यमकरोत्तत्र शक्त्या परमया सह नंदक्षास्तांबमीशानं साक्षात्संसारभेषजं प्रणम्य
दंडवद्भूमौ पप्रच्छुर्मुक्तिसाधनं १२ देवोपि करुणाविष्टः साक्षात्संसारमोचकः मुनीनामुग्रतपसां च भाविमुक्तिसाधनं १३ ईश्वर उ० वक्ष्यामि पर ३३

मं गुह्यं मुक्तिसाधनमादरात् वर्णाश्रमसमाचारादेव मुक्तिर्न चान्यतः १४ स्वजातिविहितं धर्मं यः करोति प्रियेण तु स जायते कुले मुख्ये विप्राणामीश्वरा
ज्ञया स पुनर्जातकर्मादिसंस्कारैरपि संस्कृतः उपनीतो गुरोर्वेदानधीत्य विधिवन्मुनः १६ दारानाहृत्य यज्ञैश्च दानैश्च विविधैस्तथा तपश्च विविधं घो
५ रं कृत्वा कामनया विना मनश्शुद्धांतःकरणो ज्ञानवांश्च तथा विरक्तः सर्वलोकेभ्यो दोषाणां तु निरूपणात् १८ चित्तपाकानुगुण्येन प्रव्रज्यां कु
रुते पुनः तत्रामुमुक्षुः संन्यासी प्रेरितः परमेश्वरात् कुटीचकाभिधां वृत्तिं निर्वोथ बहूदकां हंसवृत्तिं तु वा नित्यं वा वृत्ते मुनिसत्तमाः २० मुमु
क्षुर्भिक्षुको नित्यं परहंसाभिधां शुभां वृत्तिमिच्छति देवेशप्रसादेन द्विजोत्तमाः कुटीचकादिवृत्तिस्थो मुक्तिमिच्छति चेद्द्विजः परहंसाभिधां
वृत्तिं प्राप्य याच्छंकराज्ञया २२ सर्वेषामेव भिक्षूणां शांतिर्दांतिस्तितिक्षुता स्नानं शौचमहिंसा च मिथ्याभाषणवर्जनं २३ अग्निरित्यादिभिर्मं
त्रैर्भस्मनोद्धूलनं तथा त्रिपुंड्रधारणं साक्षाद्दुस्त्वविद्याशिवात्मकं २४ लिंगे शिवार्चनं नित्यं धर्मः प्रोक्तः सनातनैः साक्षाद्वेदांतवाक्यानां श्रवणं
मननं तथा निदिध्यासनं साचार्यपरीचर्याप्रियेण तु परहंसस्य धर्मोयं विशेषेण समीरितः २६ सर्वेषामेव लाला साक्षात्संसारच्छेदी वस्यतु ब ५
सात्मविषयं ज्ञानं लभते भिक्षुकोचिरात् ज्ञानाद्वेदांतवाक्योत्थान्मुक्तिर्भिक्षुरवाप्नुयात् विना ज्ञानेन मुक्तिस्तु न सिध्यति न सिध्यति २८

स्.य.भै.
मुक्तिसाधनमाख्यातं संग्रहेण मुनीश्वराः ज्ञानेश्चयमपि श्रद्धां कुरुध्वं यत्नतः सदा २९ सूतउ० इत्युक्त्वा भगवान्रुद्रः साक्षात्संसारमोचकः आग
३४ मांतैकसंवेद्यस्तत्रैवांतर्हितो भवत् ३० भवंतोपि प्रसादेन शिवस्य परमात्मनः मत्तो लब्धपरिज्ञाना अभवन्नचिरेण तु श्रीमद्दक्षिणकैलासं सर्व
स्थानोत्तमोत्तमं वांछितार्थप्रदं नॄणामिति विज्ञविचक्षणाः ३२ श्रीमद्दक्षिणकैलासमहद्भ्यो मुक्तिमिच्छतः नास्ति संसारविच्छित्तिः सत्यं सत्यं न संशयः
वर्णाश्रमसमाचारं विना कैवल्यमिच्छतः नास्ति कैवल्यसंसिद्धिः सत्यं सत्यं न संशयः ३४ विष्णुप्रजापतींद्रेभ्यः शिवस्याधिक्यमादरात्
अविज्ञाय न संसारान्मुच्यते जन्मकोटिभिः प्रत्यक्ब्रह्मैकतो ज्ञानं विना कैवल्यमिच्छतां नास्ति कैवल्यमित्येषा शाश्वती श्रुतिराह हि ३६
भगवानपि सर्वज्ञः शिवः कारुणिकोत्तमः विना वेदांतविज्ञानं न मुक्तिरिति चाह हि विष्णुप्रजापतींद्रादिदेवताश्च तथैव च विना ज्ञानं न कैव
ल्यमित्याहुः पुरुषाधिकाः ३८ मुनयश्च महात्मानः सत्यसंधा जितेंद्रियाः विना ज्ञानं न कैवल्यमित्याहुर्वेदवित्तमाः अथ किं बहु
नोक्तेन मुनींद्रा वेदवित्तमाः मुक्ति[illegible]साधन विज्ञानं वेदादेव न चान्यतः ४० वेदमार्गजनितं तु वेदनं दोषहीनमतिशोभनं सदा अन्यमा
र्गजनितं विचारतो वेदमार्गरुचिकारणं क्रमात् ४१ इति श्रीस्कंदपुराणे सूतसंहितायां यज्ञवैभवखंडे एकविंशोध्यायः सूतउ० अथात ३४

१०

यंभणध्वं मुनिपुंगवाः। कामि~

:संप्रवक्ष्यामि मार्गप्रामाण्यनिर्णयं श्रद्धया सहिता यूयं वेदांश्च धर्मशास्त्राणि पुराणं भारतं तथा वेदांगान्युपवेदांश्च कामिकाद्यागमानपि २ कापा
लं लाकुलं चैव तयोर्भेदा द्विजर्षभाः तथा पाशुपतं सोमं भैरवं प्रमुखागमान् तेषामेवोपभेदांश्च शतशोथ सहस्रशः विष्णवागमांस्तथाब्रा
ह्मान्बौद्धार्हद्यागमानपि ५ लोकायतं तर्कशास्त्रं बहुविस्तारसंयुतं मीमांसामतिगंभीरां सांख्ययोगौ तथैव च अनेकभेदभिन्नानि तथा
शास्त्रांतराणि च निर्ममे शंकरः साक्षात्सर्वज्ञः संग्रहेण तु ६ प्रसादादेव रुद्रस्य ब्रह्मविष्ण्वादयः सुराः सिद्धविद्याधरा यक्षराक्षसाद्यास्तथैव
च मुनयश्च मुन[illegible]मनुष्याश्च यथाभाग्यं द्विजोत्तमाः तान्येव विस्तरेणैव संग्रहेणैव वा पुनः ८ कुर्वंति तानि नामानि कथितानि मनीषिभि
: अधिकारिविभेदेन नैकस्यैव सदा द्विजाः तर्कैरेतैर्हि मार्गैस्तु न हंतव्या मनीषिभिः यथा तोयप्रवाहाणां समुद्रः परमावधिः १० तथैव सर्व
मार्गाणां क्षेत्रिष्ठा महेश्वरः येन येन प्रकारेण जनैरेभिरुपासितः तत्तन्मार्गानुरूप्येण साधकत्वं ह्युपैति सः तत्प्रसादात्क्रमात्स्मार्गा
न्विशिष्टान्नेति मानवः १२ तत्र तत्र स्थितो देवः प्रसादं कुरुते स्वतु सोपानक्रमतो देवो वेदमार्गस्य हेतू वेदमार्गस्थितो देवः साक्षान्मुक्तेस्तु का वः
रणं तत्रापि कर्मभागस्थो ज्ञानप्रदप्रदो हरः १४ ज्ञानभागस्थितः शंभुर्ज्ञानद्वारेण मोक्षदः एकरूपापरामुक्तिस्तस्य तद्विषयामतिः एकरू

३५ पापरामुक्तिस्तस्यनद्वितयामतिः एकरूपाभवेन्नैनानारूपाभविष्यति वेदांतःशंकरंसाक्षाद्विविशेषाद्वयात्मना १६ वक्तिमार्गांतराण्येवंनतोविद्यात्
वेदजा अतोमार्गांतराज्ज्ञानाभ्येसोमुनिसत्तमाः अविद्यानेवविद्यास्तुशिनिसम्यग्द्विरूपणं तत्तन्मार्गांतराणांतुमाम्राण्येवंवेदवित्तमाः १८ मुक्ते
रन्यत्रनात्रैवक्रमेणैवात्रमानता अतोवेदांतभागस्थोमहादेवोचिरेणतु मुक्तिंददातिनान्यत्रस्थितंसोपिक्रमेणतु ददातिपरमांमुक्तिमि
त्येषाशाश्वतीश्रुतिः २० अतोवेदस्थितोमर्त्योनान्यमार्गंसमाश्रयेत् वेदमार्गैकनिष्ठानांनकिंचिदपिदुर्लभं अत्रैवपरमामुक्तिर्भुक्तयश्चा
त्रपुष्कलाः अतोधिकारिभेदेनमार्गमानंनसंशयः २२ ईश्वरस्यस्वरूपेचबंधहेतौतथैवच जगतःकारणंमुक्तोज्ञानादौचतथैवच मार्गाणांचैवि
रुद्धांशावेदांतेनविचक्षणाः नेपिभेदमतीनांचमहामोहहतात्मनां २४ वांछामावानुगुण्येनभद्दत्तानयथार्थतः दर्शयित्वान्तरांमर्त्योधावतां
गीयथाग्रहीत् दर्शयित्वातथाह्युद्दमिदंसर्वंमहेश्वरः पश्चात्साकानुगुण्येनददातिज्ञानमुत्तमं २६ तस्मादुक्तेनमार्गेणशिवेनकथिताअमी
मार्गामानंनचामानंमृषावादीकथंशिवः महाकारुणिकोदेवःसर्वज्ञोनिर्मलःखलु तथापिवेदोमार्गाणामुत्तमःसर्वसाधकः २८ सर्वमु ३५
क्तंसमासेनमार्गप्रामाण्यनिर्णयं एवंबुध्वाश्रुतिश्रद्धांकुरुध्वंयत्नतोद्विजाः २९ इतिश्रीसूतसंहितायांयज्ञवैभवखंडेद्वाविंशोध्यायः

सूत३० अथातःसंप्रवक्ष्यामिप्रसादक्रममादरात् यस्यविज्ञानमात्रेणप्रसादःशांकरोभवेत् १ पुरासनत्कुमाराख्योमुनिःसत्यपरायणः ब्रह्माणंब्र
ह्मसंपन्नमपृच्छदिदमादरात् सोपिसर्वजगद्धातासहतेनमुनीश्वरः नारायणमनाद्यंतमपृच्छदिदमुत्तमं सोपिनारायणःश्रीमान्सहताभ्यामु
मापतिं कैलासशिखरेरम्येसमासीनमतिप्रभुं ४ प्रणम्यदंडवद्भक्त्यास्तुत्वारुद्रेणसुव्रताः अपृच्छद्देवदेवेशमिदंपरमकारणं देवदेवो
पिसर्वज्ञःसांबःसर्वफलप्रदः प्राहगंभीरयावाचाविष्णवेमुनिपुंगवाः ६ श्रुत्वाभगवान्व्यासःसाक्षात्सत्यवशंकरात् सनत्कुमारात्सर्व
ज्ञाद्दुक्तवान्ममसादरं अहंभाग्यवतामद्ययुष्माकंमुनिपुंगवाः केवलंकृपयावक्ष्येतदेवपरयामुदा ८ नित्यकर्माद्यनुष्ठानात्पापनाशो
भवत्यतः चित्तशुद्धिर्भवेज्जंतोरुद्रस्यैवप्रसादतः तयासंसारदोषस्यदर्शनंभवतिस्वतः ततोविरक्तिःसंसारात्तुनस्त्यागस्यकर्मणां १० विरिंच
स्यप्रसादेनततःशांत्यादिसाधनं प्रसादाद्देववात्साक्षान्मुमुक्षुत्वंपुनःस्वतः विघ्नराजप्रसादेनगुरुपादपरिग्रहः तेनयोगाभिधंध्यानमैश्व
रंज्ञानसाधनं १२ पुनःसांख्याभिधंज्ञानंपार्वत्यास्तुप्रसादतः सांख्यस्योत्पत्तिवेलायांमोचकस्यशिवस्यतु प्रसादोजायतेतेनसंसारस्यवि
मर्दनं संसारमोचकःसाक्षाच्छिवएवनचापरः १४ अन्याश्चदेवताःसर्वाःप्रणाड्यैवद्विमोचकाः अनेकजन्मसंसिद्धःश्रौतस्मार्तपरायणः

स्क.त.भै:

१५ ऋमेणैवं महादेवं मोचकं परमेश्वरं प्राप्नुयात्प्रसादेन मुमुक्षुरिति हि श्रुतिः १६ प्रसादहेतुभूतेषु प्रणवाख्यो महामनुः वरिष्ठः कथि-
३६ तः प्राज्ञैर्देवतासु विशेषतः विष्णुर्मुख्य इति प्रोक्तस्तथा सकलधर्मतः रुद्राराधनमेवोक्तं वरिष्ठमिति वैदिकैः १८ ओंकारस्य प्रसादेन विष्णो-
श्चैव प्रसादतः रुद्राराधनवांछा स्यात्तदाराधनतः पुनः ज्ञानमानंदमद्वैतं परं ब्रह्माधिगच्छति प्रसादादेव रुद्रस्य ज्ञानं मोक्षैकसाधनं २०
देवयानाभिधा विद्योर्गतिः स्यद्गुः प्रसादतः ब्राह्मण्यं कीर्तिरिंद्रोश्वर वैराग्यमेव तु अग्नेरैश्वर्यमतुलं पित्र्यमारोग्यमस्य तु पुरंदरस्य सौभाग्यं बलं वा-
योः प्रसादतः २२ विघ्नराजस्य देवस्य कार्यसिद्धिरविघ्नतः षण्मुखस्य प्रसादेन सर्वसिद्धिरयत्नतः भारत्याश्च प्रसादेन वाग्विभूतिरयत्नतः श्रीदेव्या-
श्च प्रसादेन सर्वैश्वर्यमयत्नतः २४ दुर्गादेव्याः प्रसादेन सर्वत्र विजयो भवेत् कामिनां देवताः सर्वाः सांसारिकफलप्रदाः कामनारहितानां तु शुद्धिद्वारेण
देवताः महादेवप्रसादस्य हेतुभूता भवंति हि २६ महादेवप्रसादस्तु न हेतुः कस्यचिद्द्विजाः स्वयं भुक्तिकरः पुंसां कामिनामचिरेण तु स्वयं मुक्तिकरः सा-
क्षात्कामनारहितस्य तु चिरेणैव तु कालेन शिवस्यैव प्रसादतः २८ देवता भुक्तिदा एव मुक्तिदानस्वतंत्रतः महादेवप्रसादेन समः कश्चिन्न विद्य- ३६
ते महादेवप्रसादेन खलु विष्णुपदं द्विजाः ब्रह्मेंद्रादिपदं वापि नस्वतः सर्वदेहिनां ३० प्रसादे सति देवस्य शिवस्य परमात्मनः वैदिकानां तथा

२८

न्येषामपि मुक्तिर्हि सिध्यति ब्राह्मणाश्च विमुच्यंते प्रसादेन शिवस्य तु क्षत्रियाश्च तथा वैश्याः शूद्रा अपि च संकराः ३२ पाखंडिनो विमुच्यंते प्रसादेन शिव-
स्य तु किं पुनर्वैदिका विप्राः स्त्रियः सर्वा मुनीश्वराः बाल्ययौवनवार्धक्याद्यवस्थासु च कश्चन खरोष्ट्रनरवोपी[illegible]प्रसादेनैव केवलं ३४ अ-
यत्नेन विमुच्यंते नात्र संदेहकारणं गर्भस्थो मुच्यते कश्चिज्ज्ञानमात्रेण कश्चन पाखंडाश्चापि मुच्यंते प्रसादेन महेशितुः वैदिकाश्च खरोष्ट्रादिजातय-
श्च तथैव च ३६ पांसवः पर्वतायंते पांसयंते च पर्वताः शिवप्रसादयुक्तानामाज्ञयैव तु केवलं ब्रह्मनारायणाद्यास्तु देवता अखिला अपि विजा-
यंते च नश्यंति तथाज्ञयैव प्रसादिनः ३८ प्रसादस्य च माहात्म्यं शिवस्य परमात्मनः अपि देवा न जानंति श्रुतयश्च न संशयः ३९ शंकरोपि महाते-
जाः शांकरा वा मुनीश्वराः शिवप्रसादमाहात्म्यं किं तु जानाति वा न वा ४० भवंतोपि महादेवप्रसादाय मुनीश्वराः गुरुपादांबुजं नित्यं पूजयध्वं यथा-
बलं श्रीमद्व्याघ्रपुरे पुण्ये सर्वदेवसमादृते स्वस्वरूपानुसंधानप्रमोदेनैव केवलं ४२ साक्षाद्भ्रसभामध्ये नृत्यंतं देवनायकं अंबिकासहितं नि-
त्यं भजध्वं परया मुदा श्रीकालहस्तिनाथस्य प्रणामालोकनादयः अपि शंभोः प्रसादाय भवंति द्विजपुंगवाः ४४ चारणस्यां महादेवप्रणामालो-
कनादयः अपि शंभोः प्रसादाय भवंति द्विजपुंगवाः ४५ प्रसादलाभाय हि कर्मसंचयः प्रसादलाभाय हि देवतार्चनं प्रसादलाभाय हि देवता-
स्तुतिः प्रसादलाभाय हि सर्वमीरितं ४६ शिवप्रसादेन विना न भुक्तयः शिवप्रसादेन विना न मुक्तयः शिवप्रसादेन विना न दैवताः शिवप्रसा-

स्र·य·भै·
देन विना न देवताः शिवप्रसादेन हि सर्वमास्तिकाः ४७ शिवप्रसादेन समो न विद्यते शिवप्रसादादधिको न विद्यते शिवप्रसादेनाशिष्यसन्निधिः
३७ शिवप्रसादेन विशुद्धतात्मनः ४८ शिवप्रसादेन युतस्य वैदिकं न विद्यते कर्म जनस्य सुव्रताः शिवप्रसादेन युतस्य तांत्रिकं न विद्यते कर्म न चैव किंच
न ४९ शिवप्रसादेन युतस्य सुव्रतान जन्मनाशो भवतः स देवतु शिवप्रसादेन युतः स्वयं शिवः शिवप्रसादस्तु शिवप्रसादतः ५० इति श्रीसूतसंहिता
यां यज्ञवैभवखंडे त्रयोविंशोध्यायः सूत उ० अथातः संप्रवक्ष्यामि प्रसादस्य तु वैभवं अत्यंतश्रद्धयोपेताः शृणुतातीव शोभनं १ पुरा कश्चिन्महापा
पी दुर्घटो नाम नामतः जातोऽश्रेष्ठो महाक्रूरो महासाहसिकोत्तमः २ अनेन तेन महामोहाद्ब्राह्मणानां शतं हतं गवां शतं हतं तेन दग्धं गेहशतं तथा
अर्थचौर्यं कृतं तेन नराणामविचारतः ३ बलात्परस्त्रियो भुक्ता बहुशो दृष्टिगोचराः ४ वापीकूपतडागादि जलं तेनैव दूषितं वर्णाश्रमसमाचारमर्यादा
तेन भेदिता सहस्रजन्मतः पूर्वं दुर्घटेन मुनीश्वराः शिवयोगिकरे तेन सुवर्णं निष्कमुत्तमं ६ दत्तं तेन मतिस्तस्य जाता कालेन शोभना अहो
मोहेन पापानि कृतानि सुबहूनि च मया तेषां न पश्यामि विनाशस्य तु कारणं ब्राह्मणा वेदविद्वांसो वदंति नरकान्मम ८ इति व्याकुलचित्तस्य दुर्घटस्य
दुरात्मनः मतिप्रदानं कृतवान्ब्राह्मणः कश्चिदास्तिकः ब्राह्मण उ० श्रीमद्व्याघ्रपुरं नाम स्थानमस्ति महीतले यत्र नृत्यति सर्वात्मा शिवः संसारमोच
कः १० यस्य माहात्म्यविज्ञानाद्विष्णुर्विश्वजगन्मयः ततापपरमं घोरं तपस्त्वैश्वर्यं प्रति यस्य माहात्म्यविज्ञानाद्ब्रह्मा विश्वामराधिपः त ३७

रंघोरंत०
नाप परमं घोरं तपस्त्वैश्वर्यं प्रति १२ यस्य माहात्म्यविज्ञानादिंद्रः शस्त्रभृतां वरः तता० १३ यस्य माहात्म्यविज्ञानाद्देवा यक्षाश्च किंनराः तपवं
तोषं १४ यस्य माहात्म्यविज्ञानान्मुनयो मुनिसत्तमाः तपवं० १५ यत्र सर्वेश्वरं दृष्ट्वा प्रसादं लब्धवान्हरिः तत्र देवमुपास्यैतं मन्त्रैस्तं तमुमा
पतिं १६ यत्र सर्वेश्वरं दृष्ट्वा प्रसादं लब्धवानजः तत्र देव० १७ यत्र वज्री हरं दृष्ट्वा प्रसादं लब्धवान्द्विजाः तत्र देव० १८ यत्र दृष्ट्वा हरं देवा अ
शेषा आस्तिकोत्तमा यक्षराक्षसगंधर्वसिद्धविद्याधरादयः १९ प्रसादं लब्धवंतस्ते स्वाधिकारानुरूपतः तत्र दे० २० सूत उ० इत्येवं ब्राह्मणेनोक्तो दु
र्घटः पुण्यगौरवात् श्रीमद्व्याघ्रपुरं गत्वा श्रद्धया परया सह प्रदक्षिणत्रयं कृत्वा स्नात्वा नित्यमतंद्रितः नमोंतं शिवमंत्रं तु जपित्वाष्टोत्तरं शतं २२
श्रीमदभ्रसभामध्ये मन्त्रैस्तं तमुमापतिं दृष्ट्वा नमो महाभक्त्या दंडवत्प्रणिपत्य च रुद्रभक्ताय विप्राय भस्मनोद्धूलिताय च शिवज्ञानैकनिष्ठाय दत्वा धान्यं
धनं मुदा २४ सत्यवाक्शौचसंपन्नः कामक्रोधादिवर्जितः वस्त्राणां त्रयं तत्र दत्वा सातिप्रियेण सः देवदेवो महादेवो महाकारुणिकोत्तमः प्रसादमकरो
त्तस्य दुर्घटस्य दुरात्मनः २६ शिवप्रसादेन स दुर्घटः पुनः समस्तलोकाधिपतिर्बभूव विमुक्तिमप्याप महत्तरामिमां परं प्रमात्मप्रथनैकलक्षणां २७
इति श्रीसूतसंहितायां यज्ञवैभवखंडे चतुर्विंशोध्यायः सूत उ० भूयोपि देवदेवस्य प्रसादस्य तु वैभवं प्रवक्ष्यामि समासेन शृणुत श्रद्धया स
ह १ पुरा कश्चिद्द्विजश्रेष्ठः सर्वलक्षणसंयुतः सत्यसंधाभिधः शुद्धो विष्णुभक्तो विशेषतः २ अभक्तेन कृतं सर्वं श्रुतिस्मृत्युदितं मुदा मतिश्चाचकृता

स्.य.भे. विष्णोर्बहुशः पंडितोत्तमाः आराधितश्च भगवान्विष्णुर्विश्वजगन्मयः दिने दिने महाभक्त्या सुगंधकुसुमादिभिः ४ वेदवादविधानज्ञास्तेन ज
३८ न्मदिने दिने चिरंतनानि स्थानानि विष्णोर्दर्शनानि सादरं वेदवामनुजास्तेन पूजिताश्च दिने दिने सर्वसंवेद्यवेदज्ञं सत्यसंधेन सादरं ६ पुनर्नारायणः
श्रीमान्शंखचक्रगदाधरः प्रत्यक्षमभवत्तस्य प्रसन्नः पंकजेक्षणः ७ तं दृष्ट्वा सत्यसंधस्तु प्रसन्नेंद्रियमानसः प्रणम्य दंडवद्भूमौ भक्त्या परमया सह
८ गंधपुष्पादिभिर्दिव्यैः समाराध्य यथाबलं स्तोतुमारभते विष्णुं विश्वलोकैककारणं सत्यसंधः ९ विष्णवे विश्वलोकानां हेतवे विविधात्मने वे
दवेदांतविज्ञानामात्मभूताय ते नमः १० कृष्णाय क्लेशहर्त्रे च सर्वमकेनापि हितमा प्रमेयाय प्रबोधाय विदुषामात्मने नमः केशवायातिशुद्धाय केव
लाय परात्मने केषांचिद्दुर्दर्शिनानां प्रसन्नाय मौनिने नमः १२ मुंजकेशाय मुंडाय मुंडिनामार्तिहारिणे मौननिष्ठस्य सर्वस्य मुक्तिदाय नमो हंविनमः
श्रीवत्सांकाय वर्याय वरदाय परात्मने वंचकानामगम्याय वत्सलाय भृताय ते नमः १४ श्रीपते भूपते तुभ्यं गोपते मम रूपिणे मयकारमहामोहवि
नाशाय नमो नमः पीतवाससे पीताय पापपंजरहारिणे पापकर्मपराणां तु भंजकाय नमो नमः १६ विष्वक्सेनाय विश्वाय विश्वोत्पत्त्यादिहे
तवे विश्वविज्ञानरूपाय निर्मलाय नमो नमः विश्वरूपाय विश्वासलभ्याय विदितात्मने विश्वोत्तीर्णाय विश्वस्य साक्षिरूपाय ते नमः १८ मुरा
रये मुहूर्ताय मुहूर्तस्य विधायिने मुहूर्तं भजतां नृणां मुक्तिदाय नमो नमः शौरिणे शार्ङ्गिणे तुभ्यं शंखकुंदेंदुरूपिणे शाकमूलपराणां तु ३८

पा२

२१

शांतिदाय नमो नमः २० पद्मनाभाय पद्मायाः पतये पद्मचक्षुषे हृत्पद्मकर्णिकामध्ये समासीनाय ते नमः मुकुंदाय मुकुंदस्य महानर्वस्य रक्ष
सः हर्त्रे भर्त्रे विशिष्टानामात्मने विदुषां नमः २२ गोविंदाय गवां नित्यं प्रपालकाय परात्मने नंदगोपाय गुप्ताय नमः सर्वस्य हेतवे भूधराय भुजं
गस्य महाकोपच्छिदे चिरात् भूतनाथाय भूतानामाधाराय नमो नमः २४ वैकुंठाय विशिष्टानां विशिष्टज्ञानदायिने विशिष्टाय विरंचादिदेवेभ्य
श्च नमो नमः क्षीरोदशायिने साक्षात्क्षीरोदस्याधिदेवते निराधाराय नित्याय नित्यानंदाय ते नमः २६ यज्ञरूपाय यज्ञस्य फलमासैकहेतवे
यज्ञानां पतये तुभ्यं यज्ञगम्याय ते नमः जनार्दनाय दैत्यानां शत्रवे शक्तिदायिने स्वभक्तानां विशुद्धानां विशेषेण नमो नमः २८ वासुदेवाय
वस्त्रादिदायिने वासवादिभिः पूजिताय पुराणाय पुंसे वत्सलात्मने नमः दामोदराय देवानां शत्रुनाशैकहेतवे दांतचित्तजनस्यास्य रक्षकाय
नमो नमः ३० अच्युतायाखिलस्यास्य साक्षिणे च्युतवर्जिभिः असक्ताय सुसक्ताय स्वसंवेद्याय ते नमः ३१ हरये हारकेयूरकटकादिविभू
षणैः अलंकृताय कल्याणशरीराय नमो नमः ३२ हृषीकेशाय हेमादिधनधान्यप्रदायिने हृदि चिंतयतां नित्यं नमः सत्यपरात्मने नारायणा
य नरकार्णवतारणाय नानाविधस्य जगतः स्थितिकारणाय मोहावृतस्य निखिलस्य जनस्य सद्यः श्रेयस्कराय पुरुषाय नमः परस्मै ३४
स्तुत्वा एवं भक्त्या हरिं लक्ष्मीवासं सत्यसंधो महाद्विजः प्रसादं कुरु मे देव मुच्येयं येन बंधनात् इति तं प्रार्थयामास सत्यसंधो जनार्दनं जनार्दनो

सू·य·मै पिभगवान्सर्वभूतहितेरतः ३६ सत्यवागनुरूपश्चसम्यग्ज्ञानमहोदधिः प्राहगंभीरयावाचासत्यसंधंमुनिद्विजाः ३७ विष्णुरु० सत्यसंधमहाभ
३८ ममसत्यपरायण श्रोतस्मान्नैकनिष्ठानामुत्तमोत्तमसुव्रत ३८ नाहंसंसारमग्नानांसाक्षात्संसारमोचकः ब्रह्मादिदेवताश्चान्यानैवसंसारमोच
काः शिवएवद्विजेन्द्रानांमहासंसारवर्तिनां संसारमोचकःसाक्षात्सर्वज्ञःसांबईश्वरः ४० नतस्यकार्यंकरणंवस्तुतोविद्यतेनघ नतत्समश्चा
भ्यधिकश्चेततनोविद्यतेकश्चित् तथापिपरमाशक्तिर्विविधातस्यशूलिनः श्रूयतेसर्ववेदेषुस्वज्ञानंचबलंस्वकं ४२ स्वव्यापारश्चतस्यस्वतः स्या
सिद्धोनचान्यतः ममब्रह्मादिदेवानामपितस्यप्रसादतः विज्ञानादित्रयंयस्मात्सएवंमोचकः अहंब्रह्मादिदेवाश्चप्रसादात्तस्यशूलिनः ४४ भय
प्रणाद्यैवुहिसंसारमोचकानात्रसंशयः प्रसादेमुक्तिदःसाक्षाच्छिवःसत्यादिलक्षणात् अप्रसन्नभवाद्दुद्रादसंगात्सर्वसाक्षिणः अंबिका
सहितादस्मात्सर्वज्ञादेवनान्यतः ४६ ममब्रह्मादिदेवानामपिसाक्षाच्छिवेछया भोगमोक्षप्रदःपुंसांप्रसादोजायतेनघ तस्मात्प्रसादश्चान्येषां
ममवाखिलशूलिनः प्रसादंभोगमोक्षायनस्वयंनात्रसंशयः ४८ पुनःपूर्णप्रसादायसत्यसंधममप्रिय महादेवंमहात्मानंभजका
रुणिकोत्तमं महादेवंकांक्षितंनाप्नुयाद्यदि महादेवोमहादेवंकथमन्यंसमाश्रयेत् ५० नामतश्चार्थतश्चापिमहादेवोमहेश्वरः तद
न्येकेवलंदेवामहादेवानतेनघ महादेवंविनायोमांभजतेश्रद्धयासह नास्तितस्यविनिर्मोक्षःसंसाराज्जन्मकोटिभिः ५२ सर्वमुक्तंस ३९

वं स नास्ति त्व

मासेनममभक्तस्यतेनघ शिवादन्यंपरित्यज्यशिवंसांबंसदाभज ५३ सूतउ० एवमुक्त्वाहरिःश्रीमान्किरीटीगरुध्वजः सर्वविज्ञानसंपन्नस्तत्रैवां
तर्हितोभवत् ५४ सत्यसंधोमहाधीमान्महाविष्णोःप्रसादतः परित्यज्याखिलान्देवानाश्रितोऽभवदीश्वरं ईश्वरस्यप्रसादेनसत्यसंधोम
हाद्विजः ज्ञानंवेदांतजंलब्ध्वाविमुक्तोभवबंधनात् ५६ भवंतोपिद्विजश्रेष्ठाःशिवादन्यत्तुदैवतं परित्यज्यप्रसादायभजध्वंशिवमव्ययं
सर्वमुक्तंसमासेनयुष्माकंमुनिपुंगवाः ममवाक्येतिविश्वासंकुरुध्वंयत्नतोद्विजाः ५८ अपिरहस्यमिदंकथितंमयाश्रुतिपरंपरयाचसमा
गतं मुनिपरंपरयाचसमागतंनकथितव्यमशिष्टजनस्यतु ५९ इतिश्रीसूतसंहितायांयज्ञवैभवखंडेपंचविंशोध्यायः श्रीसूतउ० अथातः
संप्रवक्ष्यामिशिवभक्तिंसमासतः ययामुक्तिर्विमुक्तिश्चमुनीशाःसर्वदेहिनां भक्तिर्बहुविधाज्ञेयाभवानीसहितस्यतु एकाशंकरसायुज्य
श्रद्धासारतरापरा २ अन्याशंकरसारूप्यश्रद्धातीवशिवप्रिया अपराशिवसामीप्यश्रद्धावेदविदांवराः इतराशिवसालोक्यश्रद्धाभीष्टफलप्र श्र
दा अपराचशिवज्ञानश्रद्धापापनिकृंतनी ४ अन्यावेदशिरःश्रद्धासाक्षाद्विज्ञानदायिनी अपराश्रवणश्रद्धामोक्तावेदांतवेदिभिः इतरामननश्र त
द्धानुत्तमांसंभावनाप्रदा अन्यादेवेश्वरध्यानश्रद्धारूपामहत्तरा ६ असरोद्धूलनश्रद्धाभस्मनापापनाशनी त्रिपुंड्रधारणश्रद्धातदन्यातत्प्रदा
यीनी ७ रुद्राक्षधारणश्रद्धाचापिभक्तिरुदीरिता षडक्षरजपश्रद्धाचापिभक्तिर्महत्तरा ८ शिवलिंगार्चनश्रद्धाचापिभक्तिरनुत्तमा लिंगार्चे

न दिदृक्षा च महाभक्तिः प्रकीर्तिता अनुमोदनमीशस्य पूजायां भक्तिरुच्यते ९ उपकरणे श्रद्धा चापि भक्तिरुदीर्यते १० शिवोत्सवदिदृक्षा च शिवभ
क्तिर्महत्तरा तथैवोत्सवसेवा च भक्तिरुक्तातिशोभना तथैवोत्सवसेवार्थमागतानां महात्मनां अन्नपानप्रदानं च शिवभक्तिरुदीरिता १२ महा
देवप्रसादानां श्रवणे रोमहर्षणं महाभक्तिरिति प्रोक्ता महामाहेश्वरैर्जनैः कथाश्रवणकाले तु शिवस्य परमात्मनः विकारः स्वरनेत्रादेर्भ
क्तिरुक्ता महात्मभिः १४ उद्यानकरणं शंभोः शिवभक्तिरुदाहृता वापीकूपतडागादिकरणं च मनीषिभिः प्राकारगोपुरादीनां शिवस्यामितते
जसः इष्टकाद्यैश्च निर्माणं शिवभक्तिरुदीरिता १६ शिवशासनयुक्तस्य पूजा श्रद्धापुरःसरं शिवभक्तिरिति प्रोक्ता शिवभक्तिपरायणैः शिवाराधनबुद्ध्यै
व नित्यानामपि कर्मणां नैमित्तिकानां करणमपि भक्तिः शिवस्य तु १८ अभ्यासः शिवविद्यायास्तस्या अध्यापनं तथा शिवभक्तिरिति प्रोशिवभक्ति क्ता
परायणैः लेखनं शिवविद्यायाः प्रदानं पुस्तकस्य तु शिवभक्तिरिति प्रोक्ता शिवशास्त्रविशारदैः २० शिवपुस्तकनिक्षेपस्थाननिर्माणमास्तिकाः
शिवभक्तिरिति प्रोक्ता शिवदृष्टिपरायणैः शिवज्ञानैकनिष्ठस्य मठिकादानमेव च अन्नपानादिदानं च शिवभक्तिरुदीरिता २२ शिवज्ञानैकनिष्ठ ६
स्य शुश्रूषया सह शिवभक्तिरिति प्रोक्ता शिवभक्तिपरायणैः जापिनां शिवमन्त्रस्य शुश्रूषा च महात्मनां शिवभक्तिरिति प्रोक्ता शिवतत्त्वविचिन्तकैः
२४ शिवयात्रापराणां तु शुश्रूषा च तथैव च शिवयात्रा च विद्वद्भिः शिवभक्तिः प्रकीर्तिता शिवयात्रापराणां तु बाधकानां तु बाधनं शिवभक्ति
णाभो २

रिति प्रोक्ता शिवयात्रापरायणैः २६ शिवापराधनिष्ठानां छेदनं परया मुदा शिवभक्तिरिति प्रोक्ता शिवाराधनतत्परैः शिवज्ञानैकनि
ष्ठानां शिवज्ञानस्य सुव्रताः दूषकस्य शिरश्छेदः शिवभक्तिः प्रकीर्तिता २८ भस्मसाधननिष्ठानां दूषकस्य मुनीश्वराः छेदनं शिरसः सा
क्षाच्छिवभक्तिरुदीरिता विष्णुदीनां तु देवानां दूषकस्य दुरात्मनः बाधनं शिवभक्तिस्तु प्रोक्ता वेदान्तवेदिभिः ३० विष्ण्वादिदेवताभक्तस्यै
व दूषणकारिणः बाधनं च महाप्राज्ञैः शिवभक्तिः प्रकीर्तिता देवद्रव्यस्य भोक्तुश्च ब्राह्मणद्रव्यहारिणः बाधनं च महाप्राज्ञैः शिवभक्तिः प्रकी
र्तिता ३२ आतुराणां त्राणं रक्षा रक्षकाणां च रक्षणं भीतस्याभयदानं च शिवभक्तिः प्रकीर्तिता सर्वभूतेषु कारुण्यं प्रियभाषणमेव च सर्वभू
तहितश्रद्धा साक्षाद्भक्तिः शिवस्य तु ३४ सर्वभूतेषु दोषस्यादर्शनं गुणदर्शनं सर्वभूतेषु मैत्री च शिवभक्तिरुदीरिता महादेवेति विश्वासो विश्वा
सः शिववेदने वेदान्तेषु च विश्वासः शिवभक्तिरुदीरिता ३६ गुरुकार्येषु विश्वासो गुरुशुश्रूषणं तथा सापि भक्तिरिति प्रोक्ता वेदवेदान्तवेदि
भिः भक्तिरेव परमार्थदायिनी भक्तिरेव भवरोगनाशिनी भक्तिरेव परवेदनप्रदा भक्तिरेव परमुक्तिकारिणी ३८ भक्तियुक्तजनचित्तपंकजे भु
क्तिमुक्तिफलदः पुरातनः शक्तियुक्तपरविग्रहः शिवः सत्यमेव सततं प्रकाशते ३९ भक्तियुक्तजनपरितुष्टः परमेशः सत्यसुखबोधपरमं
वपुरनन्तं स्वस्य मुनयः परमकारुणिक ईशः शक्तिसहितस्त्रिनयनः खलु ददौ ४० इति श्रीस्कन्दपुराणे सूतसंहितायां यज्ञवैभवखण्डे षड्विं
ति॰

सू.य.भै. ऽध्यायः सूत उवाच अथातः संप्रवक्ष्यामि परात्परतरं पदं यत्सत्तायोगतः सर्वं सत्यवद्भवति द्विजाः १ यस्यैव चित्प्रकाशेन सर्वं चेतयते जगत्
४१ यस्यानंदाभिसंबंधात्सर्वं प्रेमास्पदं भवेत् २ प्रतीताश्चेतिकास्तस्माद्भूतानि मुनिपुंगवाः उत्कृष्टानि तथा तेभ्यो जीवात्मा चेतनः प्रभुः ३ समष्टि
व्यष्टिभावेन सोपि भिन्नः परस्परं व्यष्टयश्च तथा भिन्नाः स्वस्वभावानुरूपतः ४ देवतिर्यङ्मनुष्यादिशरीरं प्राप्नुवंति च आसां समष्टिभूतस्तु श्रेष्ठः
सर्वात्मना बुधाः ततो विशिष्टाः सकलब्रह्माण्डस्य विभूतयः ताभ्यो अन्योन्यं विशिष्टास्तु यथा जीवा मुनीश्वराः ६ तत्सां ब्रह्माधिकस्तस्माद्विष्णुः सुरश्रेष्ठः प्रकीर्ति
तः सोपि स्वव्यष्टिभूतेभ्यो वरिष्ठः परिकीर्तितः ७ ततो रुद्रोधिकः सोपि स्वव्यष्टिभ्योधिकः स्मृतः ब्रह्मविष्णुश्वरुद्रस्थपुरतत्वविभूतयः एताभ्यश्चाण
मधिकः सर्वकारणमीश्वरः ८ ततोधिकं परं तत्त्वं ज्ञानमानंदमद्वयं इयमेव हि सर्वेषां काष्ठा सा परमा गतिः श्रुतौ स्मृतौ ९ योयं मानुष आनंदस्ततः शतं
गुणोत्तरः १० मनुष्यगंधर्वादीनामानंद इति गम्यते ब्रह्मानंदशतेनैव विष्णोरेक आनंद उच्यते तस्यानंदशतं रुद्रस्यैक आनंद एव हि रुद्रानंदशतं
सर्वकारणस्य शिवस्य तु १२ कारणत्वोपलक्ष्यस्य शिवस्य परमात्मनः सत्यचिन्मात्ररूपस्य भूमानंदस्वरूपतः १३ एवं क्रमेण सर्वेषां ज्ञानाधि
क्यमपीष्यते स्कंधशाखादिभेदेन यथा वृक्षो व्यवस्थितः १४ तथा रुद्रादिभेदेन शिव एको व्यवस्थितः उत्कर्षश्चापकर्षश्च स्कंधशाखादिवस्तुषु तथो
त्कर्षापकर्षश्च रुद्रविष्ण्वादिषु स्थितः तरंगबुद्बुदादीनां यथा लोके व्यवस्थितः १६ उत्कर्षश्चापकर्षश्च तथा रुद्रादिषु स्थितः विश्वाधिकत्वं रुद्र ४१

स्यकारणस्य शिवस्य च न वदंति जना ये ते राक्षसास्युर्न संशयः व्यावहारिकदृष्ट्यायं विभागः परिकीर्तितः १८ प्रमाणदृष्ट्या वस्त्वेकमेव नित्यं
न संशयः अनादृत्य महामोहात्प्रमाणं मुनिमानवाः अयं परस्त्वयं नेति विवदंते परं महापापवतां नृणां रुद्राधिक्यं न भासते २० अनेकजन्मसि
द्धानां श्रौतस्मार्तानुवर्तिनां रुद्राधिक्यं स्वतो भाति प्रमाणैरपि तर्कतः सोपानक्रमतो देवानां संसारमोचकाः रुद्रः संसारमग्नानां साक्षात्सं
सारमोचकः २२ अतः सर्वं परित्यज्य शिवादन्यत्तु दैवतं शिव एकः सदा ध्येयः साक्षात्संसारमोचकः वृक्षस्य मूलसेकेन शाखाः पुष्यंति वै य
था शिवध्यानेन देवाश्च तथा तृप्ता भवंति हि २४ विकल्परहितं तत्त्वं ज्ञानमानंदमव्ययं ये पश्यंति विमुक्तास्ते जीवंतोपि न संशयः नि
प्र विकल्पं परं तत्त्वं तर्कतो यस्य भासते सोपि मुच्येत संसाराद्यथास्वं प्रपंचतः २६ निर्विकल्पं परं तत्त्वं प्रमाणेनैव केवलं यस्य भाति स मुच्येत स्वसं
सारमहोदधेः २७ न च नामानि रूपाणि शिवस्य परमात्मनः तथापि मायया तस्य नामरूपे प्रकल्पिते २८ शिवो रुद्रो महादेवः शंकरो ब्रह्म तत्परं ए प्र
वमादीनि नामानि विशिष्टानि परस्य तु विष्णुनारायणादीनि नामानि परमेश्वरे कथंचिद्योगवत्त्यात्तु वर्तंते न तु मुख्यया ३० अरूपस्य शिवस्यापि मू
र्तिर्ध्येया ह्युपासकैः उमार्धविग्रहा शुक्ला त्रिनेत्रा चंद्रशेखरा नीलग्रीवा परानंदप्रमोदात्तांडवप्रिया ब्रह्मविष्णुमहादेवैरुपास्या गुणमूर्तिभिः ३२
सर्वमूर्तिविहीनस्य सर्वमूर्तेः शिवस्य तु तथाप्येषा परा मूर्तिरित्येषा शाश्वती श्रुतिः तमायः पिंडवद्धिमा रुद्रमूर्तिः परस्य तु मूर्त्या तुल्यान्य

सू.सं.भै मूर्तिभ्यो लक्षकोटिभ्यो मुनिसत्तमाः २४ विष्ण्वादीनां तु सर्वेषां मूर्तेर्योऽव्यवधानतः न तुल्याः परतत्त्वस्य मूर्त्या वेदान्तपारगाः परतत्त्वस्य नामानि मा
यासत्या मुनीश्वराः त्रिमूर्तीनां तु रुद्रस्याप्यभिधानानि सुव्रताः २६ विष्ण्वादीनां च देवानां तानि नामानि सुव्रताः तत्त्वान्यपि नामानि भवन्ति त्रि
४२ सवित्तमाः २७ तथापि रुद्रनामान्येव मुख्यान्यासत्यापरेण तु मुख्यानि तु तथान्येषु व्यवधानात्परेण तु परतत्त्वपरिज्ञानं तस्य मूर्तिप्रसादतः तत्त्वसा
क्षात्तद्ध्यानपूजाभ्यामेव नान्यथा अनादिभोजनात्तृष्णाया याः शुद्धिर्निवर्तते तथा मूर्तिप्रसादेन तत्त्वं च प्रकाशते ४० परतत्त्वं तु सर्वेषां स्व
रूपमपि सर्वदा तस्य मूर्तिप्रसादेन विना नैव प्रकाशते तस्मान्मूर्तिर्हि सर्वेषां भोगमोक्षफलप्रदा अतो मूर्तिं महाभक्त्या भजध्वं मुनिपुंगवाः ४१
इति श्रीसूतसंहितायां यज्ञवैभवखंडे सप्तविंशोऽध्यायः सूत उ० अथातः संप्रवक्ष्यामि शिवलिंगं समासतः यस्य विज्ञानमात्रेण विमुक्तो मानवो
भवेत् शिव एव स्वयं लिंगं लिंगं गमकमेव हि शिवेन गम्यते सर्वं शिवो नान्येन गम्यते २ जडं हि गम्यतेऽन्येन नाजडं मुनिपुंगवाः शिवो नैव जडः सा
क्षात्स्वप्रकाशैकलक्षणः अस्वप्रकाशश्चेत्साक्षाच्छिवो नैव शिवो भवेत् अस्वप्रकाशं कुड्यादि न शिवः संमतं खलु ४ शिवे सति मुनिश्रेष्ठाः स्वप्र ४२
काशैकलक्षणे अप्रतीतं भवेत्सर्वं नतः शून्यमशेषतः ५ शून्यसिद्धिरपि श्रेष्ठाः शून्येनैव न सिध्यति खलु सर्वात्मना भानविहीनं शून्यलक्षणं ६
अतः साक्षाच्छिवः साक्षात्स्वप्रकाशैकलक्षणः तेन सर्वमिदं गम्यं गम्यते सोऽगम्यते स्वयं ज्योतिरिति प्राह श्रुतिः साध्वी महेश्वरं तस्य भासा सर्वमि

दं विभाति स्वयं विना हि ८ अतः शिवः सर्वजगद्विभासकः स्वयंप्रकाशः स्वयमेव केवलं मयोदितं लिंगमिति द्विजर्षभाः सदैव रज्यं श्रुतिमस्तकस्थितं ९
शिवस्य लिंगं शिवलिंगमन्ये मुनीश्वरा वेदविदो वदंति स्वयंप्रकाशस्य न युज्यते यतस्तदर्थं शंभुः स्वयमेव लिंगं १० विवेकहीना मर्त्यस्य चित्तवृत्त्या
घटेऽस्य वा शिवस्य लिंगमित्ययं रवः समस्तजंतुभिः निगद्यते शिवः स्वतः प्रसिद्ध एव सर्वदा ततः शिवस्य लिंगमित्ययं रवो न संगतः १२ स्वत एव
भगमोपि शंकरेण विभातीव विभाति मायया स्वत एव श्रुतिकोविदाः शिवः सकलिंगेन निगम्यते स्फुटं १३ शिवस्य लिंगं कथयंति केचिद्गुहप्रका
रेण वदारदृश्या न तत्त्वदृष्ट्या परमेश्वरस्य स्वयंप्रभस्यास्य न चास्ति लिंगं १४ वेदांतवाक्योत्थपरात्मविद्या शिवस्य लिंगं कथयंति केचित् विचा
रजन्यामपि सत्यविद्यां वदंति चान्ये परमस्य परमस्य लिंगं १५ स्मृतिजामितिहासजामिमां परविद्यामपि लिंगमाशितुः अतिशुद्धामपि तां पुरा
स्क णजां प्रवदंति श्रुतिवित्तमोत्तमाः १६ शिवलिंगं कथयंति मायां शिवस्य दृश्यां शिववस्तुनिष्ठां वदंति केचिज्ज्ञनचित्तमन्ये त्वहंकृतिं चापि मनश्च बुद्धिं श्रं
१७ प्राणं च लिंगं प्रवदंति केचिच्छरीरमन्ये प्रवदंति लिंगं त्वगादिखानि प्रवदंति केचित्समस्तमन्ये परमेश्वरस्य १८ शब्दादिभूतानि महेश्वर
स्य स्थूलानि भूतानि च संगिरंते पातालोकादिसमस्तमेतल्लिंगं महेशस्य वदंति केचित् १९ यदस्ति यन्नास्ति महेश्वरस्य समस्तमेतत्प्रवदंति लिंगं

५२

सू॰ग॰भे॰ विशुद्धविद्याःपरयोगिनोयस्स्वयंप्रभस्यैवनलिंगमूचुः २० यदालिंगतयाशिवस्यकथितंतन्नज्ञदंवस्तुनोलिंगंनैवभवेद्धिशुद्धमतयोज्ञानंहि
४२ लिंगंभवेत् तस्मादेवमहेश्वरःपरनरस्तत्तज्ज्ञरोपाधिकश्चिद्रूपःप्रथितःप्रभोर्गमकमित्यर्थस्थितिःस्वस्यतु २१ आलयंलिंगमित्याहुरपरेवेद
विन्नमाः नदापिशंकरःसाक्षाल्लिंगंनाम्नमुनीश्वराः २२ आलयोनामचाधारःसर्वाधारःशिवःखलु सदासत्यस्वभावत्वात्सत्यएवशिवःखलु
२३ चिद्रूपंहिसदासत्यंनाचिद्रूपंकथंचन असत्यत्वस्यदृष्टत्वादचिद्रूपस्यवस्तुनः २४ शुक्तिकारजतादीनामसत्यत्वंहिसंमतं अचेतना
नामन्येषामसत्यत्वेनिदर्शनं शुक्तिकारजतंविप्राःसत्यएवततःशिवः अतःकल्पितरूपाणामाधारोभगवांछिवः २६ अनाधारोमहादेवःस
त्यचैतन्यलक्षणः सर्वाधारस्यनाधारोविद्यतेहिद्विजोत्तमाः आकाशस्ययथाकश्चिन्नाधारोविद्यतेद्विजाः व्यावर्तयतिचाधारंशिवस्यपरमा
त्मनः २९ स्वेमहिम्नीतिवेदांतःसत्यवादीस्वतःप्रमा वेदांतवाक्यमानानामनिमानमितिस्थितिः अतःसत्यचिदानंदलक्षणःपरमेश्वरः स्वयमे
वसदालिंगंनलिंगंतस्यविद्यते ३० संसारार्णवमग्नानामज्ञानांधीकृतात्मनां चिंतपाकानुगुण्येनभावनार्थंद्विजर्षभाः ३१ अनाधारस्यदेव ४३
स्यशिवस्यपरमात्मनः आधारोमंत्रसंस्कारात्कल्पितःसत्यवद्बुधाः ३२ लयनाल्लिंगमित्याहुरपरोवेदविन्नमाः तदापिलिंगंभगवान्स्वय

२१

मेवमहेश्वरः लीयमानमिदंसर्वंब्रह्मण्येवहिलीयते नलीयतेपरंब्रह्मसदासत्यस्वभावतः ३४ शुक्तिकारजतादीनामसत्यानांद्विजर्षभाः
लयोदृष्टोनसत्यस्यशुक्तिकाशकलस्यच लीयतेहिशिवात्स्यदशेषमशिवंशिवे अतोलिंगंद्विजश्रेष्ठाअविनाशीहरःस्वयं ३६ अन्येचयोगिनो
विप्राआमनंतिशिवस्यतु आधारेषुशरीरेस्मिन्लिंगानिपरमात्मनः ३७ अधोमुखमनाद्यंतमपिंडंपिंडसंज्ञितं ज्वलत्कालानलप्रख्यंस्व
यंभुब्रह्मसंज्ञितं ३८ मध्यमस्थंमहामंत्रैरर्चनीयंतुयोगिभिः गुरूपदेशतोज्ञेयंलिंगमेकंप्रकीर्तितं ३९ कोटिसूर्यप्रतीकाशंकोमलंद्विजपुं
गवाः अपदंपदमव्यक्तमवाणंवाणमद्भुतं ४० तृतीयस्थंसदैवोर्ध्वसुखंसंसारनाशकं अर्चनीयंमहामंत्रैरात्मनिष्ठैस्तुयोगिभिः गुरूपदेश
तोज्ञेयंद्वितीयंलिंगमीरितं चंद्रकोटिप्रतीकाशंशांकरंशक्तिवल्लभं ४२ अरूपंरूपमव्यक्तमपरंपरमाद्भुतं विसर्गाधिष्ठितंविश्वंविश्वविज्ञा
नसाधकं अर्चनीयंमहामंत्रैरतिशुद्धैस्तुयोगिभिः गुरूपदेशतोज्ञेयंतृतीयंलिंगमीरितं ४४ एतेषुलिंगेषुशिवःपुराणःस्वशक्तियुक्तःस्वजन
प्रियाय प्रकाशतेसंततमात्मविद्याप्लुवाभिलाषैरभिपूजनीयः ४५ अंतर्लिंगंयोविजानातिशश्वद्बंधच्छेदंशंकरस्यप्रसादात् कुर्याद्दाशु
ब्रह्मविद्भूतिनिष्ठाःसत्यंमोक्षंसर्वलोकप्रियाय ४६ निरंतरंगशिवेपरमात्मनिप्रसस्यरस्यलयःपरयोगिनः सुरव्यमर्चनमित्यभिपद्यतेपुष्य

स्कं॰ य॰ भै॰ नेच्छ फलममुरवाःऋशाः ४७ मंत्रेणपूजामतिमत्तमानामबोधमूलस्यमहाद्रुमस्य संसारसंज्ञस्य मुनीन्द्रमुख्यानालंसदामूलविमूलनाय ४८
४४ ज्ञानमेवशिवेनैवनिमित्तेनस्थलमेवदर्दिर्मजनंनृणां वेदएवसदामितिकारणं बोधमेवपरमंपरमास्तिकाः ४९ गुह्यमेवतुवःकथितंमयामस
माहमहेश्वरवल्लभः व्यासआमरणांतिकमास्तिकाःपूजयध्वमसलनिश्चये ५० इतिस्कंदसंहितायांयज्ञवैभवखंडे आष्टाविंशोध्यायः सूत उ॰
अथातःसंप्रवक्ष्यामिशिवस्थानंसमासतः यत्रसंचिंत्यदेवेशंकैवल्यंलभतेनरः पुरानारायणःश्रीमान्किरीटीगरुडध्वजः श्रीमत्कैलास
पर्यंतेततापपरमंतपः २ भस्मोद्धूलितसर्वांगस्त्रिपुंड्रांकितमस्तकः रुद्राक्षमालाभरणो जटावल्कलसंयुतः तपसातस्यदेवस्यकेश
वस्यमहात्मनः प्रादुरासीन्महादेवःशंकरःकरुणाकरः ४ तंदृष्ट्वापुंडरीकाक्षोमहादेवंघृणानिधिं अंबिकासहितंरुद्रंचंद्रमौलिंसना
तनं प्रणम्यदंडवद्भूमौभक्त्यापरमयासह स्तोतुमारभतेविष्णुःसर्वभूतहितावहं ६ अकारायनमःसाक्षादनंतानंदमूर्तये आत्मभूता
यसर्वेषामतिशुद्धायशूलिने ७ आकारायातिशुद्धायसाक्षिणेसर्ववस्तुनः अंबिकापतयेतुभ्यमसंगायनमोनमः ८ इकारायेश्वराख्याय ४५
सर्वसिद्धिकरायच ईशाहिलोकपालानामियत्ताकारिणेनमः ईकारायवरिष्ठायवांछितार्थप्रदायच वंचकानामलभ्यायवसुरायनमोनमः

म॰

१० उकारायोग्रजंतूनामुग्ररूपायशूलिने उत्तमानांतुजंतूनामुपास्यायनमोनमः ऊकारायोपवीतायत्यूर्जितायोन्नर्मिणे उत्तमज्ञा
नगम्यायनमस्तेपरमात्मने १२ ऋकारायादिभिन्नायरामपूर्वार्चितायच ऋचामर्थस्वरूपायनमःसत्यपरात्मने ॠकारायनिसर्गायनित्य
तृप्तायशंभवे रसादिभिन्नरूपायनमःशुद्धचिदात्मने १४ ऌकारायलसद्भूतमंडिताभरणायच लिंगलिंग्यादिहीनायलिंगरूपायतेनमः ॡका
रायलयरूपायध्वंसकायादिहेतवे लाक्षारुणशरीरायलाभस्थानायवैनमः १६ एकारायनमःशश्वदिदंतासाक्षिणेतथा अहंतासाक्षिणे
साक्षात्सत्यगद्यवस्तुने ऐकारायामलज्ञानप्रभावपरिशीलिनां आत्मरूपतयानित्यंप्रतीतायनमोनमः १८ ओकारायविरिंचायविष्णवे
रुद्रमूर्तयेवाच्यवाचकहीनायस्वयंभानायवैनमः १९ औकारायमहेशायमहामंत्रार्थरूपिणे महादेवायमात्रादिप्रपंचायनमोनमः २०
बिंदुरूपायबीजायबीजाधिष्ठानरूपिणे बीजनाशकरज्ञानस्वरूपायनमोनमः २१ विसर्जनीयरूपायविस्मयायमहात्मने विसर्जनीय
निष्ठानांविशेषार्थायवैनमः २२ ककारायकपूर्वादिदेवनार्जितायच करणग्रामसंहर्त्रेकालातीतायवैनमः २३ खकारायखपूर्वा
दिभूतपंचकहेतवे खमूर्तायखलप्रज्ञागोचरायनमोनमः २४ गकारायगणेशायगणहंत्रार्चितायच गंगाधरायगुह्यायगुणातीतायतेन

१०३

स्व·य·भै मः २५ घकाराय घनाकार घातकाय घनात्मने घटादि जगदाकार रहिताय नमो नमः २६ ङकाराय ङमंत्रार्थस्वरूपाय शिवात्मने ङाङीङूःसं
४५ ज्ञितार्थानामगम्याय नमो नमः २७ चकाराय चमंत्रार्थस्वरूपायामितात्मने चमंत्रार्थनिषण्णानाम रताय नमो नमः २८ छकाराय छ
लालस्य छादनादिविशेषतः छादनच्छेदनविभागाय नमो नमः जकाराय जगच्छक्तिस्वरूपाय जपार्थिनां जयप्रदाय देवाय जंभमो
हायते नमः ३० झकाराय झमंत्रार्थस्वरूपायामृतात्मने झमध्यचंद्रदिवाय नमः सांबाय शंभवे ञकाराय ञमंत्रार्थस्वरूपाय ञमर्त्त
ये ज्ञप्तिमात्रैकनिष्ठानां मुक्तिदाय नमो नमः ३२ टकाराय टटाटीटूटूर्वकैरुक्तमहारवैः अर्चिताय सुरश्रेष्ठैः सुरेश्वर नमो नमः ३३ ठकाराय
ठमंत्रार्थस्वरूपाय ठमंत्रतः ठठादिगणरूप्याय ठमध्याय नमो नमः ३४ डकाराय डडाडीडडैडौडैः श्वमहारवैः डामरैरभिरूप्याय नमो न्नमिया
यच ३५ ढकाराय ढमंत्रार्थपरिज्ञानवतां नन्दलं ढसंज्ञितमहानंदप्रदाय सततं नमः ३६ णकाराय णणाणीणूणैणौणोरवैः सदा णकिनीगणरू णौ
ज्याय णसंज्ञाय नमो नमः तकाराय तशब्दार्थस्वरूपाय तताय च तनलमित्यभिरूप्याय तत्वप्रताय वै नमः ३८ थकाराय थमंत्रार्थस्वरूपाय थसं
ज्ञितैः महागणैश्च रूप्याय थमध्याय नमो नमः दकाराय दक्षारूपमहाशक्तिमयाय च देशजातिविहीनाय दिवारात्राय वै नमः ४० धकाराय धरण

२८

यादिमहाभूतस्वरूपिणे धराधरहृदिस्थाय धमध्याय नमो नमः नकाराय नगेंद्राय नामजात्यादिहेतवे नमः शिवाय नम्याय नानारूपाय
शूलिने ४२ पकाराय परानंदस्वरूपाय परात्मने परापरविहीनाय पावनाय नमो नमः फकाराय फलाख्याय फलाख्यगणयोनये फलाख्य
गणरूप्याय नमः स्थूलस्वरूपिणे ४४ बकाराय बकाराख्यमहाबीजैकजापिनां बंधनागारनाशैकहेतवे वेधसे नमः भकाराय भवाब्धेस्त
ारकाय भवायते भवशब्दैकवेद्याय भवानीपतये नमः ४६ मकाराय महामायापाशनाशैकहेतवे ममकारविहीनानां महानंदाय वै नमः य प
काराय यथार्थाय यथार्थाय यथार्थज्ञानिनां नन्दलं यथार्थमलगर्हैतवस्सलेसततं नमः ४८ रकाराय रपिर्भातिमिषाय रतिहेतवे रथशब्दव
पुषे शेगभवनाशाय वै नमः ४९ लकाराय लतासोमस्वरूपाय लतात्मने लाभालाभविहीनाय लब्धरूपाय वै नमः ५० वकाराय वरिष्ठाय वा
सुदेवादिहेतवे वांछाबाणरविच्छित्तिहेतुभूताय वै नमः शकाराय शरण्याय शंभवे शरणार्थिनां शरणाय शरच्चंद्रधवलाय नमो नमः ५२
षकाराय षडाधार षट्चक्रादिस्वरूपिणे षड्स्वरनिषण्णाय नमः षरसुखहेतवे सकाराय सशब्दार्थस्वरूपाय सदात्मने साक्षिणे साक्षिरूपा
णां नमः साधकप्रकाशिने ५४ हकाराय हमर्थाय सदाहंकारसाक्षिणे हाहाहूहूकगीताय हंसरूपाय वै नमः लकाराय लकाराख्यमहामंत्र

सू॰य॰भे॰ प्रियायच लोलाचंचलसंसारनाशनायनमोनमः ५६ ॐकारायसमंत्रार्थस्वरूपायक्षमावते क्षेमदायममक्षेमस्वरूपायनमोनमः मा
तृकावपुषेमातृमानमेयादिसाक्षिणे मातृकामंत्रलभ्यायमहसेचनमोनमः ५८ मातृकाधारभूतायमातृकामूलरूपिणे महामंत्रैक
५५ वाच्यायमहसेब्रह्मणेनमः द्विधाभूतमहामंत्रस्वरस्यंजनरूपतः वाच्यायापररूपायपरायमहसेनमः ६० अष्टधाचाष्टवर्गैरुक्तविभक्ताया
मलात्मने अशेषशब्दभूतायतत्तदर्थायवेनमः ६१ शब्दान्वयविहीनायशब्दलभ्यायसाक्षिणे सर्वोपाधिविहीनायस्वयंभानायवेनमः ६२ प्र
त्यक्षादिप्रमाणानामगम्यायापरोक्षतः प्रतीतायस्वयंसर्वसाक्षिणेमहसेनमः स्वस्वरूपादहीनायवस्तुतोवस्तुतोपिच अर्थायमहतेसाक्षात्स्व
यंभानायवेनमः ६४ प्रसादलभ्यायशिवायसत्यचिन्महसुखायापरवर्जिताय अतीवशुद्धस्वहृदंतजालयेविभासमानायनमोनमस्ते
६५ सूत उ॰ एवंनारायणेनैवशंकरोभिष्टुतः पुनः प्राहगंभीरयावाचाकिमर्थंनस्तवांस्तपः ६६ इत्याकर्ण्यमहाविष्णुःप्रणम्यपरमेश्वरं तव
स्थानानिमेदेवब्रूहिसाक्षात्कृपाकर इत्युक्तोविष्णुनाशंभुःसर्वज्ञःकरुणाकरः प्राहसर्वाणिशानःस्थानानिस्वस्यविष्णवे ६८ ईश्वर उ॰ मम ५५
स्थानानिवक्ष्यामिमहामोहनिवृत्तये अतीवश्रद्धयासार्द्धंशृणुष्वपुरुषोत्तम अध्यात्मेचाधिभूतेचस्थानानिसुबहूनिमे स्वर्गापवर्गसिद्ध्य

र्थमुख्यानिमनीषिभिः ७० ब्रह्मरंध्राभिधंस्थानंविशिष्टंयोगिसेवितं विमुक्तिसाधनंप्राणमितिविद्धिविचक्षण मुखमंडलमाश्चर्यंभु
क्तिमुक्तिफलप्रदं मोहनाशकरंसाक्षात्स्थानंविद्धिजनार्दन ७२ चक्षुषीचतथाश्रोत्रेनासिकेचजनार्दन गंडौष्ठदंतमूर्द्धाचस्थानान्यास्ये
ममानघ हस्तपादगताःसर्वेसंधयःपुरुषोत्तम स्थानानिममकल्याणतथापार्श्वद्वयंमम ७४ पृष्ठश्चनाभिदेशश्चहृद्देशश्चजनार्द
न धातवःसप्तमेसाक्षात्स्थानानिपुरुषोत्तम ७५ मूलाधारमधिष्ठानंपूरकाख्यमनाहतं विशुद्धाख्यंचमत्स्थानंविद्धिपंकजलोचन ७६
महाज्ञानसिद्धिसंज्ञंचविष्णोवाराणसीपुरी मणिकोशत्रयंबिंदुनादशक्तिसमाह्वयं बीजस्थानंचमेद्वंद्वरोमाणिविविधानिच ममस्थानानिक
ल्याणविद्धिपंकजलोचन ७८ यथाध्यात्मेमहाविष्णोस्थानानिसुबहूनिमे तथाधिभूतेमेविष्णोस्थानानिसुबहूनिच कैलासपर्वतःसाक्षा
त्स्थानंविष्णोममानघ श्रीमद्दक्षिणकैलासपर्वतश्चतथैवच ८० वाराणसीपुरीपुण्याविमुक्तिफलदायिनी मरणादेवसर्वेषांतत्स्थानंम
मानघ श्रीसोमनाथसंज्ञंचतथाकेदारमद्भुतं श्रीपर्वतंचमेस्थानंविद्धिपंकजलोचन ८२ श्रीमद्वृद्धाचलंपुण्यंतथागोपर्वतंहरे तथा
श्रीहरतीर्थंचविद्धिस्थानंममाव्ययं आधिग्रामसमाख्यंचश्वेतारण्यंमहत्तरं हस्तिस्थानंचमेविष्णोस्थानंविद्धिमहत्तरं ८४

सू॰ भै त्रिकोटिहाख्यं गंभीरं तथा गोपदतीर्थकं मध्यार्जुनं च मे स्थानं विद्धि पंकजलोचन श्रीमन्मंगलवंशाख्यं तुंभकोणसमाह्वयं तथा सव्ये
४७ तरावर्तं विद्धि स्थानं ममानघ ८६ जयेश्वरसमाख्यं च तथा वल्मीकसुन्दरं गजारण्यसमाख्यं मे विद्धि स्थानं विचक्षण वेदारण्यसमाख्यं
च तथा हालास्यसंज्ञितं श्रीमद्रामेश्वराख्यं च स्थानं विद्धि समाद्भुतं ८८ पुंडरीकपुरं सुन्दरं मम स्थानमग्निसदृशं विशोधने योगनिष्ठमुनिसंघ
सेवितं भोगमुक्तिफलदं पुरातनं ८९ लयामथार्जुनधरे गणं नंदिना विनायकादिभिरखिलैरतिप्रियात् निषेवितं संततमास्तिकैर्जंबूस्वराद्दसमा
ख्यस्य हृदि स्थितं शुभं ९० श्रुतिस्मृतिभ्यामपि सर्वशक्तिभिर्न गोचरीकर्तुमलं महत्तरं मत्सादिभिर्लभ्यमतीव शोभनं गुणाकरं गुह्यमशोभनाप
हं ९१ सदापरानंदविकासकारणं दिवाकरीणमादिकोटिभिः समं पुरातनानामपि पुण्यशालिनां विमोहनाशाय मयैव निर्मितं ९२ स्था
नमेतदतिप्रियमास्तिकैर्वेदविद्भिरतिप्रियकारिभिः पूजितं पुरुषोत्तम मुक्तिदं सेवितं सततं च मयैव तु ९३ अत्र नृत्तमतिशोभनं परं सत्य ४७
बोधसुखवस्तुबोधकं भाकविन्नृहृदयस्थितं हरे व्यक्तमेव सततं करोम्यहं ९४ शंकरी च परमा विनायकः षण्मुखश्च सुयशःपतिः प्रभुः
अंतरंगजनमप्यतिप्रियं नृत्यमत्र परिपश्यति स्वयं ९५ त्वं च पद्मजनितः पुरंदरः पंकजापि परमा सरस्वती मत्प्रसादजनितेन चक्षुषा

नृत्यमत्र ददृशुः समंजसं ९६ शब्दजालपरिमोहिता जनास्तर्कजालपरिमोहिता अपि अत्र नैव ददृशुर्नर्तनं भक्तिहीनजनताप्यधोक्षज ९७ वेद
बाह्यसरणिस्थिता जनाः केवलाश्रममनुज्ञां अपि प्रियं अत्र भक्तिसहिता अपि स्वतः सत्यमेव ददृशुश्च नर्तनं ९८ अत्र नृत्यमविलोक्य मानवः
स्वर्गलोकमपि नैति चेज्यया नित्यशुद्धसुखसत्यचिद्घनं ब्रह्ममुक्तिमपि नैति विद्यया ९९ नृत्यदर्शनविवर्जितः पुमानत्र कीटसदृशश्च केशव त
स्य पुण्यमपि दुःखनं भवेत्सत्यमेव कथितं मयाच्युत १०० नृत्यदर्शनविहीनवाडवः सत्यमत्र पुरुषोत्तमांत्यजः तस्य जन्म विफलं खलु हे हरे
कः समोऽहमतिवर्तते नरः १०१ बहुप्रलापेन किमत्र लभ्यते विचित्रमेतत्सुरमादृतं मया विमुक्तिभाजामपि पुण्यशालिनां विमुक्तिहेतुः सक
लोत्तमोत्तमं २ सूत उ॰ एवमुक्त्वा महादेवः सांबः संसारमोचकः सत्यज्ञानपरानंदस्तत्रैवांतरधीयत ३ विष्णुर्विश्वजगन्नाथो विश्वलोक
हिते रतः शिवस्थानानि चाकर्ण्य श्रीवैकुंठं गतोऽभवत् १०४ भवद्भिश्च महाभाग्याच्छिवस्थानानि सुव्रत श्रुतानि तानि मोक्षार्थं भजध्वं
श्रद्धया सह १०५ स्थानानि सर्वाणि मयोदितानि द्विजेंद्रवृंदा अतिशोभनानि भजेद्विद्याविनिहृत्तकामः प्रियेण चैकं परमेश्व
रस्य १०६ इति श्रीसूतसंहितायां यज्ञवैभवखंडे एकोनत्रिंशोऽध्यायः सूत उ॰ अथातः संप्रवक्ष्यामि भस्मधारणवैभवं यस्य विज्ञानमा

सू·य·भै· मंत्रेण नरो मुच्येत बंधनात् १ भस्म नानाविधं प्रोक्तं धार्मिकैस्तत्त्वचिंतकैः एकं विप्रा महाभस्म स्वल्पमन्यत्प्रकीर्तितं २ महाभस्म महादे
४८ वो महामायावभासकः भर्सनात्सर्वपापानां भासनं तस्य विद्यया विद्याविदो द्विजा वा साक्षान्मुनयः शंसितव्रताः अविद्याकल्पनत्वान्याः
सत्यमेवमयोदितं ४ यस्य साक्षान्महाभस्म भाति स्वात्मतया स्वतः न तस्य भस्मना कार्यं न जडाभिर्न चावरैः यस्य भस्म स्वतो भा
ति स्वात्मनो मुनिपुंगवाः न तस्य वर्णधर्मेण कार्यं नाश्रमधर्मतः ६ यस्य भस्मात्मरूपेण विभाव्यता परयोगिनः न तस्य तपसा कार्यं
न दानेन न चेज्यया यस्य साक्षिस्वरूपेण भस्म भाति स्वयंप्रभं न तस्य कार्यं वेदेन न च स्मृतिपुराणकैः ८ यस्य भस्म द्विजा भाति प्रत्यग्रू
पेण संततं न तस्य कार्यं तीर्थेन नार्चनेन न शिवस्य तु भस्मविज्ञानसंपन्नो महायोगी महत्तरः कृतकं भस्म मेधावी का कथा शिव एव सः
१० भस्मविज्ञानलाभाय खलु वेदाः सनातनाः प्रवृत्ताः स्मृतयः सर्वाः पुराणं भारतादि च भस्मविज्ञाननिष्ठस्य न कर्तव्यं कथंचन
केवलं देहयात्रैव कार्या देहांतमास्तिकाः १२ स्वल्पं भस्म द्विजश्रेष्ठा बहुधा परिकीर्तितं श्रौतमेकं तथा स्मार्तमप्यपरं पंडितोत्तमाः श्रौ ४८
तं भस्म द्विजा मुख्यं स्मार्तं गौणमकीर्तितं अन्यच्चास्ति द्विजा भस्म लौकिकं केवलं परं १४ श्रौतं भस्म तथा स्मार्तं द्विजानामेव कीर्तितं अ

३२

प्र॰ ४

न्येषामपि सर्वेषामपरं भस्म लौकिकं सर्वांगोद्धूलनेनैव तथा तिर्यक्त्रिपुंड्रकैः भस्म धार्यमिति प्रोक्तं द्विजानां मुनिपुंगवैः १६ धारणं मंत्रतः प्रो
क्तं द्विजानां मुनिपुंगवैः केवलं धारणं विप्रा अन्येषामपि कीर्तितं अग्निरित्यादिभिर्मंत्रैर्जाबालोपनिषद्गतैः सप्तभिर्धूलनं कार्यं भस्मना सजले
न च १८ त्रियायुषेण मंत्रेण द्विजास्तिर्यक्त्रिपुंड्रकं धार्यं प्रोक्तं द्विजश्रेष्ठा धार्मिकैर्वेदपारगैः मेधावीत्यादिना वापि ब्रह्मचारी दिने दिने भस्म
ना सजलेनैव धारयेच्च त्रिपुंड्रकं २० त्र्यंबकेन मंत्रेण व्रतिना शिवेन वा गृहस्थस्य वनस्थस्य धारयेच्च त्रिपुंड्रकं ॐकारेण त्रिरुक्तेन सहं
सेन त्रिपुंड्रकं धारयेद्भिक्षुको नित्यमिति जाबालिकी श्रुतिः २२ ललाटे चैव दोर्द्वंद्वे नेत्रे वोरसि बुद्धिमान् त्रिपुंड्रं धारयेन्नित्यं भुक्तिमुक्तिफ
लप्रदं वर्णानामाश्रमाणां च मंत्रतो मंत्रतोपि च त्रिपुंड्रोद्धूलनं प्रोक्तं जाबालैरादरेण च २४ उद्धूलनं त्रिपुंड्रं च ज्ञानांगत्वेन सादरं आम
नंति मुनिश्रेष्ठाः श्वेताश्वतरशाखिनः अयमत्याश्रमो धर्मो यैः समाचरितो सुराः तेषामेव शिवज्ञानं संसारच्छेदकारणं २६ उद्धूलनं त्रि
पुंड्रं च मायापाशनिवृत्तये आमनंति मुनिश्रेष्ठा अथर्वशिरसि स्थिताः तथापि मायाविच्छेदो ज्ञानादेव तु केवलात् अज्ञानस्य तु विज्ञानं बाध
कं खलु नेतरत् २८ व्रतं पाशुपतं येन सम्यगाचरितं बुधाः तस्य ज्ञानं विजायेत तेन पाशविमोचनं उद्धूलनं त्रिपुंड्रं च ज्ञानांगत्वेन केवलं आ

३

स्०यभ० मन्वंतिमुनिश्रेष्ठाः साक्षात्केवल्यशालिनः ३० अतोपिपाशविच्छेदलाभायज्ञानसिद्धये उद्धूलनंत्रिपुंड्रंचमुमुक्षुःसम्यगाचरेत् अग्न्यादिभ्यःपराभ्र
४० निरस्तयातिर्यकत्रिपुंड्रकं धूलनंचाचरेदेवमुमुक्षुर्ज्ञानसिद्धये ३३ भस्मनोद्धूलनंचैवतथातिर्यक्त्रिपुंड्रकं प्रमादादपिमोक्षार्थीनत्यजेदितिहि
श्रुतिः भस्मनोद्धूलनंचैवतथातिर्यक्त्रिपुंड्रकं महापापविनाशायविधत्तेवैदिकीश्रुतिः ३४ भस्मनो० रक्षार्थंसर्वजंतूनांविधत्ते० ३५
भस्मनो० मंगलार्थंचसर्वेषांविधत्ते० ३६ भस्मनोद्धू० पवित्रार्थंचसर्वेषांविधत्ते० ३७ भस्मनो० माहेश्वराणांलिंगार्थंविध० ३८ भस्मनो०
लिंगार्थंचैवसर्वेषांविध० ३९ भस्मनो० स्नानत्वेचैवसर्वेषांवि० ४० भस्मनो० व्रतत्वेचैवस ४१ भस्मनो० दानत्वेनैवसर्वे० ४२ भस्मनो०
तपस्त्वेनैव० ४३ भस्मनो० यज्ञत्वेनैवसर्वे० ४४ भस्मनो० सर्वधर्मतयापुंसांविध० ४५ शिवेनविष्णुनाचैवब्रह्मणावज्रिणातथा दे
वताभिर्धृतंभस्मत्रिपुंड्रोद्धूलनात्मना ४६ उमादेव्याचलक्ष्म्याचवाचाचान्याभिरास्तिकाः सर्वस्त्रीभिर्धृतंभस्मत्रिपुंड्रोद्धूलनात्मना यक्षरा मं
क्षसगंधर्वसिद्धविद्याधरादिभिः मुनिभिश्चधृतंभस्मत्रिपुंड्रोद्धूलनात्मना ४८ ब्राह्मणैःक्षत्रियैर्वैश्यैःशूद्रैरपिचसंकरैः अपभ्रंशैर्धृतंभस्म ४
त्रिपुंड्रोद्धूलनात्मना ४९ उद्धूलनंत्रिपुंड्रंचयैःसमाचरितंमुदा तएवशिष्टाविद्वांसोनेतरेमुनिपुंगवाः ५० उद्धूलनंत्रिपुंड्रंचश्रद्धयानाचरंति

तेषां ४

ये तेषांनास्तिविनिर्मोक्षःसंसाराज्जन्मकोटिभिः ५१ उद्धूलनं० तेषांनास्तिशिवज्ञानंकल्पकोटिशतैरपि ५२ उद्धूलनं० तेषांनास्तिसमाचा
रोवर्णाश्रमसमन्वितः ५३ उद्धूलनं० तेमहापातकैर्युक्ताइतिशास्त्रीयनिर्णयः ५४ उद्धूलनं०तैःसमाचरितंसर्वंविपरीतफलायहि ५५ महा
पातकयुक्तानांजंतूनांपूर्वजन्मसु त्रिपुंड्रोद्धूलनद्वेषोजायतेसुदृढंबुधाः ५६ त्रिपुंड्रोद्धूलनश्रद्धायेषांनैवोपजायते उपपातकदोषेणादु
ष्टास्तेनात्रसंशयः ५७ त्रिपुंड्रोद्धूलनादौचदर्शनेश्रवणेपिच वांछानयेजंतूनांयेमहापापसंयुताः ५८ येषांयेक्रोधोभवेद्भस्मधारणेनसमा
एकैतेमहापातकैर्युक्ताइतिमेनिश्चितामतिः ५९ भस्मधारणमाहात्म्यंमयावक्तुंनशक्यते गुरुणापिचमेविप्राःकल्पकोटिशतैर
पि ६० ब्रह्मणाविष्णुनाचापिरुद्रेणापिमुनीश्वराः भस्मधारणमाहात्म्यंपरिभाषितुं ६१ अहोमोहस्यमाहात्म्यंमुनीशाब्रह्मवादिनः
येनराभस्मसंत्यज्यकुर्वंत्यन्यद्भ्रमीहितं ६२ अतिरहस्यमिदंमुनिपुंगवाःकथितमेवसमस्तजगद्धितं यदिसमाचरितंमनुजैर्मुदासफ
लमेवहिजन्मनसंशयः ६३ इतिश्रीसूतसंहितायांयज्ञवैभवखंडेत्रिंशोध्यायः सूतउ० अथातःसंप्रवक्ष्यामिशिवमानिकरंमुदा श्र
द्धयासहविप्रेंद्राःशृणुतातीवशोभनं १ जीवब्रह्मैक्यविज्ञानंविशुद्धंवेदसंभवं देवदेवस्यविप्रेंद्रामहामानिकरंसदा २ सर्वंब्रह्मेतिविज्ञान

नरोध्यं ४

स्कं.पु.भ. यत्नं वेदांतवाक्यजं देवदे० ३ सांबमूर्तिधरस्यास्य शिवस्य ध्यानमास्तिकाः देवदे० ४ तत्समानस्य देवस्य ध्यानं येन द्विजोत्तमाः देवदे० ५ शिव
५० शंकरहरेत्यादिशब्दाभ्यासश्च सादरं देवदेव० ६ शिवभक्तिश्च विप्रेंद्रा गुरुभक्तिस्तथैव च देवदे० ७ श्रुतिस्मृतिपुराणेषु विश्वासो यः स आस्तिकः देवदे०
८ अध्यापनं चाध्ययनं वेदवेदांतयोरपि देवदे० ९ वेदवेदांतवाक्यानां नानार्थस्य निरूपणं देवदे० १० त्रिपुंड्रोद्धूलनाचारो जाबालोक्तेन
वर्त्मना देवदेव० ११ कंठे शिरसि बाहौ च रुद्राक्षाणां च धारणं देवदे० १२ लिंगे शिवार्चनं नित्यं वेदोक्तेनैव वर्त्मना देवदे० १३ वाराणस्यादिके
स्थाने भक्त्या वाद्भरणमादरात् देवदे० १४ शांतिदांत्यादिसंपत्तिर्मुमुक्षुत्वं मुनीश्वराः देवदे० १५ नित्यानित्यार्थविज्ञानं वैराग्यं सुदृढं तथा देवदे० १६ यज्ञ
दानतपःकर्मनिष्ठा चाश्रमरक्षणं देवदे० १७ स्वजातिविहिताचारस्तथान्याचारवर्जनं देवदेव० १८ निषिद्धकर्मणां त्यागो दुष्टानामुपेक्षणं
देवस्य० १९ दया सर्वेषु भूतेषु मार्गे दूषणवर्जनं देवदेव० २० द्विजानामपि शुश्रूषा ज्ञानिनां च विशेषतः देवदेव० २१ शिवज्ञानैकनिष्ठस्य गु ५०
रोः शुश्रूषणं मुदा शिवप्रीतिकराण्येतु विशिष्टेन न संशयः २२ पुरा कापि कुलालस्त्री बभूवातीव सुंदरी सा सहस्रत्रयं हत्वा विप्राणामर्थवां
छया महाधनवती भूत्वा मायया परिमोहिता यथेष्टं भूतले विप्रा स्वचारपरिबृंहिता २४ कश्चिद्विज्ञानसंपन्नो महायोगी सुनिर्मलः श्रीम

द्दक्षिणकैलासे शिवस्थाने तमोत्तमे वर्तितुं शुश्रूषया गच्छेद्दिदृक्षया रुद्रवैभवं तं दृष्ट्वा सा स्वभोगार्थं प्रणिपत्य तपस्विनं २६ परिगृह्याति संतुष्टा गृहे स्त्री येवि
चक्षणा स्नाप्य वस्त्रादिकं दत्त्वा भोजयित्वान्नमोदनं चंदनाद्यैरलंकृत्य रत्नालंकृतपूर्वकं समाभ्यास्य महात्मानं भिक्षुं भुक्तवती द्विजाः २८ सोपि विज्ञा
नसंपन्नो महायोगी निराकुलः अतीव प्रीतिमापन्नस्तया सह मुनीश्वराः श्रीमद्दक्षिणकैलासे शिवस्थाने तमोत्तमे अवर्तत चिरं कालमतीव प्रीतिसं त
युतः ३० देवदेवो महाप्रीतस्तया शुश्रूषया द्विजाः तस्यै परमकैवल्यं ददौ विज्ञानपूर्वकं बहवो ज्ञाननिष्ठस्य शुश्रूषाबलतो द्विजाः शिवप्रीति
मवाप्याशु विमुक्ता भवबंधनात् ३२ अत उक्तेषु सर्वेषु शुश्रूषा शिवयोगिनः शिवप्रीतिकरी साक्षादिति वेदार्थसंग्रहः अतः शिवप्रीतिकरं
विचार्य द्विजोत्तमा वेदविदां वरिष्ठाः मदुक्तमार्गेण शिवप्रियेण सदा शिवप्रीतिकरं कुरुध्वं ३४ इति श्रीस्कंदपुराणे सूतसंहितायां यज्ञवैभवखंडे ए
कत्रिंशोध्यायः सूत उ० अथ वक्ष्ये महादेव श्रद्धाभावस्य कारणं मनुष्याणां मुनिश्रेष्ठाः शृणुत श्रद्धया सह १ पुराकालविपाकेन प्राणिकर्मवशेन
च पंचसप्तचवर्षाणि न ववर्ष शतक्रतुः २ अनावृष्ट्या द्विजा भूमिर्दुर्भिक्षाः लोकाः क्षुत्पीडया महात्मानो विविजाता सर्वदेहिनः मनुष्याश्चास
माचारा अभवन्नन्नवांछया हत्वा केचिन्मनुष्यांश्च भुक्तवंतो विमोहिताः ४ हत्वा केचित्स्वपुत्रांश्च दारांश्चान्ये च नमोहिताः तुरंगांश्च गजांश्चैव द्विजः

स्.पु.मे. वंतोयथावलं ५ ब्राह्मणाः केचिद्दालोक्य विशिष्टामुनिसत्तमाः गौतमस्याश्रमं पुण्यं जग्मुः सर्वे महत्तरं ६ गौतमस्य तपोयोगात्प्रसादाच्छंकरस्य च
५१ आश्रमस्तस्य विप्रेंद्राः सुभिक्षस्त्वभवद्ध्रुवं तेसंभूय मुनिश्रेष्ठं गौतमं प्रणिपत्य च मोचुः क्लेशेन संयुक्ता द्विजाः कारुणिकं मुनिं ८ वयं क्षुत्पीडि
ताः सर्वे भगवन्नन्नवत्प्रभ केवलं ह्यपेयैवास्मान्रक्षरक्ष हितेरत इति विज्ञापितः श्रीमान्महाकारुणिकोत्तमः गौतमः सर्वविप्राणामभयं
दत्तवान्प्रभुः १० पुत्रभार्यादियुक्तानां विप्राणां गौतमो मुनिः ददौ धान्यं धनं वस्त्रं तिलं तैलं च गामपि अन्यानि यानि जंतूनामिष्टानि सकलानि
तु तानि तेभ्यो मुनिः श्रीमान्ददौ कारुणिकोत्तमः १२ आधिव्याध्यस्त्रशस्त्रादिपीडाश्च विविधा द्विजाः निवारिता मुनींद्रेण गौतमेन हि जन्मना
श्चैतस्मात्तस्माच्चारा उपदिष्टा द्विजन्मनां गौतमेन मुनींद्रेण मुनीश्वराः करुणाबलात् १४ एवं चिरगते काले काले गौतमस्य महात्मनः तपसा के
वलं भूमिः सुभिक्षाभवदास्तिकाः ब्राह्मणेश्च पुनः सर्वे गौतमेन सुरक्षिताः विचार्य कार्यं संन्यस्य स्वदेशगमनाय वै १६ गौर्हता गौतमेनेति निंदितैः
पुरुषाधमैः हतो मिथ्याभिशापस्त्वमहामोहवशेन तु तदैवत्वा मुनिभिः श्रीमान्गौतमो मुनिसत्तमः महाक्रोधेन संक्रुद्धः शशाप ब्राह्मणाधमान् १८ ५२
गौतम उ० महादेवे महादेवे महादेवस्य विग्रहे महादेवस्य भक्तौ च महादेवस्य नाम्नि च महादेवस्य विज्ञाने महादेवपरिग्रहे महादेवस्य च

श्री गु

स्थाने महादेवस्य कीर्तिषु २० महादेवापदाने च महादेवाश्रयेषु च महादेवस्य चोत्कर्षे त्रिपुंड्रोद्धूलनादिषु रुद्राक्षधारणे रुद्रलिंगस्यैव तु प
जने रुद्रालयादिहस्तायां रुद्राध्यायादिकर्मसु २२ यद्यत्तु रुसं द्वेषं धितव्रतश्चापि दुर्जनाः भवतानुन्मुखास्तूयं सर्वथा ब्राह्मणाधमाः नित्यक
र्मादि अनुष्ठाने तथा काम्यविवर्जने भवतानुन्मुखा० २४ शांतिदांत्यादिविज्ञानसाधनेषु द्विजाधमाः भवतान० २५ स्वाध्याये च जपे चैव तथाम
वचने पि च भवता० २६ नानाविधेषु दानेषु यज्ञेषु विविधेषु च भवतानु० २७ कृच्छ्रचांद्रायणादौ च तथा मासोपवासके भवतानु० २८ वेदभक्तौ
तथास्तिक्ये योगांगेषु यमादिषु भवतानु० २९ श्रुतिस्मृतिपुराणोक्तेषु धर्मेषु सकलेषु च भवता० ३० स्वदारगमने चैव परदारविवर्जने भवता
नु० ३० विष्ण्वादिदेवताः सर्वा विशिष्टाः शंकरादिति भ्रांतिविज्ञानसंपन्ना भवत ब्राह्मणाधमाः ३२ शंखचक्रगदापद्मदंडपाशांकुशादिभिः
अंकिताः शूद्रया यूयं भवत ब्राह्मणाधमाः ३३ विहीनजातिनाम्नानुरूपेण चनपेयच अंकिताः श्रद्धया यूयं भवत ब्राह्मणाधमाः ३४ वर्तुलाश्व
त्थपत्रार्धचंद्रदीपादिलिंगिनः भवत श्रद्धया साई ललाटे ब्राह्मणाधमाः ३५ पितृमातृसुतभ्रातृभार्याविक्रयिणः सदा वंधु विक्रयिणस्तद्भव
त ब्राह्मणाधमाः ३६ वेदविक्रयिणस्तद्वत्तीर्थविक्रयिणस्तथा धर्मविक्रयिणस्तद्भवत० ३७ सुराविक्रयिणस्तद्वन्मांसविक्रयिणस्तथा म

सू॰ य॰ भे॰ त्यविश्वप्रियोऽस्तद्भवत॰ ३८ पांचरात्रेच कापाले तथा कालामुखेपिच शाक्तेच दीक्षिताः सर्वं भवत ३९ बौद्धे चार्हन्मते चैव तथा पाशुपतेपिच शां
५२ भवे दीक्षिताः सर्वं भवत॰ ४० परस्वं वेदुतथान्येषु मार्गेषु श्रौतकेषुच अश्रद्धया दीक्षिताः सर्वं भवत॰ ४१ युष्माकं वंशजाताश्च सर्वे स्त्रीभिः सह द्विजाः सदुष्का
र्यप्रकारेण भवंतु॰ ४२ बहुनोक्तेन किं साक्षाच्छिवे संसारमोचके तत्संबंधिषु सर्वेषु नित्यमस्त्रादिकेषुच युष्माकं वंशजातानां युष्माकं च तथैव च अश्रद्धा
भावः सदैवास्तु शापः स्तोत्रं कृतो मया ४४ सूतउ॰ एवं मुनींद्रेण दत्तेन च शापेन द्विजाधमाश्च पितरा ज्ञैव ते तथाभवंस्तत्कुलजाश्च सर्वे स्वभावतो द्वेषमु
नेः प्रभावः ४५ अश्रद्धाभावस्तेन जातो नराणां साक्षाद्रुद्रे तस्य धर्मे च विप्राः तस्मादिहास्तद्विनाशाय साक्षाद्रुद्रं नित्यं प्रपूजयेच्छ्रद्धयैव ४६ त्रिपुंड्रमु
द्धूलनमास्तिकोत्तमाः समाचरेन्नित्यमतंद्रितस्तथा विशेषतः शंकरवेदनेरतो भवेद्रजेयं कथितं मयानघाः ४७ इति श्रीस्कंदसंहितायां यज्ञवैभवखं ५२
डे द्वात्रिंशोऽध्यायः ३२ सूतउ॰ अथ नामानि वक्ष्यामि परतत्त्वस्य सुव्रताः यानि संकीर्तयन्मर्त्यो विमुक्तिफलभाग्भवेत् शिवो रुद्रो महादेवः शं
करो ब्रह्म सत्परं शंभुरीशान ईशश्च शूली चंद्रकलाधरः २ शर्वः पशुपतिः साक्षी हरः श्रीकंठ अद्भुतः ३ मृडः कपर्दी गिरिशो भवः सर्वज्ञ ईश्वरः उ
मापतिः कपर्दी च भूतेशस्त्रिपुरांतकः अंधकारी त्रिनेत्रश्च दक्षयज्ञविनाशकः ४ धूर्जटिर्वामदेवश्च स्थाणुः सर्वविनाशकः स्वेशश्च पालक

३४०

श्चैव तत्पुरुषः प्रभुः वामदेवः कपाली च सद्योजातः समः सुखी अघोरश्च सुघोरश्च प्रशांतः पापनाशकः ६ भवारिर्भगदः पुण्यः कामध्वंसी क
पिंजरः व्योमकेशो विशालाक्षो वह्निरेतावरप्रदः भीमो भर्गः पिनाकी च वृषांकः कालकूटधृक् हृन्निवासः किरातश्च भिक्षुकोमूलकारणं ८ अ
हिर्बुध्न्यो विरूपाक्षो विरूपो विश्ववेषधृक् शिपिविष्टो महादेवो गणेशः पार्वतीपतिः मृडो मेरुधरो मेधा महामायी महेश्वरः सर्वाधिष्ठानमाधा
रः सर्वाधिकरणः स्वराट् १० सर्वेश्वरः सर्वनिधिः सर्वात्मा सर्वसाधकः सेतुः सीमा समुद्रश्च विशिष्टश्च विधारकः जन्मादिकारणं हेतुः शास्त्रयो
निः सुखासनः तत्समो वाधिको संगः आत्मा वामलसाधनं १२ पुराणः पुरुषः पूर्णोनंतरूपः पुरातनः सत्यंज्ञानसुखं सौदाकाशः प्राणआस्तिकः सा
ज्योतिः प्रकाशः कथितः स्वयंभानः स्वयंप्रभुः स्वप्रकाशः स्वतंत्रश्च स्वस्थः स्वानुभवो गमः १४ अप्राधानमानः शंकुः परमात्मा परात्परः देवदेवश्च
देवश्च जगद्व्यापो निरंजनः निर्भयो निर्गुणो नित्यो नित्यानंदो निरामयः विदो विदांधिर्वेदांतादेवता परदेवता १६ पतिः पाशहरः पारः पारश्च
न्यः प्रजापतिः धाता धारयिता धर्ता धामधामविवर्जितः भुवनेशः सभान्नाथः सभापतिरतिप्रभुः सभ्यः सत्यः समस्तात्मा सीवः संसारवर्जितः १८
संसारवैद्यः सत्यार्थः स्तरः संसारभेषजं संसारमोचको मोक्षो मुलधनं मुनिः महर्षिश्च महात्मा सोमः सोमधुरः सुरः सुरज्येष्ठो विरूपाक्षो विश्वरूपो
मुक्तो

वैराग्य॰

 विनायकः २० विश्वाधिकश्चविरागो विगतस्पृहः अहमर्थोऽप्रमेयश्च नत्वं निर्वाणमुत्तमं कैवल्यं परमव्यक्तं कालकालश्च कोमलः अंतर्यामी समाहा
रः सोमः सौख्यं सुहृत्सुधाः २२ अदृश्योऽदृश्यनेनाचनेत्रं दृष्टिश्च दर्शनं दृग्दृशिः पवमानश्च वशी वैश्वानरो नरः मूलाचार्यो मुकुंदेशो मूलमायतनं
 महान् दहरो दिव्य अद्वैतमनाख्यं वस्तुवास्तवं २४ भूमा भोजयिता भोक्ता रुचिर्भस्मानुभूरसः हकारो हुंफडुग्रस्तो हार्दी हत्वावनोवधिः २५ ए
वैवेतानि नामान्यनिशमतितरामादितत्वे महेशे वर्त्तंतेनैवनारायणहरिसुरजिद्वासुदेवादिशब्दाः योगादस्मिन्कथंचित्परममुनिवरा वासुदेवादि
शब्दास्तस्मात्सर्वोक्तनामान्यलमतिरवश्यं सदा कीर्तयेच्च २६ शिवादिशब्दं परिवर्ज्य मर्त्यो वदंति नारायणविष्णुपूर्वं मुनीश्वराणां स्ति विमुक्तिरे
षां विभ्रतिरेव क्रमशो विमुक्तिः २७ सएव परमं पदं ययुः सएव सकलं सुखं ययुः सुख्यशब्दपरिकीर्तनेन तेसत्यमेव पठितं मयैव तु २८
नामानि सर्वाणि च कल्पितानि स्वमाययानिष्यसुखात्मरूपे तथापि मुख्यास्तु शिवादिशब्दा भवंति संकल्पनया शिवस्य २९ मुख्यशब्दजपतो मुनी
श्वराः सत्यमेव परमेश्वरो भवेत् तस्य वक्त्रकमले सदा शिवो नृत्यति स्म परमेश्वया सह ३० पापवह्निपरिदग्धमानसो देवरुद्रशिवशंकरादिषु को
धमेति मुनयः स्वहो नरः कीटपूर्वजनिरेव तस्य हि ३१ वहुप्रलापेन किमास्ति कोत्तमाः शिवादिनामानि परात्परस्य तु अधोक्षजादेश्च विरे

षतः स्वतो भवंति नामानि परस्य चाज्ञया ३२ अतो महादेवशिवादिशब्दं द्विजोत्तमा नित्यमनंत्रितश्च विचार्य नारायणपूर्वशब्दं जपेदशेषाशुभ
नाशनाय ३३ इति स्क॰ त॰ यज्ञवै॰ त्रयस्त्रिंशोऽध्यायः स्क॰ त॰ अथातः संप्रवक्ष्यामि संप्रदायसमन्वयं महादेवप्रसादस्य कारणं झटिति द्वि
जाः १ सत्यास्तेयदयायुक्तैः सर्वधर्मैः समन्वितः कामक्रोधमहालोभभयमृत्यादिविवर्जितः २ आचार्यं सत्यसंपन्नं साक्षात्कारुणिकोत्तमं अ
भिगम्य महात्मानं प्रणम्य भुवि दंडवत् चंदनागरुकर्पूरप्रसूनैः पूज्य देशिकं त्रिसहस्रं सहस्रं वा द्विसहस्रमथापि वा ४ उत्तमं कांचनं दत्वा
यथाशक्ति धनं तु वा वहुशो दंडवद्भूमौ प्रणम्य श्रद्धया सह तस्य पादांबुजं मूर्ध्नि निधाय परयोगिनः अधीहि भगवो ब्रह्मेत्येवं विज्ञापयेत्सुधीः
६ सोऽपि कारुणिकः श्रीमान्गुरुः सर्वार्थवित्तमः सुसमे सुप्रदेशे तु निर्जने निर्भये शुभे गोमयेनोपलिप्ये तु पुष्पैरभ्यर्चिते तथा पूर्णकुंभैश्च संयु
क्ते दीपैर्दिक्षु समन्विते ८ वितानतोरणैर्युक्ते धूपदीपाधिवासिते अथवा केवलं तंडुलैः शुद्धैः शुद्धैर्वा शालितंडुलैः विलिख्य मंडलं साक्षाद्रक्तेनैव
वर्त्मना एतन्मंत्रेण संपूज्य कुसुमैश्चंदनादिभिः १० परं पर्यक्रमं वुध्वा संचिंत्य श्रद्धया सह स्थापयित्वा गुरुः शिष्यं मंडलस्य तु मध्यमे कृतां
जलिपुटं पूर्णप्रकाशनिकटात्मके शिवानंदसमासीनमेवं भावनया सुतं ११ देशिकः स्वात्मनात्मानमात्मनमवलोक्य सुनिश्चलः शिष्यं चात्म

सू०य०भै० नथासाक्षाद्दृष्टं संचिंत्य साक्षिणं स्वात्मनोन्यतयाभानं स्वात्ममात्रतया स्वयं चिंतयेच्छिष्यस्तो मंत्रं जपित्वा पूर्वमेव तु १४ ग्रंथिच्छेदं पुनः
५४ कुर्याद्गुरूक्तेनैव वर्त्मना कृते कारुणिकेनैवमाचार्येण द्विजोत्तमाः महादेवी महानंदो महाकारुणिकोत्तमः स्वात्मभूतां परां शक्तिं प्रे
रयत्येव सुव्रताः १६ प्रसन्ना सा महादेवी महाकारुणिकोत्तमा शिष्यस्यात्मनि चिद्रूपे स्वयं पतति निर्मला शक्तिपाते तु संजाते शिष्य
स्यात्मनि संस्थिता मायादग्धा भवेत्किंचिन्मात्रसंदेहकारणं १८ सर्वसाधनसंयुक्तः साक्षाच्छिवत्वसंयुतः महादेवस्य भक्तश्च शि
ष्यः सद्गुणैकश्च गुरुभक्तिमान् १९ तस्य शिष्यस्य विप्रेंद्राः कर्मसाम्ये सति द्विजाः शांभवी शक्तिरस्यर्थं तस्मिन्पतति चिद्घने २० तदा शि
ष्यस्य चिद्रूपे कल्पिता मोहरूपिणी मायादग्धा भवेत्किंचित्तदा पतति विग्रहः शिष्यस्य देहे विप्रेंद्रा धरण्यां पतिते सति प्रसादः शंक
रस्तस्य द्विजाः संजात एव हि २२ यस्य प्रसादः संजातो देहपातावसानकः कृतार्थ एव विप्रेंद्राः न सम्भवोपि जायते तस्य प्रसादयुक्तस्य
विद्या वेदांतवाक्यजा रहस्यविद्यामखिलां नमः सूर्योदये यथा २४ शक्तिपातविहीनोपि सत्यवाग्गुरुभक्तिमान् आचार्याच्छ्रुतवेदांतः
क्रमान्मुच्येत बंधनात् शक्तिपातेन संयुक्ता विद्या वेदांतवाक्यजा यदा यस्य तदा तस्य विमुक्तिर्नात्र संशयः २६ शक्तिपातप्रकारस्य र ५४

रु

हस्यांशश्च कश्चन मयानोक्तो रहस्यत्वादाज्ञाभंगभयादपि प्रसादकामी विप्रेंद्रः प्रसन्नो गुरुभक्तिमान् दिने दिने गुरोः पूजां कुर्यादर्घ्यादि
भिर्नरः २८ संप्रदायसमन्वयमुत्तमं गुह्यमेतदिदं कथितं मया शंकरेण पुरा कथितं गुरोः शंकरः खलु सर्वहितेरतः २९ इति श्रीस्कंदपुरा
णे सूतसंहितायां यज्ञवैभवखंडे चतुस्त्रिंशोध्यायः ३४ सूत उ० अथातः संप्रवक्ष्यामि संप्रदायपरंपरां यत्तु ज्ञानेन हि द्विजश्रेष्ठा गुरुर्भ
वति सुव्रताः यः शिवः सर्वभूतानामीश्वरः स्वत एव तु ईशानः सर्वविद्यानां स एवादिगुरुर्बुधाः २ तस्य शिष्यो महाविष्णुः सर्वज्ञानमहोदधिः
गो तस्मात्स्वपरिज्ञानो ब्रह्मा सर्वजगत्प्रभुः सनत्कुमारो भगवान्ब्रह्मणः श्रुतवेदनः सनत्कुमारात्सर्वज्ञात्कृष्णद्वैपायनो मुनिः ४ अवाप्ताखि
लविज्ञानं तस्मादेव श्रुतं मया मत्तो लब्ध्वा परिज्ञानाद्यूयं सत्यपरायणाः एवं बुधा मुनिश्रेष्ठाः संप्रदायपरंपरां नतत्त्वान नमस्कृत्य श्रद्धया देशिकानि गो
मान् ६ पूर्वोक्तेनैव मार्गेण कुर्यादज्ञाननाशनं आचार्याच्छ्रुतवेदांतः सत्यवाग्गुरुभक्तिमान् यो विद्यासंततिज्ञानविहीनो देशिको भवेत् स
घोरं याति नरकं नास्ति संदेहकारणं ८ यो विद्या० स नमो भक्षणेनैव बहुव्याधिं विनिवर्तयेन ९ यो विद्या० स विनैव तिलांस्तैलं लभते सिक
तासु च १० यो विद्या० सहितो देशिको भवेत् सोनायासेन संसारान्मुक्तारको भवेत् ११ स्वगोत्रर्षिं नमस्कृत्य गुरूक्तेनैव वर्त्मना स्वगुरुं

त्य

सू॰य॰भै॰ चनमस्कृत्य श्रद्धया वगुरोर्गुरुं १२ विप्रेशं परमं सुखं चापि शिवां विद्यास्वरूपिणीं अन्यांश्च सकलान्देवान्ब्रह्मविष्णुपुरोगमान् पुनः शि
ष्यस्य मेधावी चित्तपाकं परीक्ष्य च अविद्यापाशविच्छेदं कुर्यात्साक्षाद्गुरुर्देशिकः १४ विदित्वा शिष्यचित्तस्य विपाकं पुनरास्तिकाः दद्यात्सा
५५ मु कौरुपेण विद्यामेतां महेश्वरी स्वरूपं शिष्योपदेशेन विद्यागर्वेण सुव्रताः गुरुद्रोहेण सर्वज्ञोप्ययं धत्ते पतत्यधः १६ तस्मात्संवत्सरं शिष्यं
परीक्ष्यात्र त्रिमं पुनः प्रदद्याद्देशिको विद्यां गुरुर्विद्याभिवृद्धये विद्यासंततिविज्ञानं शिष्यचित्तपरीक्षणं अवश्यंभावि विप्रेंद्रा देशिक
स्येश्वराज्ञया १८ संप्रदायविहीनाश्च विद्यावेदान्तपारगाः सा विद्या नैव विद्या स्यादिति तत्त्वविदां स्थितिः पारंपर्यपरिज्ञानं परविद्याप्रवर्तकं पा
रंपर्याववोधेन विद्या सावीर्यवत्तरा २० पारंपर्यापरिज्ञानादेव पाशनिकृंतनं तस्मात्प्राज्ञः स्वविद्यायाः संततिज्ञानवान्भवेत् यथा गोत्रपरिज्ञानं वि
वाहस्योपकारकं पारंपर्यपरिज्ञानं तथा ज्ञानोपकारकं २२ विद्याः संततयो विप्रा बहुरूपाः श्रुतौ श्रुताः तत्तत्संततिविज्ञानं विद्यासिद्धेस्तु
कारणं २४ यो गुरुर्भवति यस्य सुव्रताः सोपि तस्य परवेदनाय तु तस्य देशिकपरंपरामिमां तस्य भक्तिसहितस्य बोधयेत् २५ शक्तिरस्य म ५५
हती विजृंभते यस्य देशिकपरंपराधृता मुक्तिसिद्धिरपि चास्ति सद्गुरुः शुद्धवंशपरवेदनेन तु २६ संतानविज्ञानविहीनदेशिकः पिशाचपू

वैरपि पीडितो भवेत् संतानविज्ञानवतः सदाशिवः स्वकं वपुस्तस्य ददाति चित्सुखं २७ शृणुध्वमन्यत्प्रवदामि संततिप्रबोधहीनस्य नरस्य बाधनं न
मुक्तिसिद्धिर्न च तस्य वेदनं न देशिकत्वं न सुखित्वमास्तिकाः २८ शिष्यस्तु मुक्तिं परवेदनं सुखं चित्तस्य शुद्धिं न च याति सुव्रताः वदद्भ्यकस्य
विमोहितस्य न कस्य सलं परिभाषितं मया २९ किमिह बहुभिरुक्तैः संततिज्ञानहीनाः सकलदुरितराशिं सत्यमुक्तं विशंति परमपदसमा
ख्यं ब्रह्मरूपेन यांति स्फुरणसुखमनंतं संततिज्ञानहीनाः ३० इति श्रीसूतसंहितायां यज्ञवैभवखंडे पंचत्रिंशोध्यायः ३५ सूत उ॰ अ
थातः संप्रवक्ष्यामि सद्योमुक्तिकरं परं आम्नायं नैकसंसिद्धं सुकरं सर्वदेहिनां १ शृणु भगवती देवी भोगमोक्षफलप्रदा पुराणी पूर्णविज्ञानस्व
रूपा परमा शिवा २ देवदेवं जगन्नाथं देवेषु च नरेषु च कृमिकीटपतंगेषु समं सर्वेषु संस्थितं सत्यविज्ञानसंपूर्णसुखलक्षणमव्ययं स्वप्र
काशैकसंसिद्धं सविलक्षणवर्जितं ४ घृतकाठिन्यवद्विप्राः केवलं रूपयेदतु आविर्भूतमहानंदे तांडवं करुणालयं गुणातीतं गुरुं स्वयमुपा ग
स्यं गुणमूर्तिभिः प्रणम्य दंडवद्देवी शिवाष्टक्षु दिक्षु बुधाः ६ देव्युवाच देवदेव जगन्नाथ जगतामार्तिभंजन सद्योमुक्तिकरं पुंसां सुकरं ब्रूहि मे
शिव सूत उ॰ एवं पृष्टो महादेवो महादेव्या वृषध्वजः हिताय जगतां तस्यै वभाषे तन्महेश्वरः ८ महेश्वर उ॰ साधु साधु महादेवि विलयाप

स·प·मे· हंजगद्दिनं इतःपूर्वंमयानोक्तंवदामितवतच्छृणु ब्राह्मणोवांत्यजोवापिस्त्रीपार्थवंडोथवाबुधः दरिद्रोवासमृद्धोवामूर्खोवापंडितोपिवा
५८ समर्थोवासमर्थोवाबालोवास्थविरोपिवा आस्तिकोवामहादेविनास्तिकोप्यनुयुतोथवा ११ भूमौदक्षिणकैलासेसर्वस्थानवरेशुभे सु
वर्णमुखरीतीरेसुस्थितेसर्वसेविते १२ त्वयामयाचपुत्राभ्यांनंदिनावृषभेनच ममभक्तैरशेषैश्चब्रह्मणाविष्णुनापिच इंद्रादिलोक
पालैश्चसोमसूर्यादिभिस्तथा देवताभिश्चसर्वाभिर्यक्षराक्षसादिकैः १४ सर्वदासेवितेशुद्धेसर्वकामार्थसाधके संवत्सरव्रतंकुर्याद्दी स
मुक्तिकरंतुतत् आदित्येमेषसंयुक्तेचित्रानक्षत्रकेनरः सुवर्णमुखरीतोयेपवित्रेपापनाशने १६ प्रातःस्नात्वायथाशक्तिधनं
दत्वाप्रियेणतु श्रीकालहस्तिनाथाख्यंदेविमामादरेणतु प्रदक्षिणंयथाशक्तिकृत्वाप्रमोदहंडवत् प्रणम्यपुष्परेवेशंनक्तभोजनमाचरे
त् १८ आदित्येवृषभंप्राप्तेविशाखर्क्षेसमाहितः सुवर्णमुखरीतोयेप्रातःस्नात्वायथाबलं दत्वाप्रदक्षिणंकृत्वादेवंदृष्ट्वाभिवंद्यच समा
हितमनाभूत्वानक्तभोजनमाचरेत् २० आदित्येमिथुनंप्राप्तेमूलाख्येतारकेबुधः सुवर्णमुखरीस्नानंकृत्वाप्रातःसमाहितः प्रदत्वा
धनमन्यद्वाययाशक्तिमहर्षये देवंप्रदक्षिणंकृत्वाप्रणम्यभुविदंडवत् २२ दृष्ट्वानत्वैवमांदेविनक्तभोजनमाचरेत् आदित्येकर्कटंप्रा ५८

प्तेभगर्क्षेसुसमाहितः सुवर्णमुखरीस्नानंकृत्वाप्रातर्द्विजोत्तमाः दृष्ट्वानत्वैवमांदेविदेवंभक्तिपुरःसरं २४ प्रदक्षिणंयथाशक्तिकृत्वादृष्ट्वाभि
वंद्यच त्यक्त्वाहर्भोजनंधीमान्रात्रौभोजनमाचरेत् सिंहराशौस्थितेसूर्येवैष्णवेतारकेनरः प्रातरेवमहानद्यामस्यांस्नात्वायथाबलं
२६ दत्वाप्रदक्षिणंकृत्वास्तुत्वामामभिवंद्यच त्यक्त्वाहर्भोजनंमर्त्योरात्रौभोजनमाचरेत् आदित्येकन्यकायुक्तेतथाचैकपदेदिने स्ना
त्वाचास्यांनरःप्रातर्दत्वाविप्रायभोजनं २८ श्रीकालहस्तिनाथाख्यंदेवंपूर्वोक्तवर्त्मना दृष्ट्वाहर्भोजनंत्यक्त्वारात्रौभोजनमाचरेत्
तुलांप्राप्तेतुमार्तंडेवाश्विन्यांप्रातरेवच नद्यामस्यांनरःस्नात्वादत्वाविप्रायभोजनं ३० प्रदक्षिणप्रणामादिकृत्वानक्तंसमाचरेत् सू
र्येवृश्चिकसंयुक्तेकृत्तिकायांद्विजर्षभाः पूर्वोक्तेनैवमार्गेणनरःकृत्वासमाहितः त्यक्त्वाहर्भोजनंमर्त्योरात्रौभोजनमाचरेत् ३२ आदित्ये
चापसंयुक्तेचांद्रनक्षत्रकेनरः कृत्वातुपूर्ववद्दिनक्तंभोजनमाचरेत् सूर्येमकरसंयुक्तेपुष्यनक्षत्रकेनरः पूर्ववत्सकलंकृत्वानक्तभो
जनमाचरेत् ३४ माघमासिमघर्क्षेतुकृत्वापूर्ववदास्तिकाः त्यक्त्वाहर्भोजनंविप्रोनक्तभोजनमाचरेत् ३५ मार्तंडेकुंभराशिस्थेमघानक्ष
त्रकेनरः पूर्ववत्सकलंकृत्वारात्रौभोजनमाचरेत् ३६ आदित्येमीनराशिस्थेफल्गुन्यांदेविमानवः पूर्ववत्सकलंकृत्वारात्रौभोजनमाच

५७ सू॰य॰भै॰ रेत् ३७ मासिमासिमनुजः समाचरेद्देवमेव परया मुदा सह देहनाशमवलोकयंस्तस्य काले ज्ञानमस्य परमं ददाम्यहं ३८ ब्रतसमाचरणेन महे
श्वरि भुवमवाप्यदंममानवः इतिसमीरितमीश्वरितेमया सुकरमेतदशेषजनस्य तु ३९ आचरन्नणुमात्रमप्युमे मेरुतुल्यमि
तिशास्त्रनिश्चयः नित्यमत्र मनुजस्य वर्तनं मुक्तिसिद्धिकरमित्यसंशयः ४० स्थानमेतदमरैर्द्रवंहितैरोषतूलनिकरस्य पावकः भोग
हेतुरपि कामिनां नृणां भागधेयसहितस्य सिध्यति ४१ अस्य वैभवमशेषनायिके नैव वेद परिमोहितो जनाः मत्प्रसादमबलं ह्यकेवलं
देवि वेदन चकारणांतरैः ४२ पापराशिसहितोपि नास्तिकश्चाविवेकसहितोपि मानवः कालहस्तिमवलंब्य केवलं देवि याति परमं पदं मम ४३
सद्योमुक्तिकरं परं सकलदं सम्यक्स्वरिज्ञानदं भक्त्या लभ्यमिदं मयापि हरिणा धात्रा चापि देवैरपि स्थानं नित्यमतंद्रितो मनिमना मग्नेसरश्वात्म
येत्यस्त्कासर्वमशंकितः परतरा साध्वी श्रुतिश्चाह हि ४४ सूतउ॰ एवमुक्त्वा महादेव्यै महातांडवपंडितः आलिलिंगे शिवां शंभुः स्मरन्त्री
क्यंतयात्मनः देवदेवी जगन्माता दयार्द्रहृदया तु जा भिणम्य ह जयामास भवं भवहरं परं ४६ यदुक्तं देवदेवेन देव्यै रहसि तद्विजाः मयोक्तं
परमप्रीत्या युष्माकं ब्रह्मवादिनां भवंतो पि परित्यज्य समस्तं परया मुदा सद्योमुक्तिकरं स्थानं भजध्वमिदमुत्तमा ४८ सर्वमुक्तं समासे ५७

न सादरं मुनिपुंगवाः एतदन्यन्मनुष्याणां कालक्षेपस्य कारणं ४९ इति श्रीसूतसंहितायां यज्ञवैभवखंडे षट्त्रिंशोध्यायः ३६ सूतउ॰
अथातः संप्रवक्ष्यामि मुनयः संशितव्रताः मुक्त्युपायमयत्नेन मयानो क्रमितः पुरा १ पुरा जैमिनिरत्यंतश्रद्धया सह सुव्रताः स्वगुरुं वेदवेदां
तविशारदमनुत्तमं २ तपसाढ्यमसर्वांगं पराशरसुतं प्रभुं प्रणम्य परया प्रीत्या दंडवत्पृथिवीतले निधाय मूर्ध्नि तत्पादपंकजं भवभे
ख्रो षजं अपृच्छ[illegible]करुणार्थमतिगुह्यमनुत्तमं ४ जैमिनिरु॰ भगवन्सर्वज्ञं नृणामयत्नेन विमुक्तिदं वद कारुण्यतो नाथ मम मायावि
धापहं ५ साधुसाधु मुनिश्रेष्ठ त्वया पृष्टं जगद्धितं सुरासुराणां ब्रह्माणामिदं पृष्टं मयापि च ६ ब्रह्मणा च महाविष्णुः पृष्टस्तेनापि शंकरः
सपुनः शंकरः श्रीमानंबिकापतिरुत्तमः ७ सत्स्वरूपमहानंदमनोरजलधिस्थितः विश्वलोकरसार्थं वभाषे करुणानिधिः ८ ईश्वरउ॰
स्थाने हृष्टं त्वया विष्णो जगतः पालने रतः वदामि संग्रहेणाहं मुक्त्युपायमयत्नतः श्रीमद्व्याघ्रपुरं नाम स्थानमस्ति महीतलै सर्वदा पर
मप्रीत्या यत्र नृत्यं करोम्यहं १० तत्र मामादरेणैव नत्स्यमानं दिने दिने दृष्ट्वा पंचाक्षरं मंत्रं संतारं सर्वसिद्धिदं यत्नद्वादशसाहस्रं जपति श्र
द्धया सह तस्य सिद्धा परामुक्तिर्विना विज्ञानमुत्तमं १२ श्रीमद्दक्षिणकैलासे तथा वृद्धाचलाभिधे तथा गोपर्वते शुद्धे तथा वल्मीकसं

स्तं० यं०भे ज्ञिने आदित्यनामसमाख्ये च स्थाने सर्वफलप्रदे सोमनाथे तु गोकर्णे तथा भीमेश्वराभिधे १५ केदाराख्ये विशिष्टे तु श्वेतारण्ये च शोभने ह
स्तिकाननसंज्ञे च तथोपेश्वराभिधे कुंभकोणे महास्थाने तथा मध्यार्जुनाभिधे वाराणस्यां तु केदारे तथा रामेश्वराभिधे १६ हालास्ये
५८ च हरे नित्यं दृष्ट्वा मामादरेण च जपित्वा पूर्ववन्मंत्रं मुच्यते भवबंधनात् पुरा कश्चिन्महापापी पुण्यलेशविवर्जितः महामोहावृतः सा
क्षान्मातरं तु पतिव्रतां १९ गत्वा संवत्सरं हत्वा पितरं हननसंयुतं निर्घृणो निर्भयो नित्यं चचार वसुधातले चरतस्तस्य मार्गे स्वैरं सहसा तीव्र
भयंकरः मुसलोद्यतपाणिस्तु विभाति ब्रह्मराक्षसः २० तं दृष्ट्वा भीतिसंयुक्तं पूर्वपुण्यबलेन तु हालास्याख्यं महास्थानं गमत्पूरुषोन म
म अदृष्टस्तत्क्षणादेव तेनैव ब्रह्मराक्षसः सोपि विस्मयमापन्नो विचार्य कमलेक्षणं २२ अहो माहात्म्यमस्यैव स्थानस्यातिभयंकरः
अस्मिन्देशे न दृष्टस्तु मया सब्रह्मराक्षसः अतो देहविनाशं तं मयैवात्रैव वर्तनं कार्यमित्यभिसंधिं च हरे त्वा सुनिश्चलः २४ अवर्तत महा
स्थानसेवनेनैव तस्य तु समस्तानि च पापानि विनष्टानि जनार्दन मत्प्रसादेन विप्रस्य कस्यचिद्वचनं हरे श्रुत्वा दृष्ट्वा तु मां नित्यं हालास्या ५८
ख्ये तिशोभने २६ जपित्वा पूर्ववन्मंत्रं षडक्षरसमाह्वयं अयत्नेन विमुक्तोभूत्संसारजलधेस्ततः अत्र दत्तं महादानं भवेत्स्थाने मम भि

ये कृतमिष्टं तपश्चाल्पमप्यत्र सुमहद्भवेत् २८ आतो विशिष्टमस्थानं चात्रैवान्यत्र वानरः दृष्ट्वा मामादरेणैव जपेन्मंत्रं षडक्षरं एवमा
चरतस्तस्य मत्प्रसादाद्ध्रुवमिह हरे मुक्तिसिद्धिरयत्नेन भवत्येव न संशयः ३० इतोन्यत्सकलं विद्धि नराणां पापकर्मणां अशक्यं कर्तुमस्थैर्यं त
स्मादुक्तं समाचरेत् ३१ सूतउ० एवं शिवेनैव समस्तदेहिनां विमुक्तिसिध्यर्थमयत्नतः पुरा सुभाषितं कारुणिकेन तन्मया प्रभाषितं वो
मुनयः सुसाधनं ३२ इतिस्कं० यज्ञवै० सप्तत्रिंशोध्यायः ३७ सूतउ० अथातः संप्रवक्ष्यामि सर्वसाधनमुत्तमं शृणुतातिप्रियेणैव द्विजाः
सारतरोत्तमः १ गुरुः सत्यवतीसूनुः सर्वविज्ञानसागरः सर्ववेदोदधेः पारो गुरुर्मे करुणानिधिः २ सर्वलोकोपकाराय सांबं संसारभेष
जं ध्यायमानो महाभक्त्या नतानां परमं तपः पुनः पुष्पादिभिर्देवं समाराध्य यथाबलं षडक्षरेण मंत्रेण तुष्टाव परमेश्वरं ४ परतत्त्वा
य तत्त्वानां तत्त्वभूताय वस्तुतः तस्मादन्यविहीनाय नमस्तस्मै स्वयंभुवे ५ चिच्छक्तिर्जडशक्तिश्च तद्देहश्च तथैव च यदेवैतत्तो नित्यं त
स्मै सर्वात्मने नमः ६ ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः विराट् धाश्च देवाश्च यन्मात्रं तं नुमः शिवं ७ महासत्ता च यं जीवाम
ध्यसत्ता च चेतनाः विहीनाश्चैव यन्मात्रं तं नमामि महोजसं ८ यस्य सत्ता जगत्सत्तारूपेणैव विभासते यं विना न जगत्तस्मै सदा सा

स्य·भे स्वात्मनेनमः यस्यभानंजगद्भानस्वरूपेणविभासते यस्तेनजगद्भानंतस्मैभानात्मनेनमः १० यदानंदोखिलानंदोविभातिस्वयमेवतु तं
५८ नुमःपरमानंदंपरापरविवर्जितं यद्देशकालदिग्भागैर्नभिन्नंसर्वदाद्वयं यदेवविश्वंतद्ब्रह्मयथार्थंप्रणमाम्यहं १२ अनंतमद्वयंपूर्णमेकमि
त्यामनंतियत् आगमाअखिलानित्यंवंदेतद्ब्रह्मसंज्ञितं यत्स्वरूपमविज्ञायसांख्ययोगौविनिर्गतौ तंतदज्ञानचित्रस्यभित्तिभूतंनुमःशिवं
१४ यत्स्वरूपमविज्ञायशब्दशास्त्रंसमुद्भवौ तंतदज्ञानचित्रस्यभित्तिभूतंनुमःशिवं १५ यत्स्व०कारकंपरमाणवःकल्पिताजगतो
पं विभास्तंनुमःपरमेश्वरं १६ यत्स्व०क्रियांसर्वफलप्रदां कल्पयंतिविनादेवंतंवंदेसकलप्रदं १७ यत्स्व० देहमात्मेतिमन्वतेतंकोभासेस्तमी
शानंवंदेदेहविलक्षणं १८ यत्स्व·देहजानींद्रियाणितु आत्मेतिमन्वतेवंदेतमिंद्रियविलक्षणं १९ यत्स्व·प्राणमात्मेतिमन्वते वंदेतंप्राण
वेत्तारंप्राणंप्राणस्यसर्वदा २० यत्स्व०मनःसंकल्पलक्षणं आत्मेतिमन्वतेभक्त्यावंदेतंमनसःपरं २१ यत्स्व·बुद्धिमात्मेतिमन्वते तंवं
देबुद्धिबोद्धारंबोधरूपमविक्रियं २२ यत्स्व०सर्वप्रत्ययकारणं अंतःकरणमात्मेतिमन्वतेतंनुमःशिवं २३ यस्मिन्जाग्रदवस्थेयंभाती ५८
वभवतीवच तंतद्धीनेरधिष्ठानंवंदेसाक्षिणमीश्व

रं २५ यस्मिन्सुषुप्त्यवस्थेयंभातीवभवतीवच तंतद्धीनेरधिष्ठानंवंदेसाक्षिणमीश्वरं २६ यस्मिन्नुक्तमंतुरीयत्वंत्रिधामायेक्षयैवतु तंतुरी
यत्वनिर्मुक्तंवंदेचिद्घनमीश्वरं २७ यस्मिंस्तुरीयातीतत्वमध्यस्तंतदभावतः तंवंदेकेवलंशुद्धंनिर्विशेषंमहेश्वरंशुद्धंनिर्वि रं २८ एकत्वं
चतथाद्वित्वंत्रित्वंयस्मिन्प्रकल्पितं बहुत्वंचनमाम्यानमसंख्येयंनुमःशिवं २९ अभिन्नंचतथाभिन्नंभिन्नाभिन्नंवदंतियं तंसदाकेवलंवंदेके
पांचिल्लभ्यमीश्वरं ३० यस्यविज्ञानसंपन्नाब्रह्मविष्णुमहेश्वरान् यथार्थंब्रह्मजानंतितंनुमःपरमाद्वयं ३१ यस्यवि०सदेश्वरसदाशिवा य
थार्थं·३२ यस्यवि·सर्वदेवानशंकिताः यथार्थं० ३३ यस्यवि०विभिन्नान्जीवचेतनान् यथार्थं· ३४ यस्य०सर्ववेदानशंकिताः यथार्थं·
३५ यस्य० स्मृतीःसर्वाअशंकिताः यथार्थं· ३६ यस्य·पुराणानिचभारतं यथार्थं० ३७ यस्य·सर्वान्शैवागमानपि यथार्थं०३८ यस्य०
विविधान्वैष्णवागमान् यथार्थं· ३९ यस्य०ब्रात्मानेतांस्तथागमान् यथार्थं· ४० यस्य·बुद्धार्हदागमानिमान् यथार्थं· ४१ यस्य०शब्दान्सखे
तराद्विकान् यथार्थं· ४२ यस्य० विद्याःसर्वाअशंकिताः यथार्थं· ४३ यस्य०तर्कानन्योन्यबाधकान् यथार्थं· ४४ यस्य०मानमध्य
क्षपूर्वकं यथार्थं· ४५ यस्य०ब्राह्मणाःक्षत्रियाद्विशः यथार्थं० ४६ यस्य०मूढानपिचसंकरान् यथार्थं· ४७ यस्य·आश्रमानखिलान

स॰ प॰ भे पि यथार्थं॰ ४८ यस्य॰ धर्माधर्मावशंकिताः यथार्थं॰ ४९ यस्य॰ वर्ज्यावर्ज्यानशंकिताः यथार्थं॰ ५० यस्य॰ विद्याविद्या अशंकिताः यथा
६० र्थं॰ ५१ यस्य॰ देहादीनखिलानिमान् यथार्थं॰ ५२ यस्य॰ जाग्रदादित्रयं सदा यथार्थं॰ ५३ यस्य॰ तुरीयत्वादिकल्पना यथार्थं॰ ५४ यस्य॰
भूमिं तद्देहमात्रिकाः यथार्थं ५५ यस्य॰ जलं तद्देहमात्रिकाः यथार्थं॰ ५६ यस्य॰ अग्निं तद्देहमात्रिकाः यथार्थं॰ ५७ यस्य॰ वायुं तद्देहमा
त्रिकाः यथार्थं ५८ यस्य॰ आकाशं तत्र कल्पितं यथार्थं॰ ५९ यस्य॰ शब्दस्पर्शादिकानिमान् यथार्थं॰ ६० यस्य॰ महदाद्यखिलं जगत् य
थार्थं॰ ६१ यस्य॰ सर्वमेतदशंकिताः यथार्थं॰ ६२ यस्य॰ महामायामशंकिताः यथार्थं॰ ६३ यस्य॰ चिच्छक्तिं विमलामिमां यथार्थं॰ ६४
यस्य॰ प्रतीतमखिलं जगत् यथार्थं॰ ६५ यस्य॰ कलावाप्येकदाचन न किंचिदपि कुर्वंति तं नतुमः परमाद्वयं ६६ यस्य॰ प्रत्यग्ज्योतिर्विसंस्थि
ह॰ स्पंय ताः तमेव प्रत्यगात्मानं देहं तादिविवर्जितं ६७ इदं रूपमस्य भातितमीश्वरं वंदे लक्षणमद्वयमनिर्देश्यं स्वयंप्रभं ६८ स्तुतिमतिनिवहस्य ने
वगोचरं भवभयजलधेः सदैवतारकं अहमिति सततोदितप्रभं निखिलजगद्धितं नमामि शश्वत् ६९ सूत उ॰ एवं व्यासेन सर्वज्ञः संस्तवः
सर्वफलप्रदः अभिष्टुतो महादेवः प्रसन्नमभवन्मुनेः ७० तं दृष्ट्वा देवदेवेशं देव्या सहितमव्ययं प्रणम्य प्रार्थयामास सर्वसाधनवेदनं ६०

दृं

उ ग्रो

७१ देवदेवोपि सर्वज्ञः प्रसन्नः सर्वसाधनं प्राह गंभीरया वाचा मुनये मुनिसत्तमाः ७२ ईश्वर उ॰ कथयिष्ये समासेन सर्वसाधनमुत्तमं श्रृणु
ष्व श्रद्धया सार्द्धं मया नोक्तमितः पुरा ७३ अपेक्षितार्थः सर्वेषां भुक्तिर्मुक्तिश्च सुव्रत मुक्तिर्नानाविधा कामयावेदानुसारतः ७४ तत्र सा
युज्यरूपा या मुक्तेः साक्षात्तु साधनं सम्यग्ज्ञानं न कर्मोक्तं न तयोश्च समुच्चयः ७५ नित्यसिद्धाथवा मुक्तिः साध्यरूपा द्वयी गतिः नित्यशुद्धा तु सं
वेषामात्मरूपाथवा परा ७६ आत्मरूपैव चेन्मुक्तिर्नित्यप्राप्ताहि सात्मनः नित्यप्राप्तस्य चाप्राप्तिर्विभ्रमः खलु देहिनां ७७ विभ्रमस्य निवृत्त्या सा
प्राप्तेति व्यपदिश्यते विभ्रमस्य निवृत्तिस्तु सिद्ध्यत्यज्ञाननाशतः ७८ अज्ञानस्य विनाशस्तु ज्ञानादेव न चान्यतः ज्ञानादज्ञाननाशस्तु प्रसिद्धः
सर्वदेहिनां ७९ अपरा सा परा मुक्तिर्नात्मरूपैव चेन्मतं तदापि मुक्तिः प्राप्या वा न प्राप्या वात्मनो भवेत् ८० प्राप्या चेदात्मना मुक्तिरप्राप्तप्राप्ति
रेव सा अप्राप्तप्राप्तिरप्यस्य संबंधो वैक्यमेव वा ८१ संबंधश्चेत्स साध्यो वा नित्यो वा साध्य एव चेत् अनित्यः स तु संबंधो भवेन्नित्यो न सर्व
था ८२ साध्यानामपि भावानामनित्यत्वं व्यवस्थितं अभावस्य न साध्यत्वं प्रध्वंसाख्यस्य सर्वदा साध्यत्वाख्यस्तु धर्मश्च नैवाभा
भावाश्रयो भवेत् नित्यो यदि स संबंधस्तर्हि संबंधसंबंधसंज्ञिता मुक्तिश्च नित्यसिद्धैव मुमुक्षोरात्मनो भवेत् तदापि नित्यप्राप्ताया मुक्तेः

सू॰ य॰ भै॰ मामिस्तुपूर्ववत् ८५ विज्ञानेनैवनान्येनसत्यमुक्तंद्विजोत्तम अभावप्राप्तिरूपायांमुक्तेरैक्यंभवेद्यदि ८६ नतत्रयुक्तंद्वयोरैक्यंनसिध्य
तिकदाचन भिन्नयोर्भेदनाशेवामुक्तिर्भेदस्थितेयथा भेदनाशेनयोरैक्यंघटतेवेदवित्तम भेदेसतितयोरैक्यमितिचेन्नत्रसंगतं ८८ भेदस्य
९१ सन्निधावैक्यंविरोधादेवसिध्यति नप्राप्त्यात्मनामुक्तिरितिचेन्नत्रसंगतं अप्राप्यायत्तमुक्तेश्चनास्त्यपेक्षाहिसाधने साधनेसतिसामुक्तिर
प्राप्यैवसदाखलु ९० ननित्यसिद्धासामुक्तिःसाध्यरूपैवचेन्मतं साध्यत्वेसत्यनित्यत्वंपूर्वमेवाभिभाषितं ९१ प्रध्वंसस्यतुनित्यत्वेस
र्वथानभविष्यति अचिद्रूपस्यसर्वस्यविनाशोगम्यतेयतः ९२ भावत्वेसतिसाध्यत्वाद्विनाशश्चेत्तनत्वतु प्रध्वंसस्यतुसाध्यत्वेप्यभा
वत्वेनहेतुना नसिध्यतिविनाशस्तु नचैनैवसुसंगतं प्रागभावसमाख्यस्याप्यनित्यत्वस्यदर्शनात् ९४ प्रागभावस्यसाध्यत्वाभावेस
त्यप्यभावतः अनित्यत्वंयदिप्येनप्रध्वंसस्यापितत्समं भावानामप्यभावानांसाध्यानांमुनिसत्तम असाध्यानांचसर्वेषामनित्यत्वेप्रयोज
नं ९६ अनेनतत्वमेवोक्तंनेनरद्यभिचारतः चेतनस्यतुनित्यत्वंश्रुतिराहसनातनी तस्मादुक्तप्रकारेणमुक्तिःसायुज्यरूपिणी ज्ञानलभ्या ९१
क्रियामात्रेनलभ्यानसमुच्चयात् ९८ ज्ञानंनामाखिलंचेदंसद्रूपेणावभासनं क्रियातुकारकापेक्षानज्ञानालंबनीसदा अतः क्रियायाज्ञानेन

विरोधादेवसर्वदा समुच्चयोनयुज्येतकुतस्तेनपरागतिः १०० सारूप्याख्यातुयामुक्तिःसामीप्याख्याचयापरा सालोक्याख्याचयातोसांके
३ वलंकर्मसाधनं ऐहिकामुष्मिककाराममुक्तयःसर्वदेहिनां कर्मणैवहिसिध्यंतिनज्ञानेनविरोधतः २ ज्ञानंकर्मचवेदोक्तमेवनान्योदितंभव
त् अन्योदितंतुविभेदव्यवहारेविवेकिनां अपेक्ष्यबुद्धिविज्ञानंकर्मचेतिविधीयते तथापिव्यवहारेतेव्यावहारिकसिद्धिदे ४ तस्मात्सर्वत्रना
स्तिक्यंनकुर्यान्मतिमत्तमः नास्तिक्यादेवसर्वेषांसंसारेपरिवर्तनं सर्वमुक्तंसमासेनसाधनंमुनिसत्तम गोपनीयमिदंतस्माद्दास्तिकस्यस
दादुतं सूत उ० एवमुक्त्वामहादेवःसांबःसर्वावभासकः प्रत्यक्संनिधौतस्यतत्रैवांतर्हितोवत् साधनंतुसकलंपरिभाषितंकेवलंकृपयैवतुवोम
या तेनतल्कथितव्यमिहद्विजामोहएवहिसमस्तमितोन्यथा १०८ इतिश्रीस्कंदपुराणेसूतसंहितायांयज्ञवैभवखंडेअष्टत्रिंशोध्यायः सूत उ०
अथातःसंप्रवक्ष्यामिसमासेननविस्तरात् अविरोधंतुवेदानामशेषाणांमुनीश्वराः द्विविधोवेदराशिस्तुमुनयःसंशितव्रताः सत्याद्वैतपरःक
श्चिद्वेदभागःसमासतः २ कल्पितद्वैतनिष्ठस्तुवेदभागोपरस्तथा सत्यमेवसदाद्वैतमसत्यंद्वैतमास्तिकाः द्वैतस्यापिचसत्यत्वंवार्णयंती
ह केचन तदसंगतमध्यस्तंद्वैतंपरस्मात्परात्मनि ४ अध्यस्तंहिसदाद्वैतंद्रष्यत्वाच्छुक्तिरूप्यवत् दृश्यत्वंद्वैतजातस्यसंमतंसर्वदेहिनां

स्र्ये मे ५ तस्माद्द्वैतपरो भागः कल्पितद्वैतगोचरः अद्वैतं सर्वदा सत्यं भेदाभावात्कथंचन ६ अद्वैतमपि चाध्यस्तं यदि वेदविदांवराः कुत्रैवाद्वैतमध्यस्तं
नाद्वैतेतरभावतः केवलं कल्पिते द्वैते नाद्वैताध्याससंभवः व्यवहारदशायां तु सत्येऽध्यासस्य दर्शनात् ९ द्वैते चाद्वैतमध्यस्तमिति वक्तुं न शक्य
६२ ते तस्याध्यासस्वरूपत्वाद्द्वैतस्य ब्रह्मविन्नमाः द्वैतं चापि तथाद्वैतमुभयं कल्पितं न हि द्वैताद्वैतातिरेकेण नास्तित्वाद्वेदवस्तुनः १० अन्यमात्रेण
मार्गेण कश्चिद्दंशः श्रुतेर्बुधाः १२ सत्याद्वैतपरः प्रोक्तः सर्वशास्त्रार्थवेदिभिः तथैव वेदशेषस्तु कश्चिदंशस्तपोधनाः कल्पितद्वैतनिष्ठः क
थितः सत्यवादिभिः द्वैताद्वैतश्रुतीनां तु विरोधोपि न तात्त्विकः १४ उक्तेनैव प्रकारेण विरोधाभाव एव हि प्रत्यक्षादेरगम्यत्वादद्वैतस्य तु सर्वदा त
त्रैवार्थवती साक्षादद्वैतश्रुतिरास्तिकाः अंतरेण श्रुतिं भेदो लोकसिद्धः सदैव तु १६ तेन नार्थवती तत्र श्रुतिर्भोनातिगामिनी प्रमाणांतरसंवादापेक्षा ना
स्ति श्रुतेः सदा स्वतश्च परतो दोषो नास्ति तस्याः श्रुतेरपि प्रत्यक्षादिप्रमाणेन तां दोषसद्भावना सदा १८ अस्त्यतः श्रुतिरेतिर्वा प्रमाणेन तां बलीय
सी कल्पितद्वैतमात्रे तु नैव मानमियं श्रुतिः तत्र प्रयोजनाभावात्परमार्थनिरूपणे अद्वैतं परमानंदं ब्रह्मवस्तु न चापरं २० तत्र प्रयोजनं ६२
विप्रा अस्त्येव हि न संशयः यत्र प्रयोजनं तत्र श्रुतिर्मानमिति स्थितिः अतः प्रयोजनाभावाद्द्वैतं न प्रतिपाद्यते अतद्द्वैतमद्वैतं प्रतिपादयति

श्रुतिः २२ स्मृतीनां च पुराणानां भारतादेस्तथैव च तथा शैवागमादीनां तर्काणां च द्विजोत्तमाः अद्वैतनिष्ठतैवोक्ता न द्वैतपरता सदा अ
ध्यस्ताज्ञानतत्कार्यनिवृत्तिद्वारतो द्वयं २४ बोधयंति सुराः काश्चिच्छ्रुतयः पंडितोत्तमाः साक्षाद्विधिमुखेनैव ब्रह्म सत्यादिलक्षणं बोधयंति सुराः काश्चि
च्छ्रुतयः पंडितोत्तमाः साधकस्य च जीवस्य स्वाभाविकशिवात्मतां २६ बोधयंती श्रुतिर्भ्रांतजीवत्वं बाधते खलु जीवत्वे तेन तस्यास्य स्वाभाविकमिति
द्विजाः २७ केचिद्वदंति वार्तेयानतस्वाभाविकं सदा यदि स्वाभाविकं नहि जीवत्वं सर्वदा भवेत् २९ नास्ति तस्य निवृत्तिर्हि स्वतः सिद्धं न नश्यति यथाग्ने
रुजसंपर्कात्ताम्रस्य मलनाशनं तथा जीवस्य दुःखादेर्निवृत्तिः केनचिद्भवेत् रसविद्धमयः स्वर्णं यथा भवति सर्वदा ३० केनचित्साधनेनैव तथा जीवः शि
वो भवेत् इति केचित्सुमोहेन प्रवदंति तु वादिनः तत्रासंप्रतिपन्नं हि स्वतः सिद्धं न नश्यति यथा स्वाभाविकं वह्नेरौष्ण्यं नैव विनश्यति ३२ प्रकाशो वा तथा
स्यापि दुःखादिर्विनश्यति मणिमंत्रौषधादीनां शक्तिर्वैचित्र्यमात्रतः नष्टवत्प्रतिबद्धं तु न नष्टं संमतं हि तत् यथा ताम्रमलं नैव केनचित्तु विनश्यति म
३४ नष्टवत्प्रतिबद्धं हि विनष्टं मन्यते बुधाः जीवत्वं च तथास्यापि सुखदुःखादिलक्षणं नष्टवत्प्रतिबद्धं स्यान्नैव नश्यति केनचित् पयसा वेष्टितं
तोयं पय इत्यभिधीयते ३६ रजतं कांचनं प्रसंहेमद्रव्यमभिधीयते तथा च रसवीर्येण वह्निसंपर्कतोपि च अयसो हेमवर्णत्वं न हेमत्वं कदाचन र

स०यमे॰ सर्वीर्येविर्येविनाशेतुवर्लस्यविनश्यति ३८ कनकस्यननित्यत्वमितिनानात्मसुविस्थिरा तथापिमानवाभ्यांतांकांचनंमन्यतेन्वयः सूक्ष्मद
र्शनहीनानांसुलभःखलुविभ्रमः तथाशिवत्वंजीवस्यभ्रांत्यासिद्धंभविष्यति ४० साधनेनस्वतोजीवोनशिवःसर्वथाभवेत् ततोजीवःशि
६२ वःसाक्षान्नभवेत्तुकदाचन ४१ शिवएवस्वतःसाक्षाच्छिवोभवतिनान्यथा धृतेववह्निसंपर्कात्तोयंवह्निर्नवस्तुतः ४२ तद्वत्तोयमितिप्राज्ञा
:प्रतीमावविदेहिनां तथाशिवःस्वतोजीवःकदाचित्पंडितोत्तमाः शिवत्वेनप्रतीतोपिस्वतोनैवशिवोभवेत् स्वतोऽशिवस्तुजीवोयंसर्वथा
नशिवोभवेत् ४४ केनचित्साधनेनैवमुक्तोशिवसमोभवेत् इत्येवंकेचिदिच्छंतिवादिनोमुनिपुंगवाः वार्त्तामात्रमिदंप्रोक्तंसर्वथाननद
र्थवत् एकदेशेनवाजीवःकिंवासर्वात्मनासमः ४६ एकदेशेनचेत्सर्वेशिवाःसंसारवर्तिनः एकदेशेनसर्वेषामस्तिसाम्यंशिवेनहि सर्वा
त्मनाचेत्साम्यंतत्सर्वथाशिवएवसः भेदकाकारमन्यत्वाद्देशाभावाच्चवस्तुतः ४८ किंचमुक्तोशिवेनैवसमोजीवोभवेद्यदि कंचित्कालंहित
त्साम्यमागतंखलुगच्छति तस्माज्जीवःस्वतःसाक्षाच्छिवःसत्यादिलक्षणः अप्रच्युतात्मभावेनस्थितःसन्परविद्यया ५० स्वाज्ञानंतत्प्रसूतंचसं ६२
सारंस्वात्मानाप्रसन् स्वरूपेशिवरूपेणस्वयमेवावशिष्यते शुक्तिकाकलधौतंतुशुक्तिकावेदनेनतु शुक्तिकामात्ररूपेणयथालोकेऽवशिष्य

ते ५२ शिवात्मनाजगद्बाधेनचैवंसंभविष्यति अभावएवमुक्तोतुजगतोहिभविष्यति इत्येवंकेचिदिच्छंतिसचमंदमतिभ्रमः भावरूपेतुवस्त्वेव
ह्यभावोभवतिहिद्विजाः ५४ जगत्प्रभासलक्षणवैनाभावोभावाभावविलक्षणः तस्मादध्यस्तबाधस्तुनभावोभावएवतत् ५५ अधिष्ठानावशेषो
हिकेवलंपंडितोत्तमाः जगद्भ्रमस्याधिष्ठानंशिवःसत्यस्वभावतः ५६ तदन्यदखिलंभ्रांतंयुक्तितश्चप्रमाणतः तस्मात्सर्वजगद्बाधेशिवएवावशि
ष्यते शिवावशेषंसर्वस्यजगतःश्रुतिरादरात् वक्तितत्रनसंदेहस्त्रिवेःश्रूयपयाम्यहं ५८ तस्मात्सत्यपरानंदप्रकाशाद्वैतमीश्वरं बोधयंत्यादरे
स्मा णेवश्रुतयःस्मृतिभिःसह एकत्वबोधकस्यवेदवाक्यस्यसुव्रताः वाक्यांतराणिसर्वाणिशेषभूतानिसंततं ६० वेदोनान्यस्यशेषस्तुयथादेवो
महेश्वरः शिवस्यशेषंसकलंश्रुतेर्मानानिसर्वशः यथामातास्वपुत्रस्यसत्यमेवाभिभाषते तथासर्वजनस्यापिसत्यंवदतिहिश्रुतिः ६२
श्रुतौवापिमहादेवेत्रिपुंड्रभस्मधारणे श्रद्धांनकुरुतेमर्त्यःपुण्यलेशविवर्जितः पापिष्ठानांमनुष्याणांत्रिपुंड्रोद्धूलनेश्रुतौ महादेवेचवि
द्वेषःस्वतएवविजायते ६४ वेदोत्कर्षेशिवोत्कर्षेविद्योत्कर्षेतथैवच त्रिपुंड्रोद्धूलनोत्कर्षेश्रद्धापुण्यवतांभवेत् अविरोधेतुवेदानां
पुरोक्तेनैववर्त्मना वेदानुसारिस्मृत्यादेःपापिष्ठस्यनहिस्पृहा ६६ विद्वद्वादेःशिवसाम्यत्वेवेदसाम्येपरस्यच कुर्वंतीछामविद्वांसः

वेदस्य
पापमेवात्र कारणं वेदानमपकर्षेन तु त्रिपुंड्रादेस्तथैव च तथाशिवापकर्षं च यतं ते पापयोनयः ६९ महादेवश्चैव तथा तिर्यक् त्रिपुंड्रकं
५४ व्यर्थमित्याहुरस्पर्यं पाखंडाः पापयोनयः महादेवस्य माहात्म्यं वेदानामपि वैभवं त्रिपुंड्रस्य च माहात्म्यं न शक्यं वर्णितुं मया ७० कर्म
शेषत्वमायाता ब्रह्मकांडस्य केचन वर्णयंति न ते संतः किंतु ते विप्रलंभकाः ७१ कर्तृत्वं चैव भोक्तृत्वं नियोज्यत्वं क्रियाफलं प्रसतेब्र
ह्मविज्ञानं न तच्छेषतास्य न ७२ अल्पलाभप्रदं कर्म ज्ञानं दुर्लभफलप्रदं तथासति मुनिश्रेष्ठास्तच्छेषत्वं कथं भवेत् फलवत्कर्मशे
षत्वमफलस्य हि सिद्ध्यति फलवद्धि परज्ञानं न तच्छेषतास्य न ७४ कर्मप्रकरणस्थं हि ज्ञानं कर्मांगमिष्यते भिन्नप्रकरणं ज्ञानं न त
च्छेषतास्य न कर्मसाध्यफलं ब्रह्मज्ञानं सिद्धफलं बुधाः तथासति मुनिश्रेष्ठास्तच्छेषत्वं कथं भवेत् ७६ अधिकारिविभेदेन प्रवृत्तं मु
निपुंगवाः कांडद्वयमतोऽन्यस्य कथमन्यद्गुणो भवेत् कर्मज्ञानस्य सद्भावेन तथा ब्रह्मवेदनं तथासति कथं विप्रा ज्ञानकर्मसमुच्चयः ७८
अप्रकाशात्मकं कर्म स्वप्रकाशं तु वेदनं तथासति कथं विप्रा ज्ञानकर्मसमुच्चयः तस्माद्वेदांतभागस्तु ब्रह्मकांडसमाह्वयः सर्वथा कर्म ६४
कांडस्य नैव शेषः कदाचन ८० तथैव कर्मभागश्च ब्रह्मकांडस्य सर्वथा न सांशादेव शेषः स्याज्ज्ञानं वेदांतवाक्यजं ८१ शांतिदांत्यादयः

४७

सर्वे गुणा एव मुनीश्वराः अंगानि ब्रह्मविद्यायाः श्रवणं करणं बुधाः ८२ विद्याफलोपकारि स्यान्मननं चिंतनं तथा ज्ञानमज्ञाननिवृत्तौ न सहा
यमपेक्षते तमोनिवृत्तौ सूर्यस्तु यथा नान्यदपेक्षते तथाज्ञाननिवृत्तौ तु ज्ञानं नान्यदपेक्षते ८४ स्वर्गाद्यं सिक्रियायास्तु धर्माधर्मात्मकं फ
लं न ज्ञानं तेन विद्याया न साक्षात्कर्मसाधनं अधर्मस्य फलं साक्षान्नरकप्राप्तिरेव हि न ज्ञानं तेन विद्याया नाधर्मः साधनं भवेत् ८६
धर्मस्य पापविच्छित्तिद्वारा शुद्धिश्च मानसी फलं न ब्रह्मविज्ञानं तेन धर्मो न साधनं कर्मणा शुद्धचित्तस्य संसृतेर्दोषदर्शने पुनर्विरक्तिः संसारान्मो
क्षेच्छा जायते तथा ८८ तस्मात्कर्मप्रमाणेव ज्ञानशेषं न चान्यथा अत एवोक्तमार्गेण तयोः सम्यक्समुच्चयः सुतरामेव नास्त्येव सम्यगुक्तं म
यानघाः अतश्चान्योन्यसंबंधः कांडयोर्नैव विद्यते ९० न्यायाभासमहामोहाद्बलं व्यान्तराधमाः विप्लावयंति वेदार्थं न तेषां मतिरुत्त
माः मस्तु तस्मान्तु विज्ञानादेवांतार्थस्य बाधनात् सदा संसारवर्तित्वमेव तेषां न संशयः ९२ अहो मोहस्य माहात्म्यं सर्ववेदार्थवर्जिताः परि
भ्रमंति वेदार्थादन्यथैव विचेष्टिताः ९३ वेदांतशेषानवधार्य मर्त्यो मदुक्तवेदांतविचारमार्गं उपैति पुण्येन च शंभुभक्त्या शिवप्रसादे
न न चेतरेण ९४ अविरोधः कथितो मया द्विजाः तपसैव श्रुतिगोचरस्तु वः मतिरेषा मनुजस्य मुक्तिदा विपरीता मतिरस्य नाशि

स्.प.भै. ना ६५ इतिश्रीस्कंदपुराणेसूतसंहितायांयज्ञवैभवखंडेएकोनचत्वारिंशोध्यायः सूतउ० अथातःसंप्रवक्ष्यामिसर्वसिद्धिकरंन्नृणां मया
नोक्तमितःपूर्वंमतिगुह्यमनुत्तमं कायिकंवाचिकंचैवमानसंचतथैवच त्रिविधंकर्मकर्तव्यंसर्वसिध्यर्थमास्तिकैः २ सर्वसिद्धिकरंकर्मका
६५ यिकंवहुधास्मृतं लिंगेशिवार्चनंचैवरुद्राक्षाणांचधारणं अग्निरित्यादिभिर्मंत्रैर्जावालोक्तैश्चसत्तमैः त्रियायुषेणमंत्रेणभस्मनासजले
नच ४ सर्वांगोद्धूलनंचैवत्रिपुंड्रस्यचधारणं शिवस्योत्सवसेवाचशिवक्षेत्रेसुवर्तनं वाचिकंकर्मविप्रेंद्राःसर्वसिद्धिकरंन्नृणां चिन्मंत्रस्य
जपस्तद्वत्सदाख्यस्य जपस्तथा ६ प्रणवस्यजपस्तद्वद्हंसाख्यस्यमनोर्जपः षडक्षरस्यमंत्रस्यसावित्र्याश्चजपस्तथा वेदपारायणंचैववेदांग
नांचकीर्तनं मानसंकर्मविप्रेंद्राःसर्वसिद्धिकरंन्नृणां ८ महादेवःस्मृतिःसाक्षान्महादेव्याःस्मृतिस्तथा वेदांतार्थविचारश्चवेदान्यत्रवि
स्मृतिः विरक्तिःसर्वलोकेभ्योवेदार्थेनिश्चयोचलः स्मार्तेपौराणिकेप्यर्थेनिश्चयश्चतथैवच १० शिवस्योत्कर्षताबुद्धिःशिवोहमितिभा ६५
वना एतेधर्माविशिष्टास्तुःसर्वसिद्धिकराअपि तथ्योतिरिक्तायेधर्माःश्रौतस्मार्तास्तथापरे तेतुवेदविदांमुख्याःसर्वसिद्धिकरानहि १२
महादेवस्तुसर्वात्मासर्ववस्तुवभासकः सर्वानंदकरःपूर्णःसर्वदेवोत्तमोत्तमः तस्यासाधारणाधर्माएतएवनचापरे तस्मादेतेहिसर्वेषां

सर्वसिद्धिकरान्नृणां १४ सत्तासिद्धिश्चसर्वेषांमहादेवप्रसादतः विरुद्धारीनामतोधर्माःपूर्वोक्ताःसर्वसिद्धिदाः सुखतोमोक्षदाह्येतेह्यतः
सर्वसिद्धिदाः शीघ्रसिद्धिकराश्चैवशिवासाधारणास्ततः १६ शिवेनसदृशोदेवोयथाविमानविद्यते तथैवेभिःसमाधर्मानविद्यंतेश्रुतौस्मृ
तौ शिवज्ञानसमंज्ञानंयथानास्तिद्विजर्षभाः तथैवे०१८ वेदमानंसमंमानंयथानास्तिद्विजर्षभाः तथैवे० १९ प्रमितेरेवसमोमर्त्यो
यथानास्तिद्विजर्षभाः तथैवे० २० मेरुणापर्वतस्तुल्योयथालोकेनविद्यते तथैवे० २१ अन्नपानसमंकिंचिन्नहिदेहस्थितोयथा तथै
वे० २२ यथाभागीरथीतुल्यानदीलोकेनविद्यतेतथैवे० २३ शिवस्थानसमंस्थानंयथालोकेनविद्यते तथैवे० २४ सर्वसिद्धिकरामुनिपुंगवाए
तएवसदैवनचापरैश्चोदितेपुनसंशयकारणंकेवलंह्यपर्येवमयोदितं २५ इतिश्रीस्कंदपुराणेसूतसंहितायांयज्ञवैभवखंडेचत्वारिंशोध्यायः
सूतउ० अथातंसंप्रवक्ष्यामिपातकानिसमासतः श्रृणुतश्रद्धयासार्द्धंपरिहारायसुव्रताः पातकानिसमासेनदशप्रोक्तानिसूरिभिः तारत
म्यक्रमेणैवतेषामस्त्येवलाघवं २ प्रथमंपातकंप्रोक्तंमहापातकसंज्ञितं द्वितीयमतिपातारव्यंततःप्रासंगिकाभिधं चतुर्थंपातकंप्रोक्तं
पंचमंचोपपातकं जातिभ्रंशकरंषष्ठंसंकीर्णकरणंततः ४ अपात्रीकरणंपश्चान्नवमंतुमलावहं प्रकीर्णकसमाख्यंतुदशमंपातकंद्वि

स्क·प·भे· जाः प्रतिषिद्धसुरापानं ब्रह्महत्या तथैव च ब्राह्मणानां सुवर्णस्य हरणं मुनिपुंगवाः ६ तन्निर्गमनं चैव संयोगस्तैः सह द्विजाः महापातकान्या
हुर्मुनयः सूक्ष्मदर्शिनः असाक्षान्मातृगमनं स्वपुत्रीगमनं तथा स्नुषायागमनं तद्वद्भगिनीगमनं तथा ८ शिवस्य मूर्त्तिचलनं विष्णोश्च ब्रह्म
६६ णस्तथा अतिपातकमित्याहुर्मुनयो वेदवित्तमाः राजन्यवैश्ययोर्हिंसा यज्ञसंबंधिनस्तथा रजस्वलायागर्भिण्या आत्रेय्याश्च वधस्तथा १० अ
विज्ञातस्य गर्भस्य शरणागतदेहिनः कौटसाक्ष्यं सुहृद्धिंसा ब्राह्मणस्य तपोधनाः पृथिवीहरणं तद्वन्मित्रस्य तथैव च मातामहस्य विप्रेंद्रा
मातुलस्य नृपस्य च १२ भार्याभिगमनं तद्वत्प्राहुः मांसकाभिधं स्वमातुः सोदरायाश्च गमनं तद्वदेव तु मातृष्वसुर्मातुलस्य दुहितुर्गम
नं तथा मातुलानीस्नुषाश्वश्रूगमनं च तथैव च १४ त्रिपुंड्रधारणाभावो भस्मत्यानुद्धूलनं तथा पुंड्रान्तरस्य विप्रेंद्रा धारणं तद्वदेव तु पाशां
श्री कुशगदादंडखड्गचक्रादिभिर्द्विजाः अंकनं विग्रहे संतः पातकं प्राहुरास्तिकाः १६ मातापित्रोः स्वसुश्चैव गमनं श्रोत्रियस्य च ऋत्विगध्या ६६
पकस्याथ मित्रस्य च तथैव च भार्याभिगमनं तद्वत्प्रवदन्त्यास्तिकाः स्वगोत्रायास्तथा विप्रकन्यकायास्तथैव च १८ चतुर्थाश्रमनि
ष्ठाया निक्षिप्तायास्तथैव च पारदंडेषु च निष्ठानां संबंधो द्विजपुंगवाः स्वस्यैव शरणं प्राप्तस्त्रियागमनमेव च दुर्गादिश्यादिदेवानां चालनं

४९५

विग्रहस्य च २० सुरव्योपपातकं प्राहुर्महांतो वेदवित्तमाः असत्यभाषणं तद्वत्स्वैश्वर्यं राजगामि च गुरोश्चालीकनिर्बंधो वेदनिंदा तथैव च
अधीतायाः श्रुतेस्त्यागः स्वाग्नेस्त्यागस्तथैव च २२ पितृमातृसुतस्त्यागः स्वभार्यात्याग एव च अदंभभक्षणं तद्वत्परार्थस्य ग्रहणं तथा परदा
रनिषेवा च तथा याज्यस्याजनं भृतकाध्यापनं तद्वद्भृताध्ययनमेव च २४ सर्वाकराधिकारं च महायंत्रप्रवर्तनं द्रुमगुल्मलतादीनां हिं
सया जीवनं तथा अभिचारक्रियां तद्वत्स्वस्यैव पचनं तथा अनाहिताग्निना तद्वद्ब्रह्मचर्यविवर्जनं २६ यज्ञस्याकरणं तद्वत्त्रातुसाद
नं तथा असत्शास्त्राभिगमनं नास्तिक्यं च कुशीलता मद्यपस्त्रीनिषेवा च प्राहुर्गोणोपपातकं विप्राणां रोगकारित्वमघ्रेयघ्रातिरेव च २८
सुराघ्रातिं तथाजेस्त्र्यं पशौ पुंसि च मैथुनं जातिभ्रंशकरं प्राहुर्धार्मिका वेदपारगाः ग्राम्यारण्यपशूनां तु हिंसनं मुनिपुंगवाः संकीर्णकरणं
प्राहुः सर्वशास्त्रविशारदाः ३० निंदितेभ्यो धनादानमव्यवदानं तथैव च कुसीदजीवनं चैव वाणिज्यमनृतोक्तिना शूद्रस्य याजनं प्राहुरपा
त्रीकरणात्मकं पक्षिणां घातनं चापि जलस्थलनिवासिनां ३२ मद्यस्पृष्टस्य भुक्तिं च प्राहुः संतो मलावहं अनुक्तानि समस्तानि प्रकीर्णकसमा
ख्यं ३३ प्रवदंति हि विद्वांसः सत्यधर्मपरायणाः अदंड्यदंडनं चैव युद्धे भीत्यापलायनं ३४ क्षत्रियस्य विशेषेण महापातकमुच्यते वंचनं

मतंगार्क

सं॰ य॰ भे ततुल्यानंमहापापंविशेषभवेत् मांसस्यविक्रयंचैवसुराविक्रयणंतथा ब्राह्मणीगमनंचापिपयःपानंतुकापिलं ३६ महापापंमयाप्रोक्तं
शूद्राणांचविशेषतः संपापंविशेषभवेत् मांसस्यविक्रयंचैवसुराविक्रयणंतथा ब्राह्मणीगमनंचापिपयःपानंतुकापिलं ३७ संकरणंद्विज
५७ द्वैधीमहापातकमुच्यते पुरुषाणांतथास्त्रीणांसमानंपातकंस्मृतं नीचाभिगमंपातनंभ्रूणहिंसनं ३८ भर्तुःशिष्यस्यगमनंमत्वाभ
र्तुर्गुरोरपि विशेषेणस्त्रियाःसंतःपातकंप्रवदंतिहि बहुनात्रकिमुक्तेनश्रुतिस्मृत्युदितंविना यत्किंचिदपिकुर्वाणाःपातकीस्याचसंशयः
४० वेदसारतरःकथितस्तवःशोकमोहसमुद्रनिवारकः पातकानिविहायमतिर्देवदेवमानिशंशरणंव्रजेत् ४२ इतिस्तुतसं
यज्ञ॰ एकचत्वारिंशः स्तुत॰ अथश्रितरहस्यंवःप्रवक्ष्यामिसमासतः श्रद्धयासहितायूयंश्रृणुतब्रह्मवित्तमाः १ वेदांतवाक्यजंज्ञानं कर्तृत्व
ब्रह्मात्मैकत्वगोचरं बुद्धिपूर्वकृतंपापंकृत्स्नंदहतिवह्निवत् २ कार्त्तारकर्मधियाचिरवलवेरोः ज्ञानेनानैवकर्तत्वैस्यतुसाक्षिणः कायिकंवा ६७
चिकंचैवमानसंकर्मनान्यथा तथासतिकथंकर्मभवेत्तत्साक्षिरूपिण ४ घटवद्दृश्यभूतस्यशरीरस्यतुसाक्षिणं चिद्रूपमात्मनाप
श्यन्कथंवध्येनकर्मणा ५ इंद्रियाणांसमस्तानांसदासाक्षिस्वरूपिणं चिद्रूपमा॰ ६ प्राणपानादिभिन्नदेहविभक्तस्यतुसाक्षिणं चि

दव हं

५०

द्रूपमा॰ ७ संकल्पलक्षणस्यास्यमनसःसाक्षिरूपिणं चिद्रूप॰ ८ निश्चयात्मिकविज्ञानसाक्षिणंब्रह्मवित्तमाः चिद्रूप॰ ९ अहंकार
स्यदुःखादिविशिष्टस्यतुसाक्षिणं चिद्रूप॰ १० चेतनालक्षणस्यास्यचित्तसंज्ञस्यसाक्षिणं चिद्रूप॰ ११ देहेंद्रियादिसंघातसाक्षिणंनि
रुपद्रवं चिद्रूप॰ १२ जाग्रत्स्वप्नसुषुप्त्याख्यावस्थासाक्षिणमव्ययं चिद्रूप॰ १३ सच्चिदानंदसंपूर्णलक्षणंनमसःपरं यःस्वात्मानंसदापश्य
न्कथंवध्येतकर्मणा १४ अविक्रियमसंगंचपरिशुद्धंसदोदितं आत्मानमात्मनापश्यन्कथंवध्येतकर्मणा १५ सदाकाशादिभूतानांशब्दादी
नांचसाक्षिणं आत्मान॰ १६ अनियोज्यमकर्तारमभोक्तारदेवमव्ययं आत्मान॰ १७ स्वयंभातंप्रमातीतंप्रमाणानांचसाक्षिणं आत्मान॰
१८ आविर्भावतिरोभावसंकोचरहितंसदा आत्मान॰ १९ सर्वसाक्षिणमात्मानंसर्वदानंतुवस्तुतः आत्मानमीश्वरंप॰ २० स्वस्मिन्नध्य
स्तरूपस्यप्रपंचस्यतुसाक्षिणं आत्मान॰ २१ निर्लेपंनिर्मलंसूक्ष्मंनिरस्तसकलक्रियं आत्मान॰ २२ भूमानंदंसुखंसौख्यस्वरूपंभोग
वर्जितं आत्मान॰ २३ प्रेरकत्वादिनिर्मुक्तंप्रियाप्रियविवर्जितं आ॰ २४ नेतिनेतीतिवेदांतैर्निरस्तस्वविलक्षणं आत्मान॰ २५ अ
नन्यत्वकृतस्वमस्थूलमदीर्घंसत्यचिद्घनं आत्मान॰ २६ अज्ञानजन्यकर्त्रादिकारकोत्पन्नकर्मणा श्रुत्युत्थात्मविज्ञानप्रदीपोवध्य

स्र॰य॰भ तेकथं अज्ञानांधतमोरूपंकर्मधर्मादिलक्षणं स्वप्रकाशकमात्मानंनैवसंस्प्रष्टुमर्हति २८ आदित्यंशर्वरीयद्वत्तमोनस्पृशतिस्वतः चित्स
काश्मरादित्यंतमोरूपक्रियातथा २९ तमोरूपोरविंराहुःसमाश्रित्यप्रनीयते यत्प्रकाशनसंबंधस्तयोर्नास्तितथापितु ३० तद्वदज्ञा
६८ नतत्कार्यंसमाश्रित्यस्वयंप्रभं तद्भासाभातिसंबंधस्तयोर्नास्तितथापितु कर्मसंबंधमज्ञानादात्मनोमन्यतेभ्रमात् विद्वांस्तत्र
मस्तस्मात्कर्मणानास्तिसंगतिः ३२ तस्माद्देहादिसंघातेहंमतिंकुरुतेतुयः तस्यैवकर्मणायोगःसंभ्रांतस्यसदाबुधा यस्तुविज्ञान
संपन्नःकर्मणातस्यसंगतिः नैवसत्यंमयाप्रोक्तंनास्तिसंदेहकारणं ३४ तस्माद्ब्रह्मात्मविज्ञानंशाब्दंदेशिकपूर्वकं लंनिर्दहति
+कं बुद्धिपूर्वकृतंपा+ क्षणात् ३५ अपरोक्षात्मविज्ञानंशाब्दंदेशिकपूर्वकं संसारकारणाज्ञानतमसश्चंडभास्करः ३६ महापातकपूर्वा
णांपातकानांमुनीश्वराः रहस्यानांप्रसिद्धानांप्रायश्चित्तंहिवेदनं अपरोक्षात्मविज्ञानवतांनैवास्तिपातकं प्रायश्चित्तपरिज्ञानंपरो
क्षज्ञानिनांतरणं ३९ तेषांनिष्ठामविज्ञायमनुष्याश्चमन्दचक्षुषा विलोक्यपातकैर्युक्तान्मन्वतेसततमानपि यथाब्रह्मात्मविज्ञानंपात
कानांमुनीश्वराः प्रायश्चित्तंमयाप्रोक्तंतथैवब्रह्मभावना ४० श्रुत्वाचार्यप्रसादेनसर्वंब्रह्मेतिभावयन् मुच्यतेपातकैःसर्वैर्घटिका ६८

मात्रतोनरः दिनार्द्धसकलंब्रह्मभावयन्गुरुपूर्वकं बुद्धिपूर्वकृतैःसर्वैःपातकैर्मुच्यतेनरः ४२ विग्रहंपरतत्त्वस्यशिवेत्रंसांबमद्भुतं मुहूर्तंचिंत
येन्मर्त्योमुच्यतेसर्वपातकैः स्वस्वरूपानुसंधानात्त्वत्यंतंसर्वकारणं मुहूर्तंचिंतयेन्मर्त्योमुच्यतेसर्वपातकैः ४४ नृत्यमानंमहादेवं
सांबमुत्तिंधरंतुवा दिनार्द्धंचिंतयन्पापात्प्रसिद्धान्मुच्यतेखिलात् त्रिमूर्तीनांतुरुद्रस्यविग्रहंचिंतयन्दिनं महापातकसंघैश्चमुच्य
तेपातकांनरैः ४६ दिनत्रयमभिध्यायन्गुरुदर्शनिमितंदिनः मुच्यतेपातकैःसर्वैःप्रसिद्धैर्नात्रसंशयः विष्णोश्चविग्रहंध्यायन्मर्त्यः
शुद्धंदिनत्रयं महापातकसंघैश्चमुच्यतेपातकांनरैः ४८ सप्तरात्रंमहाविष्णोर्विग्रहंचिंतयन्नरः मुच्यतेपातकैःसर्वैःप्रसिद्धैर्नात्रसंशयः
ब्रह्मणोविग्रहंशुद्धंसप्तरात्रंविचिंतयन् महापातकसंघैश्चमुच्यतेपातकांनरैः ५० मासमात्रमभिध्यायन्ब्रह्मणोविग्रहंपरं मुच्यतेपातकैः
सर्वैःप्रसिद्धैर्नात्रसंशयः जपित्वादशसाहस्रंमंत्रंचैतन्यवाचकं महापातकसंघैश्चमुच्यतेपातकांनरैः ५२ पातकानांसमस्तानां लाघवापे
क्षयाक्रमात् जपेपिलाघवंकार्यंचिन्मंत्रस्यक्रमेणतु पदंद्वादशसाहस्रंजपित्वामानकाश्रयांस महापातकसंघैश्चमुच्यतेपातकांनरैः ५४
मानृकानांसमस्तानां लाघवापेक्षयाक्रमात् जपेपिलाघवंकार्यंपदारव्यस्यमनोरपि जपित्वालक्षमेकंतुप्रणवंब्रह्मवाचकं महापातकसं

स॰प॰भ॰ पैश्चमुच्यतेपातकांतरैः ५६ कंठमात्रोदकेलक्षंजपित्वाहंसमंत्रकं महापा॰ ५७ नाभिमात्रोदकेलक्षंजपित्वातुषडक्षरं महा॰ ५८ कंठमा
त्रोदकेलक्षंजपित्वाव्याहृतित्रयं महा॰ ५९ वाग्यतस्तजपेल्लक्षंसावित्रीमादरेणतु महापा॰ ६० सव्याहृतीःसप्रणवाःप्राणायामास्तुषो
५८ डश अपिभ्रूणहणंमासात्पुनंत्यहरहःकृताः गवांगोष्ठेतुभिक्षाशीपावमानीर्जपन्पुरा वत्सरात्पातकैःसर्वैर्मुच्यतेनहिसंशयः ६२
दशवारंजपेत्त्रिःसंपावमानीर्महामतिः गवानुगमनंमोक्तंगोग्रासेवनचान्यथा उपवासत्रयंकृत्वाकंठमात्रोदकेस्थितः मुच्यतेपातकैः
सर्वैस्त्रिर्जपित्वाघमर्षणं ६४ गायत्र्यष्टसहस्रंतुजपित्वातुदिनेदिने सप्ताहात्सर्वपापेभ्योमुच्यतेमैक्ष्यभुङ्नरः उपवासत्रयंकृत्वाग्निंश सत्वा
हुताहुतीः कूष्मांडैर्जुहुयात्सर्वपापेभ्योमुच्यतेनरः ६६ जपित्वाशिवसंकल्पमस्यवामीयमेवच सुवर्णस्तेयदोषेणमुच्यतेहिनसंश
यः जपित्वापौरुषंसूक्तंहविष्यांतीयमेवच गुरुतल्पगदोषेणमुच्यतेनहिसंशयः ६८ मुपवासत्रयंकुर्याद्धोमश्चाज्येनधीमता पौरु
षेणचसूक्तेनसर्वपापनिवृत्तये पवित्रमघमंतोयेस्थित्वाजप्त्वादशावरं त्रिरात्रोपोषितस्तेयान्मुच्यतेनहिसंशयः ७० उपवास ५८
त्रयंकृत्वाभस्मोद्धूलितविग्रहः रुद्राध्यायीविमुच्येतसुरापानान्नसंशयः द्रुपदानामगायत्रीवेदेवाजसनेयके पंचजप्त्वाजलेमग्नो

मुच्यतेसर्वपातकैः ७२ अवेत्यचंजपेदब्दंयत्किंचेदमितीतिवा महापातकसंघैश्चमुच्यतेहिदशावरैः जपेन्नरत्सममंदीयमभ्यस्यसु
भक्षले नद्दोषेणविमुच्येतमानवस्तुनसंशयः ७४ इंद्रमित्येतदेनस्वीजपेदब्दार्धमादरात् भैक्ष्याहारोविमुच्येतपातकैश्चमहन्नरः प्रा
णायामशतंकुर्वन्सर्वपापैःप्रमुच्यते प्राणायामसहस्रेस्तुमुच्यतेभववंधनात् ७६ सव्याहृतीसप्रणवांगायत्रींशिरसासह त्रिःपठे
त्तुजलेमग्नःसर्वपापैःप्रमुच्यते तिलहोमसहस्रेणव्याहृत्याप्रणवेनवा महापातकसंघैश्चमुच्यतेनहिसंशयः ७८ महादेवेतियोरुद्या
त्स्नानकृत्स्यायनित्यशः जन्मांतरसहस्रेषुकृतंपापंविनश्यति ७९ व्रात्येमुहूर्तउत्थायशुचिर्भूत्वासमाहितः शिवेतिकीर्तयन्सर्वैःपातकैस्तु
विमुच्यते ८० पुण्याभागीरथीलोकेपुण्यावाराणसीपुरी पुण्यावेदाःशिवःपुण्यःपुण्यंतिर्यक्त्रिपुंड्रकं पंचपुण्यानियोनित्यंस्नानकृत्स्या
त्प्रकीर्तयेत् सर्वपापविनिर्मुक्तःसयातिपरमांगतिं ८२ विषुवायनकालेषुग्रहणेचंद्रसूर्ययोः शिवशब्दजपंकुर्वन्मुच्यतेसर्वपातकैः
व्यतीपातेतिलंधान्यंब्राह्मणायददातियः सर्वपापाद्विनिर्मुक्तःसयातिपरमांगतिं ८४ पंचदश्यांसमुद्दिश्यमहादेवंसितेनरे ब्राह्मणं
भोजयित्वातुमुच्यतेसर्वपातकैः यस्तुकृष्णचतुर्दश्यांशिवमुद्दिश्यभोजयेत् ब्राह्मणंपातकैःसर्वैर्मुच्यतेनहिसंशयः ८६ कृष्णाष्ट
म्यांद्विजश्रेष्ठंभोजयेच्छंकरात्मना सर्वपापविनिर्मुक्तःशंकरंयातिमानवः अर्कवारेतुसावित्रींजपित्वाष्टोत्तरंशतं भोजयित्वाद्विजश्रेष्ठंसु

स्क·प·मे च्यतेसर्वपातकैः ८८ आर्द्रायांरुद्रमुद्दिश्यभोजयित्वाद्विजोत्तमं सर्वपापविनिर्मुक्तःसम्यग्ज्ञानमवाप्नुयात् महामघेमहादेवमभि
षिच्यघृतेनतु ब्रह्महत्यादिभिःपापैर्मुच्यतेहिमहत्तरैः ९० माघेमासिचतुर्दश्यांहस्तपद्मेमहेश्वरं बिल्वपत्रैःसंपूज्यमुच्यतेसर्व
७० पातकैः उत्तरेफाल्गुनेमासिपलाशकुसुमेनच महेदेवंसमाराध्यमुच्यतेसर्वपातकैः ९२ वसंतकालेचित्रायांसुगंधकुसुमैर्हरं
पूज्यमासंगिकाद्दोषैर्मुच्यतेपातकैर्नरः सह्यगंगाजलेस्नात्वावाराणस्यांमहेश्वरं दृष्ट्वाविश्वेश्वराख्यंतुमुच्यतेसर्वपातकैःगोदाव
र्यांसह्यस्नानात्सिंहयुक्तेबृहस्पतौ ब्रह्महत्यादिभिःपापैर्मुच्यतेनात्रसंशयः माघमासेमघर्क्षेतुसुवर्णमुखरीजले स्नात्वादत्वामहा
पापैर्मुच्यतेनात्रसंशयः ९६ स्नात्वातुशिवगंगायांपर्वयुक्तेऽर्कवारके महापातकसंघैश्चमुच्यतेनात्रसंशयः सोमवारेत्वमावास्यांसत्वन्याम
र्कवारके सह्यस्नानेनवैसंशयः [illegible] वेर्यांमुच्यतेसर्वपातकैः ९८ स्नात्वात्वाहस्नात्तुविमायगंधमादनपर्वते दृष्ट्वारामेश्वरंदेवंमुच्यतेस
र्वपातकैः अन्नपानादिभिर्भक्त्यांब्रह्मनिष्ठंसमर्चयेत् सर्वपापविनिर्मुक्तःशंकरंयातिमानवः १०० श्रीमदभ्रसभामध्येनृत्यंतंदेवना ७०
यकं दृष्ट्वादिनेदिनेपापैर्मुच्यतेदशभिर्दिनैः सन्यासश्चापिपापानांप्रायश्चित्तंप्रकीर्तितं पापिष्ठानामयोग्यानांयोग्यानांमुक्तिसाधनं
२ चतुर्विधस्तुसन्यासोवृत्तिभेदेननसत्तमाः एकःकुटीचकःप्रोक्तस्तथान्यश्चबहूदकः हंसश्चान्यस्तथैवान्यःपरहंसोमास्मृयः कु
श्रा धा स

टीचकादपिश्रेष्ठोभिक्षुकश्चबहूदकः हंसोबहूदकाच्छ्रेष्ठःपरहंसस्ततःपरः परहंसादपिश्रेष्ठआश्रमोनास्तिकश्चन ५ कुटीचकाश्च
हंसाश्चतथैवचबहूदकाः नित्यानुष्ठानतःशुद्धभवंतिद्विजपुंगवाः चित्तशुद्ध्यामुमुक्षुत्वंक्रमात्तेषांविजायते मुमुक्षुत्वंतुसंजातेभवे
युःपरहंसकाः ६ परहंसस्तुनित्याख्यंकर्मत्यक्त्वाविधानतः शमादिसाधनोभूत्वावेदांतज्ञानमभ्यसेत् कुटीचकाख्यःसन्यासीतथै
वचबहूदकः गोवालरज्जुसंबद्धत्रिदंडंचकमंडलुं ८ पात्रंजलपवित्रंचतथाकाषायमेवच शिखांयज्ञोपवीतंचैवधारयेत् पात्रंज चपवित्रं
लपवित्रंचपवित्रंचतथैवच कुंडिकांचोपवीतंचहंसस्यापिसमंबुधाः १० हंसःपरमहंसश्चसत्वंसौम्यमप्रणं एकंतुवेणवंदंडंकाषा
यंचैवधारयेत् परहंसस्यहंसस्यसमानंमौंज्यमास्तिकाः स्नानंशौचंशिवध्यानंशिवार्चाभस्मगुंठनं १२ त्रिपुंड्रधारणंशांतिर्दांतिः
क्रोधादिवर्जनं चातुर्मास्यंचसर्वेषांसमानंपरिकीर्तितं पापिष्ठःकर्मसन्यासंहत्वास्त्रोक्तवर्त्मना प्राणत्यागंपुनःकुर्यात्पापानांच श्रा
विशुद्धये १४ योगीसन्यासमापन्नःप्राणत्यागंकदाचन नकुर्यान्मोहतोवापि ज्ञानमेवसदाभ्यसेत् संन्यासेनसमंनास्तिप्रायश्चि
त्तं[illegible]पापानांचविशुद्धये १५ द्विजर्षभाः ततःपापनिवृत्यर्थंसन्यसेत्सुरितापतः १६ रहस्यानांचसन्यासःप्रायश्चित्तंतथोत्तमं प्र
सिद्धानांचपापानांप्रायश्चित्तमनंतरं नयाँशिवज्ञानंशिवध्यानंशिवशब्दजपस्तथा अग्निरित्यादिभिर्मंत्रैर्भस्मनाचावगुंठनं १८

स्.य.भै रुद्राक्षधारणंभक्त्यात्रिपुंड्रस्यच धारणं सन्ध्यासर्वेषपापानां प्रायश्चित्तंमहत्तरं १९ सर्ववेदरहस्यमिदंमयाकेवलंकृपयैवसमीरितं
माहकारुणिकः सकलार्थविद्देशिकप्रवरप्रवरस्कन्मे १०२० इतिश्रीस्कंदपुराणेसूतसंहितायांयज्ञवैभवखंडेद्विचत्वारिंशोध्यायः
७१ ४२ सूतउ० भूयोपिपापशुद्ध्यर्थमुपायंप्रवदाम्यहं महत्साश्रद्धयायुक्ताःशृणुतब्रह्मवित्तमाः १ निर्मितानिशिवेनैवभूमौस्था
नानिदेहिनां सर्वपापविशुद्ध्यर्थंतानिवक्ष्याम्यशेषतः २ अमरेशमितिप्रोक्तंस्थानंसर्वार्थसाधकं ॐकारसंज्ञस्तत्रेशश्चंडि
कारव्यामहेश्वरी ३ तत्रदेवंचदेवींचपूजयेद्दयापरयासह तत्रत्यात्मातुसंपूज्यमुच्यतेसर्वपातकैः ४ प्रभासाख्यंमहास्थानं
मस्तिभूमितलेद्विजाः सोमनाथःशिवस्तत्रशिवासापुष्करेक्षिणी ५ तत्रदे० तत्रत्या० ६ नैमिषाख्यंमहास्थानमस्तितत्रमहेश्व
रः देवदेवाभिधःप्राज्ञादेवीसालिंगधारिणी ७ तत्रदे० तत्रत्या० ८ पुष्कराख्यंमहास्थानमन्यदस्तिमहीतले रजोगंधिर्महादेवः पु ७९
रुहूतामहेश्वरी ९ तत्रदे० तत्रत्या० १० आषाढिर्नामविप्रेंद्राः स्थानमस्तिमहीतले आषाढीशोहरस्तत्ररतिःसापरमेश्वरी ११ त
त्रदे० तत्रत्या० १२ चंडमुंडीसमाख्यंतुस्थानमन्यन्महत्तरं दंडीतत्रमहादेवोदंडिनीपरमेश्वरी १३ तत्रदे० तत्रत्या० १४ भारभूत
मितिख्यातमस्तिस्थानंमहत्तरं भारभूतिर्महादेवोभूतिसापरमेश्वरी १५ तत्रदे० तत्रत्या० १६ नाकुलंनामसंप्रोक्तमस्तिस्थानंम

७१३

हीतले नकुलीशोहरस्तत्रशिवासैवप्रकीर्तिता १७ तत्र० तत्रत्या० १८ हरिश्चंद्रसमाख्यंचस्थानमस्तिमहीतले हराख्यःशंकरस्तत्रचंडिकाख्या
महेश्वरी १९ तत्रदे० तत्रता० २० श्रीपर्वतसमाख्यंचस्थानमस्तिमहत्तरं मायावीशंकरीतत्रशंकरस्त्रिपुरांतकः २१ तत्रदे० तत्रत्या० २२
जल्पेश्वरमितिख्यातंस्थानमस्तिमहत्तरं त्रिशूलीशंकरीतत्रत्रिशूलीपरमेश्वरः २३ तत्रदे० तत्रत्या० २४ आम्रातकेश्वरंनामस्थानमन्यत्सुशो
भनं तत्रसूक्ष्माभिधोरुद्रःसूक्ष्माख्यापरमेश्वरी २५ तत्रदे० तत्रत्या० २६ महाकालइतिप्रोक्तमन्यदस्तिमहत्तरं महाकालोहरस्तत्रशंकरीसा
ख्यं महेश्वरी २७ तत्रदे० तत्रत्या० २८ मध्यमांमहास्थानमस्तिमायाविघातकं तत्रशर्वःशिवःसासाच्छर्वाणीपरमे[illegible]परमेश्वरी २९ तत्रदे० तत्रत्या० ३०
केदाराख्यंमहास्थानमस्तिभूमितलेशुभं ईशानाख्योहरस्तत्रदेवीसामार्गदायिनी ३१ तत्रदे० तत्रत्या० ३२ भैरवाख्यंमहास्थानंभवरोगस्यभेषजं
भैरवः शंकरस्तत्रभैरवीपरमेश्वरी ३३ तत्रदे० तत्रत्या० ३४ गयानाममहाक्षेत्रमस्तिभूमितलेशुभं मंगलाख्यामहादेवीशंकरःप्रपितामहः ३५
तत्रत्या० ३६ कुरुक्षेत्रमितिख्यातमस्तिक्षेत्रंमहीतले शिवस्थाणुप्रियातत्रशिवःस्थाणुसमाह्वयः ३७ तत्रदे० तत्रत्या० ३८ लाकुलाख्यंमहास्था
नमस्तिसर्वार्थसाधकंस्वयंभूस्तत्रदेवेशः शिवास्वायंभुवीमता ३९ तत्रदे० तत्रत्या० ४० अन्यत्कनखलंनामस्थानमस्तिमहत्तरं उग्रस्तत्रम

भ्रु

स्कं·पं हादेवःशिवोग्यासुनिर्गवाः ४१ तत्रदे० तत्रत्वा० ४२ विमलेश्वरमित्युक्तमन्यदस्तिमहीतले विश्वस्तत्रमहादेवोविश्वेशापरमेश्वरी ४३ तत्रदे·
तत्रत्वा· ४४ अट्टहासमितिप्रोक्तमन्यदस्तिमहत्तरं महानंदोहरस्तत्रमहानंदामहेश्वरी ४५ तत्रदे· तत्रत्वा· ४६ महेंद्रमितिविख्यातमन्यदस्तिमही
७२ तलेहरोमहांतकस्तत्रशिवामानुमहांतका ४७ तत्रदे० तत्रत्वा ४८ भीमंनाममहास्थानमस्तिभीतिविनाशनं तत्रभीमेश्वरोदेवःशिवाभीमेश्वराभि
धा ४९ तत्रदे· तत्रत्वा·५० वस्त्रापथमितिख्यातमस्तिस्थानंमहत्तरं भवस्तत्रशिवःसाक्षाद्भवानीपरमेश्वरी ५१ तत्रदे· तत्रत्वा० अर्द्धको
टिरितिख्यातमन्यदस्तिसुशोभनं देवस्तत्रमहायोगीरुद्राणीचमहेश्वरी ५३ तत्रत्वा· ५४ अविमुक्तमितिख्यातमन्यदस्तिसुशोभनं महादे
वाभिधःशंभुर्विशालाक्षीशिवापरा ५५ तत्रदे० तत्रत्वा० ५६ महालयमितिख्यातमन्यदस्तिसुशोभनं रुद्रस्तत्रहरःसाक्षान्महाभागाभिधाशिवा ५७
तत्रदे० तत्रत्वा० ५८ गोकर्णाख्यंमहास्थानमस्तिभूमितलेशुभं महाबलोहरस्तत्रशिवासाभद्रकर्णिका ५९ तत्रदे० तत्रत्वा· ६० भद्रकर्णम ७२
हास्थानमस्तिभद्रकरंपरं भद्रातत्रमहादेवीमहादेवःशिवाभिधः ६१ तत्रदे० तत्रत्वा० ६२ सुवर्णाख्यमितिप्रोक्तंमहत्तरं शिवस्तत्रसहस्रा
क्षस्तत्रलाक्षीशिवापरा ६३ तत्रदे० तत्रत्वा० ६४ स्थाणुसंज्ञंमहास्थानमस्तिभूमितलेशुभं शिवस्थाणवीश्वरस्तत्रशिवास्थाणवीश्वराभिधा
न्यदस्तिम

६५ तत्रदे० तत्रत्वा० ६६ कमलालयमित्युक्तमस्तिस्थानंमहत्तरं कमलाख्योहरस्तत्रकमलाख्यामहेश्वरी ६७ तत्रदे० तत्रत्वा० ६८ छागंडल
मितिप्रोक्तमन्यदस्तिमहत्तरं कपर्दीतत्रदेवेशःप्रचंडाख्यामहेश्वरी ६९ तत्रदे· तत्रत्वा० ७० [illegible]कुरंडमितिविख्यातमन्यदस्तिसुशोभनं ऊर्ध्वरे
ताहरस्तत्रत्रिसंध्याख्याशिवापरा ७१ तत्रदे० तत्रत्वा० ७२ माकोटाख्यंमहास्थानमन्यदस्तिमहीतले महोत्कटोहरस्तत्रशिवासामुकुटेश्वरी ७३
तत्रदे· तत्रत्वा० ७४ मंडलेश्वरसंज्ञंचस्थानमस्तिमहत्तरं श्रीकंठस्तत्रदेवेशःशंकरीशंडकीमता ७५ तत्रदे० तत्रत्वा· ७६ कालंजरमितिख्यातमस्ति
स्थानंमहीतले नीलकंठोहरस्तत्रशिवाकालीप्रकीर्तिता ७७ तत्रदे० तत्रत्वा· ७८ शंकुकर्णंमहास्थानंसर्वदोषनिवारणं महातेजाहरस्तत्रध्वनिः
सापरमेश्वरी ७९ तत्रदे· तत्रत्वा· ८० स्थूलेश्वरसमाख्यंतुस्थानमस्तिमहत्तरं स्थूलस्तत्रमहादेवःस्थूलासापरमेश्वरी ८१ तत्रदे· तत्रत्वा०श्री
मद्व्याघ्रपुराख्यंतुस्थानमस्तिमहीतले हरःसभापतिस्तत्रशिवाद्यसभापती ८३ तत्रदे·तत्रत्वा· ८४ यत्रनृत्यतिदेवेशःस्वात्मानंदप्रमोदतः
यत्रनृत्यंतमीशानमंबिकापरिपश्यति ८५ यत्रभक्तिमतान्नृणांप्रसीदतिमहेश्वरः यत्रनृत्यंतमीशानमंबिकापरिपश्यति ८६ स्थानानामपिसर्वेषा
मेतत्स्थानंमहत्तरं अत्रजप्तंहुतंदत्तमसंख्येयगुणाधिकं ८७ अस्मिन्नेवमहास्थानेशिवगंगाभिधंपरं तटाकमस्तितत्तीरेदक्षिणेनृत्यतीश्वरः

स्कं.पु.भै ८८ तस्मिन्नेवतटाकेयानिस्नात्वाद्विजानराः दृष्ट्वारामसभानाथंपरमश्रद्धयासह ८९ अष्टोत्तरसहस्रंतुमंत्रमाद्यंषडक्षरं जपंतिमौनिसंयुक्ताः प्रसि
७३ द्धैरपिमुच्यते ९० आदित्येमेषसंयुक्तेपर्वण्यान्यदिनेतथा नटाकेस्मिन्नरःस्नात्वामसिद्धैरपिमुच्यते ९१ आदित्येवृषभंप्राप्तेतटाकेस्मिन्नृपो
त्तमे स्नात्वादत्त्वामहापापैःप्रसिद्धैरपिमुच्यते ९२ आदित्येमिथुनंप्राप्तेतटाकेस्मिन्महत्तरे कृत्वाष्टम्यांनरःस्नात्वामसिद्धैरपिमुच्यते ९३ आषाढे
तुचतुर्दश्यांकृष्णपक्षेसमाहितः नटाकेस्मिन्नरःस्नात्वामसिद्धैरपिमुच्यते ९४ श्रावण्यांपौर्णमास्यांतुतटाकेस्मिन्समाहितःस्नात्वातुपातकैःसर्वैःप्र
सिद्धैरपिमुच्यते कन्यकायांस्थितेचार्केजन्मर्क्षेचार्कवारके नरःस्नात्वातटाकेस्मिन् ९६ आदित्येचतुलांप्राप्तेभगनक्षत्रकेनरः प्रातःस्नात्वातटा ९७
आदित्येवृश्चिकंप्राप्तेपावकस्यदिनेनरः प्रातःस्नात्वा ९८ आदित्येचापसंयुक्तेरौद्रनक्षत्रकेनरः स्नानंकृत्वातटा ९९ आदित्येमकरंप्राप्तेपुष्यर्क्षे
चार्कवारके नरःस्ना. १०० माघमासिमघर्क्षेतुतटाकेस्मिन्महत्तरे स्नानंकृत्वामहापापैःप्रसि. १ फाल्गुनेचोत्तरेमर्त्यस्तटाकेस्मिन्महत्तरे स्नानंकृ ७३
त्वा. २ अनेनसदृशंस्थानंनास्तिलोकत्रयेष्वपि अत्रैववर्तमानस्तुमुच्यतेभवबंधनात् अत्रब्रह्मविदांनित्यमत्रैवयेयंदशानिषः सर्वपापविनिर्मुक्तः
स्थानिपरमांगतिं ४ गृहंवामठिकांवापिमदत्त्वात्रैवयोगिने सर्वपापविनिर्मुक्तःशंकरंयातिमानवः स्थानमेतत्सुराःशंभुःसर्वदोषनिवृत्तये निर्ममे

सर्वजंतूनांकेवलंकरुणावशात् ६ अनेककोटिभिःकल्पैरर्जितैःपुण्यराशिभिः स्थानमेतन्मनुष्याणांसिद्ध्यत्यत्यंतशोभनंमयापापराशिविनिव
र्तकंनृणां स्थानमेतदतिशोभनंसदासेवनीयमखिलैस्तुजंतुभिः ८ इतिश्रीस्कंदसंहितायांयज्ञवैभवखंडेत्रिचत्वारिंशः ४३ सूतउवाच
अथातःसंप्रवक्ष्यामिद्रव्यशुद्धिंसमासतः श्रद्धयासहविप्रेंद्राः शृणुतात्मविशुद्धये आत्मानात्मेतिविप्रेंद्राद्विधाद्रव्यंव्यवस्थितं आत्मद्रव्यं
स्वतःशुद्धंसत्यज्ञानादिलक्षणं २ सत्तामात्रेनदोषोस्तिस्वतःशुद्धंयतःसदा यदिसत्तास्वतोऽशुद्धादुष्टंसर्वंभवेत्सदा ३ दुष्टसत्ताभिसंबंधात्
दुष्टरूपंसदाखलु तथासतिविशुद्धंतुनसिद्ध्यत्येवकिंचन ४ सत्ताशून्यंतुतुच्छंस्यात्सत्ताशुद्धास्वतस्तथा ज्ञप्तिरूपमपिज्ञानंशुद्धमेवस्वतः
सदा ५ अशुद्धिर्जडरूपेहिदृष्टासर्वजनैरपि स्वतःस्फुरणरूपंतुज्ञानंदुष्टंभवेद्यदि ६ दुष्टमेवभवेत्सर्वंदुष्टस्फुरणसंगमात् तथासतिविशुद्धंतु
नसिद्ध्यत्येवकिंचन वस्तुस्फुरणशून्यंतुतुच्छमेवभवेत्सदा दुष्टकारणविज्ञानेदोषोस्तीतिवदेद्यदि ८ अभिव्यंजकदृष्टत्वात्तुज्ञानेदोषोनचस्व
तः अन्यथासकलंज्ञानंदुष्टमेवस्वतोभवेत् अतःस्फुरणरूपंतुज्ञानंशुद्धंसदैवतु आनंदस्तुस्वयंशुद्धःसुखैरर्थ्यतेयतः १० अशुद्धःसर्वथाभो
वेनार्थ्यतेसुखैःखलु ब्रह्मादिस्तंबपर्यंतैरर्थ्यतेहिसुखंसदा विषयेंद्रियसंपर्कजन्यतेहिसुखंसदा नदृश्यतेततोदुष्टमितिचेन्नसंगतं १२

स.य.वै अभिव्यंजकवृत्त्या हि सुखं दोषो न च स्वतः आत्मरूपं सुखं नित्यं नैव जन्मविनाशवत् प्रेमालंबनतः सत्तात्मसुखमेव न संशयः आत्मनश्च सुखस्यापि प्रे
७४ मालंबनता सदा १४ विद्यते न तयोरैक्यं वस्तुतोऽस्ति सुखात्मनोः अनयोरात्मतया नित्यं सुखं निर्दोषमेव हि १५ अतः सत्यचिदानंदः स्वतः शु
द्धो न संशयः सत्यादिलक्षणं चात्मद्रव्यं शुद्धं ततः स्वतः अज्ञानोपाधिसंपर्कादशुद्धमिव भाति तत् विशुद्धिः परमा तस्य ज्ञानादेव न कर्मणा स्वतः
शुद्धस्य चाज्ञानादशुद्धिः स्यात्म वस्तुतः अज्ञानस्य निवृत्त्यैव शुद्धिः स्वाभाविकी भवेत् १८ कर्मणा शुद्धिरुत्पन्ना यदि सा नश्यति कर्मसाध्यमनि
त्यं हि न नित्यं समतं हि तत् १९ सच्चिदानंदरूपात्मा नित्यशुद्धः स्वयं स्वतः अज्ञानाज्जीवतां तस्य नैव स्वाभाविकी सदा २० अतो जीवेश्वरैकत्वज्ञा
नादेवात्मवस्तुनः विशुद्धिः परमा प्रोक्ता कर्मणा न कथंचन अज्ञानेनावृतो जीवो व्यवहारे तु कर्मणा वेदोदितेन शुद्धिः स्याज्ज्ञानाच्छुद्धिः परस्य तु २२
अनात्मरूपं यद्द्रव्यमशुद्धं तत्स्वभावतः तथापि व्यवहारे तु विशुद्धिस्तस्य कीर्तिता आध्यात्मिकादिभेदेन द्विधानात्मा व्यवस्थितः देहेंद्रियाद्यं हे वि
प्रास्समाध्यात्मिकं भवेत् २४ पृथिव्यादीनि भूतानि भौतिकानि तथैव च शब्दस्पर्शादयः प्रोक्ता आधिभौतिकसंज्ञिताः वेदोदितांच संस्कारैश्च ७४
भावनया पि च तथा हिंसादिराहित्याद्देहशुद्धिर्द्विजा भवेत् २६ इंद्रियाणामधिष्ठातृदेवतास्मरणादपि शिवभावनया चापि विशुद्धिर्द्विजपुंगवाः

५६

प्राणायामादधिष्ठातृदेवतास्मरणादपि शिवभावनया शुद्धिर्भवेत्प्राणस्य सुव्रताः २९ निषिद्धचिंतनाभावाच्छिवभावनयापि च मनआदेरुक्तविधेर्भ
वेच्छुद्धिर्न संशयः समाधौ विलयश्चापि विशुद्धिः परिकीर्तिता देहादेरुक्तविशुद्धात्माशुद्धोहमिति विभ्रमात् ३० स्वात्मानमनुते शुद्धं सा शुद्धिर्व्यावहारि
की अशुद्धाशुद्धवद्भाति शरीरादेरचेतनः ३१ व्यवहारे यथा चंद्रो निश्चलोऽपि चलत्यपि भूतभौतिकरूपाणां विशुद्धिर्ब्रह्मभावनात् ३२ भवत्येव न
संदेहः सत्यमुक्तं मयैव तु ब्रह्मभावनया सर्वं विशुद्धमिति पश्यतः न हेयं विद्यते किंचित्सत्यमेव न संशयः ब्रह्म सर्वमिति ज्ञानोद्भावना वस्तुतोऽपि वा ३४
विनापि शुद्धिं द्रव्याणां न सिध्यति कदाचन शुद्धः स्वच्छेन सिद्धोऽपि द्विजा वेदार्थपारगाः अशुध्याद्याहरेत्सर्वं धर्मेणाग्निर्यथाहृतः तथापि शुद्धिः क
र्तव्या व्यवहारे खिलस्य तु ३६ वेदसिद्धेन मार्गेण श्रेयस्कामैर्मनीषिभिः चंडालाद्युक्तसंस्पृष्टमन्नमयं पक्वमुत्सृजेत् प्रक्षालयेदपक्वं तु प्रोक्षये
द्वा कुशोदकैः पक्वं शूद्रेण संस्पृष्टं प्रोक्षणादेव शुद्ध्यति ३९ त्याज्यमेवोपयुक्तं स्यात्पुनः पाकेन वा शुचि आकाराद्वितयात्मस्थं मृन्मयं तु पुरातनं
अग्निदाहेन संशुद्धेन्नूतनं क्षालनेन तु विष्ठामूत्रमयं स्पृष्टमुपयुक्तं परित्यजेत् ४० अपक्वं क्षालयेच्छुद्धं वह्निशस्त्रकुशोदकैः उदक्याशुचिसंस्पृ
ष्टं यत्तपात्रं तु दारवं उपयुक्तं त्यजेदन्यत्क्षालयेत्स्वकुशांभसा विलोक्य देशकालादि द्रव्यं द्रव्यप्रयोजनं ४२ स्रोपपत्तिमवस्थां च पुनः शौचं समा

सू.य.भै रभेत् अन्नं द्रोणाधिकं पक्वमंत्याद्यस्पृश्यदूषितं क्षालनेन विधानेन परिशुद्धं हि चापदि द्रोणाद्दूनं त्यजेद्धाराद्धिकं प्रोक्षयेद्बुधः ४४ अनापदि
७५ न सर्वत्र क्षालनं चोर्ध्वं द्रोणान्नतः परं कुंभादूर्ध्वं द्विजा धान्यं पक्वं प्रोक्षणतः शुचि अपक्वं क्षालनेनैव विशुद्धं भवति ध्रुवं भाराद्दूनं परित्याज्यः पक्वधान्य
स्य तंडुलाः ४६ भारद्वयाद्धः क्षाल्यस्तदूर्ध्वं प्रोक्षणं द्युनिः अन्नं पक्वं परित्याज्यमुदक्यांत्यादिदूषितं भारपक्वोदनं क्षाल्यं प्रोक्षणीयं ततः
परं उदक्यांत्यादिसंस्पृष्टं वस्त्रं प्रक्षालयेत्तथा ४८ श्वसूकरखरोष्ट्रादिस्पृष्टं च क्षालयेत्तथा नवं वस्त्रं च काषायं बहु चस्वं तथैव च रक्त
वस्त्रं तथा कृष्णं प्रोक्षयेत्कंबलादिकं तंडुलेषु तथा धान्ये गुडे गव्ये रसात्मके ५० काकादिदूषितानां शंतुल्यकांसं प्रोक्षयेद्बुधः द्रवद्रव्यस्य संशुद्धिर्भवे
दुत्प्लवनेन तु ५१ दुष्टभांडस्थितस्यास्य भवेद्दोषो न चापरः द्रव्याणामग्निपक्वानां धान्यवच्छुद्धिरीरिता ५२ अलभ्यलाभे संशुद्धिः प्रोक्षणेनैव केव
लं केशलोमनखस्पृष्टं क्रिमिकीटादिदूषितं अन्नं तु भस्मना शुद्धं प्रोक्षणेन घृतेन च क्षीरं तथा पिष्टमयं सर्वं पुनः पाकेन शुध्यति ५४ शूद्रांत्याशुचि
संस्पृष्टं त्याज्यमेव न संशयः उच्छिष्टद्रव्यहस्तस्तु भस्मद्रव्यं तु किंचन निधाय शेषं चं हुत्वा पश्चाद्धात्या प्रोक्षितं ततः अद्भिस्तु प्रोक्षणं शौचं बहू
नां धान्यवाससां ५६ प्रक्षालनेन त्वल्पानां शुद्धिर्वेदोदिता परा तैजसानां सुरास्पर्शे वह्निदाहेन शुद्धता ब्राह्मणस्य विशंशा ज्ञां क्षालनेन विशु
ध

आलेनदू मात्रायां २ त्रि
द्धता श्वचांडालादिसंस्पर्शे तैजसानां तु मार्जनात् ५९ प्रोक्षणं च विशुद्धिः स्यान्निर्णयात्तात्र शोधनं भस्मना मृज्जलाभ्यां च मार्जनेन विशुद्धता
उदक्याशुक्तकांस्यस्य घर्षणेनेन च कल्याणेनीर्थशेषस्तोभे च संभ्रमे ६० देवोत्सवे च तीरिद्ध्यस्पृष्टदोषो न विद्यते शूद्रानुलोमकाकाद्यैः प्रतिलोमैश्च
दूषितं मृज्जलाभ्यां विशुद्धं तत्त्वेकविंशतिमार्जनात् अश्मना निर्मितं पात्रं भस्मना सजलेन तु ६२ निर्लेपं शुद्धिमाप्नोति त्वेकविंशतिमार्जनात् अ
ज्ञानिशंखशुक्त्यादिद्रव्याणि सकलानि तु प्रक्षालनेन शुद्धानि भस्मना मार्जनेन च बहुनात्र किमुक्तेन सर्वत्र क्षालनं बुधाः ६४ सर्वदोषनि
वृत्त्यर्थं चिंतयेत्सुदृढं सदा ब्रह्मरूपेण संग्राह्यं सर्वं शुद्धं सदा भवेत् नित्यशुद्धस्य दृष्टिस्तु विशुद्धा भवति ध्रुवं नित्यशुद्धं हि तद्ब्रह्म सदा सत्यादि लक्ष
णं ६६ तत्तत्त्वदृष्टिसंयुक्तं विशुद्धं सकलं भवेत् अथवा सकलं कार्यं तर्केण श्वप्रमाणतः कारणात्मतया पश्येत्सर्वदोषनिवृत्तये कारणं
सर्वकार्याणां परमात्मैव नेतरत् प्रवदंति हि वेदांताः स्मृतयश्चादरेण तु ६८ अतः समस्तं परमेश्वरात्मना विचिंतयेत्स्वानुभवेन मानवः
विचिंतनेनैव समस्तमास्तिका विशुद्धतामेति न चात्र संशयः ६९ इति श्रीस्कंदपुराणे सूतसंहितायां यज्ञवैभवखंडे चतुश्चत्वारिंशोऽध्यायः
४४ सूत उवाच अथातः संप्रवक्ष्यामि मुनयः संशितव्रताः अभक्ष्यस्य निवृत्त्यात्तु विशुद्धं हृदयं भवेत् आहारशुद्धौ चित्तस्य विशुद्धिर्भवति स्व

सू.प्र.भै. नः चित्तशुद्धेः क्रमाद्ज्ञानं जायते पारमेश्वरं ३ पारमेश्वरविज्ञाने सति संसारहेतवः मंथयस्तु विनश्यंति न हि संदेहकारणं अभक्ष्यभक्षणाच्चित्त
मशुद्धं भवति स्वतः अशुद्धाभ्यां ति विज्ञानं जायते सुदृढं न तत् ४ भ्रांतिविज्ञानतः पुंसो निषिद्धाचरणे रतिः जायते तु तया पापं कुरुते कर्म सर्वदा ५ ते
१५ न संसारवृद्धिः स्यान्न हि मुक्तिः कथंचन तस्मादभक्ष्यं यत्नेन दूरतः परिवर्जयेत् ६ अभक्ष्यं ब्रह्मविज्ञानविहीनस्यैव देहिनः न सम्यक् ज्ञानिनस्त
स्य स्वरूपं सकलं खलु अहमन्नं तथान्नाद इति हि ब्रह्मवेदनं ब्रह्मविद्ग्रसति ज्ञानात् सर्वं ब्रह्मात्मनैव तु ८ ब्रह्मक्षत्रादिकं सर्वं यस्य स्यादोदनं स
सारु यस्योपसेचनं मृत्युस्तं ज्ञानी तादृशः खलु ९ ब्रह्मस्वात्मरूपं विज्ञातुर्ज्ञानात्तस्य भासते तथा सति जगद्भोज्यं भवेद्विज्ञानिनः खलु १०
जगदात्मतया भाति यदा भोज्यं भवेत्तदा यदा स्वात्मतया भाति भक्षितं सकलं तदा तदाभानेन रूपेण जगद्भोज्यं भवेत्स्वयं मानतः स्वात्मना भानं भ
क्षितं भवति ध्रुवं १२ जाग्रत्स्वप्नाभिधे काले प्रतीतं प्रसतीश्वरः स्वात्मनैव सुषुप्तौ तु पुनस्तत् सृजति प्रभुः यथा स्वप्नप्रपंचस्यं संप्रस्तं वस्तुतः स्व १६
यं तथा जाग्रत्प्रपंचस्य स्वं वस्तुतः स्वयमेव हि १४ स्वस्वरूपं स्वयं भुंक्ते नास्ति भोज्यं पृथक् स्वतः अस्ति चेदस्तितारूपे ब्रह्मैवास्ति तु लक्षणं १५
अस्तितालक्षणा सत्ता सत्ता ब्रह्म न चापरा नास्ति सत्तातिरेकेण किंचिदप्यास्ति कोनमाः सत्तातिरिक्तं चेदस्ति शून्यवच्छून्यमेव तत् भवेन्नैवा

त्र संदेहो नास्ति मायावद्वस्तुतः १७ अविचारितसिद्धा हि माया सर्वविमोहिनी सा शिवज्ञानहीनानामेव भाति न योगिनः १८ योगिनामात्मनिष्ठानां माया
साक्षिणि कल्पिता सा स्थिरस्तथा भाति शिवज्ञानेन बाधिता बाधितापि पुनर्माया भाति हि द्योहभानवत् आरब्धकर्मपर्यंतं ब्रह्मविज्ञानिनामपि २०
ब्रह्मविज्ञानसंपन्नः प्रतीतमखिलं जगत् पश्यन्नपि सदा नैव पश्यति स्वात्मनः पृथक् तस्मादभक्ष्यं नैवास्ति विदुषः परयोगिनः आत्मविज्ञानहीनानां
खल्वेवाभक्ष्यमास्तिकाः २२ द्विजानामात्मविज्ञानविहीनानामियं बुधाः व्यवस्था शंकरेणैव निर्मिता भक्ष्यगामिनी लशुनं गृंजनं चैव पलां
डुं ग्रामकुक्कुटं छत्राकं विड्वराहं च मतिमान्नैव भक्षयेत् २४ पलांडुसदृशं सर्वं गंधवर्णरसादिभिः कामतोऽकामतश्चैव ब्राह्मणो नैव भक्षयेत्
ब्रश्चनप्रभवं सर्वं हिंगुद्रव्यं विनैव तु श्लेष्मातकं शिग्रुकं चैव ब्राह्मणो नैव भक्षयेत् २६ खड्गासंज्ञं च वार्ताकं तथैवोरवरं जंतणं लवणं भूमिजं
विप्रो मोहेनापि न भक्षयेत् नखविष्करसंज्ञं च तथा कोयष्टिसंज्ञितं सौलंबलूरसंज्ञं च मत्स्यादीन्नैव भक्षयेत् २८ बकं चैव बलाकं च खंजरीट
कसंज्ञितं कोकिलं च द्विजश्रेष्ठाः प्रमादाच्च न भक्षयेत् पाठीनरोहितावाद्यौ नियुक्तौ हव्यकव्ययोः राजीवान्सिंहतुंडांश्च शशकांश्चैव भक्षयेत् ३०
केवलानि च शुक्लानि तथा पर्युषितानि च ऋजीषपक्वं विप्रेन्द्राः कदाचिन्नैव भक्षयेत् विण्मूत्रं च सुरा सर्वं सर्वं दुष्यं तथैव च सुरासवस्य च स्पृष्टं

स्.य.भ ब्राह्मणो नैव भक्षयेत् ३३ रेतो देहमलं चैव श्वकाकोच्छिष्टमेव च विड्वराहखरोष्ट्राणां मूत्रं विप्रो न भक्षयेत् बिडालकाकाद्युच्छिष्टं नकुलोच्छिष्टमेव
च वेदवाह्येन संस्पृष्टं ब्राह्मणो न च भक्षयेत् ३४ शकुनीसंज्ञिताः सर्वास्तथा ग्रामनिवासिनः अनिर्दिष्टांश्चैकशफान् क्रव्यादांश्च न भक्षयेत् कलविं
कं समाख्यं च टिट्टिभं प्लवमेव च हंसं कसमाख्यं च सारसं नैव भक्षयेत् ३६ रज्जुवालं च दात्यूहं शुकं सारिकसंज्ञितं प्रतुदाञ्जालपादांश्च ब्राह्मणो ने
व भक्षयेत् तुरंगस्य गजस्यापि मंडूकस्य तथैव च पुरुषं च तथा मूत्रं ब्राह्मणो नैव भक्षयेत् ३८ नराणां च गजानां च मांसं सम्यक् सुसत्तमाः महिषस्य
च मांसं च ब्राह्मणो नैव भक्षयेत् ३९ अजाविमांसं रकं च गोमांसं च तथैव च मृगाणां च तथा मांसं ब्राह्म० ४० मांसं पंचनखानां च विनैव सकलानि तु
कामतो कामतो वापि ब्राह्म० ४१ मत्स्यं हत्वं हतिस्पृष्टमाज्यं कीलालमेव च रसं नालकलस्यापि ब्राह्म० ४२ ओदनं तु पुनः पक्वं नारिकेलरसं तथा प
कं तोयमम्लमिश्रं ब्राह्म० ४३ अनिर्दशाहगोः क्षीरमौष्ट्रमैकशफं तथा आविकं संधिनीक्षीरं विवत्सायाश्च गोः पयः ४४ आरण्यानां च सर्वेषां मृ
गाणां महिषीं विना स्त्रीक्षीरं भ्रमादपि ब्राह्मणो न पिवेत्सदा गोगजाश्वहिभिर्घ्रातं पादस्पृष्टं च कामतः अनुलोमादिभिः स्पृष्टं ब्राह्मणो० ४६
उक्तान्येतानि सर्वाणि ब्राह्मणानां विशेषतः अभक्ष्याणि मयोक्तानि भक्षकाश्च पतंत्यधः तस्मादभक्ष्यं संत्यज्य ब्राह्मणो मतिमत्तमः चित्तस्य परि

शुद्ध्यर्थं भक्ष्यमेव तु भक्षयेत् क्षत्रियाणां च वैश्यानां भक्ष्यमेध्यापि विद्यते तथापि भक्षणाभावस्तेषामत्यंतशोभनं शूद्रादीनां च सर्वेषामभक्ष्यं नै
व विद्यते तथाप्यभक्षणं तेषां फलाय महते भवेत् ५० भक्ष्यस्य भक्षणादेव विशुद्धहृदयः पुमान् पारमेश्वरविज्ञानान्मुच्यते भववंधनात्
पारमेश्वरविज्ञानं वेदादेव न चान्यतः आगमांतरजन्यं तु ज्ञानं न ज्ञानमास्तिकाः ५२ अष्टादशानां विद्यानां वेदादन्याश्च सत्तमाः विद्या वेदा
नुसारेण प्रवृत्ताः सर्वशोभनाः तथापि तासु सर्वासु कश्चिदंशः क्वचित् क्वचित् शिवागमानुसारेण तत्तद्भेदानुसारतः ५४ विष्णवागमानुसारेण
तत्तद्भेदानुसारतः ब्रह्मागमानुसारेण तत्तद्भेदानुसारतः अधिकारिविशेषेण क्रमेणैव विमुक्तये प्रवर्तते मुनिश्रेष्ठाः सत्यमेव मयोदितं ५६ त
तंत्रेषु पे मत्यादीक्षिता मुनिसत्तमाः सोंशस्तेनैव संग्राह्यः सर्वथा नैव वैदिकैः मदुक्ताः संहिताः साध्वी वेदमानानुसारिणी वेदेतरागमाधी
नः कश्चिदंशो न विद्यते ५८ प्रसादादेव रुद्रस्य संहितेयं मयोदिता प्रसादः शांकरः सम्यक् ज्ञानस्य खलु साधनं अतो वेदानुसारेण द्विजाना
मात्मशुद्धये अभक्ष्यमादरेणोक्तं मया वेदार्थवित्तमाः ६० सर्वमुक्तं समासेन केवलं करुणावलात् श्रद्दधानस्त्वभक्ष्याणि भ्रमादपि न भक्षये
त् ६१ इति श्रीस्कंदपुराणे सूतसंहितायां यज्ञवैभवखंडे पंचचत्वारिंशोध्यायः ४५ सूत उ० अथातः संप्रवक्ष्यामि समासेन न विस्तरा त्

स्व॰ष॰ येनज्ञानविशेषेणमृत्युंपश्यंतिदेहिनः १ सोमछायांध्रुवंचैवमहापथमरुंधतीं अपश्यन्वत्सरादूर्ध्वंनजीवतिनसंशयः २ अरश्मिमंतमादित्यं
रश्मिमंतंचपावकं पश्यन्नेकादशान्मासादूर्ध्वंमर्त्योनजीवति ३ जलंवासुवर्णंवाविष्ठमूत्रंवावमन्नरः प्रत्यक्षमथवास्वप्नेदशमासान्नजीवति
१८ ४ भ्रमन्तंमिनदिशाचांस्वर्गंधर्वनगराणिच रुक्मवर्णान्द्रुमान्पश्यन्नवमासान्नपश्यति स्थूलोवाथकृशोकस्मात्भवेन्मर्त्यःस्वयंयदि कृश्चव
र्त्तेथवामासानष्टौजीवतिमानवः ६ स्वपादंरवं(?)दितंपश्यन्नग्रतःपृष्ठतोपिवा पंकेवापांसुकेवापिससमासान्नजीवति कपोतोवाथगृध्रोवा
काकोवायदिमूर्द्धनि स्थितःक्रव्यादसंज्ञोवाषण्मासेनविनश्यति ८ गच्छंतीवायसीपंक्तिःपांसुवर्षंविमुंचति स्वछायांविकृतांपश्येच्चतुर्वापंच
जीवति विद्युतंदक्षिणेभागेपश्येन्मेघविवर्जिते उदकेचापमैंद्रंवात्रीण्द्वेवासजीवती १० दर्पणेवाजलेवापिपरेपांवाथचक्षुषि अशिरस्कं
तथात्मानंपश्यन्मासेननश्यति वस्तगंधस्तवादेहःशवगंधस्तुवाभवेत् निंबगंधस्तुवानीवमासार्द्धेनविश्यति १२ शुष्यत्तेहृदयंयस्यमस्तकं
धूमसंवृतं सद्याकंपोभवेद्यस्यदशाहंनैवजीवति संभिन्नोमारुतोयस्यमर्मस्थानानिकृंतति अद्भिःस्पृष्टोनहृष्येच्चमृत्युस्तस्यगृहंगतः १४ कृष्ण १८
वानरसंयुक्तरथैनैवतुदक्षिणं दिशंगच्छतियोमर्त्योमृत्युस्तस्यगृहंगतः कृष्णाःकृष्णांबराःस्वप्नेश्यामवस्त्रधरास्त्रियः यनेवसहगच्छंतिदक्षिणंगन
स्य

सजीवति १६ छिन्नंकृष्णंस्वकंवासःस्वप्नेपश्यतियःपुमान् नग्नंवाश्रमणंतस्यगृहेमृत्युरुपस्थितः नक्षत्राणिदिवापश्यन्रात्रौचेंद्रधनुस्त
था चंद्रार्कंतुवाकृष्णंभानुंपश्यतिमानवः १८ आदित्यमंडलेपश्येत्सुषिरंचंद्रमंडले आकाशेरक्तमालांवासद्यएवविनश्यति श्मशानंभ
केशांश्चनदींशुष्कांभुजंगमान् पश्येत्स्वप्नेदशाचांयस्तस्यमृत्युरुपस्थितः २० कृष्णैर्विकेशैःपुरुषैःस्वप्नेयःपीडितःपुमान् पाषाणैस्ताड्यतेथ
तस्यमृत्युस्तस्यगृहंगतः आदित्योदयवेलायांमत्स्यसंयस्यवैशिवाः क्रोशंत्यभिमुखालेत्यमृत्युस्तस्यगृहंगतः २२ भयकंपास्योयस्यभयोभयोभवं
तिच शोकमोहौसदायस्यमृत्युः २३ निर्जलायस्यजिह्वातुदंतघर्षस्तयस्यतु हृदयेयस्यवैवक्रिर्मृत्युः २४ चक्षुरेकंस्रवेद्यस्यकर्णौस्थानाच्चभ्र
श्यतः यस्यनासाचवक्रास्यान्मृत्युः २५ यस्यजिह्वाचकृष्णास्यात्सुमुखंदुर्मुखंभवेत् गंडेचकृष्णेरक्तेवामृत्युः २६ मुक्तकेशोहसन्गायन्नृत्यन्ग
च्छतिदक्षिणं दिशंस्वप्नेस्यमृत्युःस्यादीदृशस्वप्नदर्शिनः २७ श्वेतमृतास्तथाश्वेताअश्वाश्वेतनराअपिवहंतियाम्यदेशेयंतस्यमृत्युरुपस्थि
तः २८ उष्ट्रराासभसंयुक्तंरथमारुह्यदक्षिणे स्वप्नेगच्छतियोमर्त्यस्तस्यमृ॰ २९ घोषंनशृणुयात्कर्णौज्योतिर्नेत्रेनपश्यति श्वभ्रेयोनिपतेत्स्वप्ने
तस्यमृ॰ ३० ऊर्ध्वदृष्टिस्तथारक्तकृष्णदृष्टिश्चयःपुमान् ऊष्माविहीनदेहश्चतस्यमृ॰ ३१ नाभौवाहृदयेवापिसुषिरंयस्यभासते यस्यात्सुह

श्रृ

स्यपि भवेन्नस्त्रत्रेनसंशयः ३२ जाग्रत्काले यवास्वप्नेयोहरेननिहन्यते जीवनंतस्यनास्त्येवमृत्युरग्रइतिनिश्चितः ३३ अग्नौयोनिपतेत्स्वप्नेयोवानद्यस्तरेत्तिः
सदायाम्यशवंवयोनस्यम्· ३४ शुक्लमावरणंकंठलंवायस्यभासते स्वप्नेनीलपटंयस्यनस्यम्· ३५ एवमादीन्यरिष्टानिभासंयनेयस्यसुस्थितं
७८ सभयंशोकमोहोवस्य त्वकाग्रमनादरं ३६ श्रीमद्वाराणसींगत्वास्नात्वागंगाजलेनरः दृष्ट्वाविश्वेश्वरंदेवंजपेत्पंचाक्षरंसदा ३७ सोमनाथेय
वास्नात्वासोमतीर्थेमहोदधौ सोमनाथंमहादेवंदृष्ट्वापंचाक्षरंजपेत् ३८ श्रीपर्वतेथवादेवंदृष्ट्वाश्रीमल्लिकेश्वरं भस्मानोद्धूल्यमंत्रेणसदा
पंचाक्षरंजपेत् ३९ श्रीकालहस्तिनाथंवासुवर्णमुखरीजलेस्नात्वादृष्ट्वामहादेवंसदापं· ४० गोपर्वतेनथादेवंदृष्ट्वागोकर्णेश्वराभिधं भस्मनोद्धू
ल्यमंत्रेणसदापं· ४१ श्रीमद्वृद्धाचलेवापिस्नात्वामुक्ताजलेनरः दृष्ट्वावृद्धाचलेशानंसदापं· ४२ श्रीमद्रामेश्वरेवापिस्नात्वानत्रमहोदधौ दृ
ष्ट्वारामेश्वरंदेवंसदा· ४३ श्रीहालास्येथवादेवंदृष्ट्वाहालस्यनायकं यथाशक्तिधनंदत्वासदा ४४ वेदारण्येथवास्नात्वावेदतीर्थेमथोदधौ वे
दारण्याधिपंदृष्ट्वासदा· ४५ श्रीमद्वल्मीकसंज्ञेवाक्षीरकुंडजलेनरः स्नात्वादृष्ट्वामहेशानंसदा· ४६ गजारण्येथवास्नात्वाकावेर्यामेवमानवः ७८
गजारण्याधिपंदृष्ट्वासदा· ४७ जप्येश्वरंतुवागत्वास्नात्वाकावेरिकाजले दृष्ट्वाजप्येश्वरेशानंसदा· ४८ अथवादक्षिणवर्तेस्नात्वाकावेरिका

जले दक्षिणावर्तनाथेशंदृष्ट्वापं· ४९ कुंभकोणेथवास्नात्वाकावेर्यामेवमानवः कुंभकोणाधिपंदेवंदृष्ट्वापंदेवंदृष्ट्वापं ५० मध्यार्जुनेवाका
वेर्यांस्नात्वामर्त्यःसमाहितसमाहितः मध्यार्जुनाधिपंदेवंदृष्ट्वापंचा· ५१ श्रीमत्कुंभघट्टतीर्थेवाथवामंगलवंशके श्रीमदग्नीश्वरस्त्येवाकोटि
हास्येथवानरः ५२ आम्रतीर्थहतिस्थानेश्वेतारण्यसमाह्वये श्रीमंद्ब्रह्मपुरेवापिकावेर्युदधिसंगमे स्नात्वादत्वायथाशक्तिधनधान्यंति
लंतुवा दृष्ट्वामहेश्वरंभक्त्यासदापंचाक्षरंजपेत् ५४ अथवामानवःशीघ्रंगत्वाव्याघ्रपुरंमुदा शिवगंगाभिधेतीर्थेस्नात्वादत्वायथाबलं
प्रदक्षिणत्रयंकृत्वाश्रीमदभ्रसभापतिं दृष्ट्वापंचाक्षरंमंत्रंसततंसर्वदाजपेत् ५६ अस्मिन्व्याघ्रपुरेरण्येयोवाकोवातुमानवः ममारपरमामु
क्तिःसिद्धातस्यनसंशयः महापातकसंघाघ्नस्थानस्यास्यप्रवेशनात् नश्यंतिदर्शनादेवमुक्तिःसिद्धासभापतेः ५८ महाकालिकोदेवोमहानं
दपरायणाः यत्रनृत्यतितंदृष्ट्वामुच्यतेभवबंधनात् देशदर्शनमात्रेणविमुक्तावहवोजनाः किंपुनर्देवदेवस्यदर्शनेससभापतेः ६० अविमुक्ताद
पिश्रेष्ठमिदंस्थानंनसंशयः अवनृत्यतिदेवेशस्तत्रदेवोनन्त्यति अत्रदर्शनमात्रेणमुक्तिःसिद्धाहिदेहिनां तत्रनष्टस्यदेहस्यततःश्रेष्ठमिदं
पुरं ६२ श्रीगव्याघ्रपुरंमुक्त्वायोवावाराणसींगतः नत्रनष्टोपिकैवल्यंप्राप्नुयान्नैवमानवः पार्वतीपरमाशक्तिःश्रीमद्व्याघ्रपुरेसदा मका

६३

सू॰ यभै ज्ञानेहिविद्याभिः संहृता करुणावलात् ९४ सर्वविद्यालयादेवीयत्रानीवप्रकाशते खलु नत्र परामुक्तिरतः श्रेष्ठमिदंपुरं ९५ अतः समस्तंपरिव
र्ज्यसर्वं समस्तदोषस्यनिवृत्तिसिद्धये इदंतु मुख्यं पुरमाश्रयान्नरः शिवप्रसादेन हि तत्र मुच्यते ९६ इति श्रीस्कन्दसंहितायां यज्ञवैभवखं
६० डे षट्चत्वारिंशोऽध्यायः ४६ सूत उ॰ अथातः संप्रवक्ष्यामि पापस्याकरणाय तु भोगावशिष्टपापानां लक्षणं मुनिसत्तमाः १ ब्रह्महा क्षयरो
गी स्यात्सुरापः श्यावदंतकः स्वर्णापहारी कुनखी दुश्चर्मा गुरुतल्पगः २ परिवादरतः पंगुरंधश्च वा॰ धिरस्तथा अनुकीर्तनकृन्मर्त्यः खर
स्वामी भवेत्सदा गुरुनिंदापरो नित्यमपस्मारी निरंतरं भगंदरी गुरोराज्ञाभंगकारी न संशयः ४ गुरुमात्सर्यकृन्मर्त्यो विट्क्रिमिः स्याच्च संशयः
गुर्वेवज्ञापरस्त्वद्धिवद्दोहा तथा भवेत् गुरोः शुश्रूषणेऽसक्तो दुःसद्रः स्यात्तु मानवः विद्रुद्रोहीनरः साक्षात्कलासखमाप्नुयात् ६ योवेददूषको म
र्त्यः स चंडालो भवेत्तथा वेदांतदूषकः साक्षात्कुष्ठस्यान्नसंशयः उन्मत्तो वेदविज्ञानदूषकः पुरुषाधमः ७ जलस्त्रलाभिगंता स्याद्दंताज्ञा तिरस्कृ
मानवः ८ अग्निहोमत्यजः कुष्ठगरदश्च तथैव च शस्त्रपाणिस्तथा मर्त्यो रूप्यचोरस्तु दर्दुरः कूटकृन्मुखरोगी स्यात्कूटसाक्षी तथैव च कूटकृ ८०
त्सहायश्च तद्रूपाय मरोऽपि च १० पितृमातृपरित्यागी वालत्यागी तथैव च अक्षिरोगी भवेन्नित्यं भार्यात्यागी तु मानवः अल्पायुश्चा मरा

नेनेमतिज्ञातस्य मानवः पत्नीवृहत्वैवेकस्यां रमते बंदरवत्सः १२ अन्नापहारी मंदाग्निर्जिह्वारोगी भवेत्तथा अग्रसुग्मालरोगी स्यान्मिष्टभुक्तथैव
च पंचयज्ञविनिर्मुक्तो विद्रुराहो भवेन्नरः पर्वमैथुनकृन्मर्त्यः प्रमेही स्यान्नसंशयः १४ अभ्यागतपरित्यागी कपोले पिटिको भवेत् तथातिथिपरित्या
गी भवेन्नात्र विचारणा स्वात्मोत्कर्षपरो नित्यं वामनः पंगुरेव च गोघ्नश्चैव कृतघ्नश्च जात्यंधः स्यान्नसंशयः १६ निःस्नेहकः स्वभार्यायां गलगंडी भ
वेन्नरः वेश्यासेवापरो मर्त्यः छिन्नलिंगो न संशयः पिशुनः कुतिवक्रः स्यान्नरस्त्वाज्यादिविक्रयी एडकाजगजाश्वादिविक्रेता व्याध एव हि १८ ज्ञाना
पहारी मूकः स्यान्मंत्रचोरस्तथैव च अभक्ष्यभक्षको मर्त्यो गंडमाली भवेत्सदा रंगोपजीवी कुमतिर्भवेन्नात्र विचारणा अंधः पुस्तकचोरः स्यात्तथा स्या
त्खेचरी हरः २० सदा पुण्यकथाक्षेपात् वक्रनासो भवेन्नरः शिष्टाचारस्य धर्मस्य दूषको राक्षसो भवेत् ज्ञानयोगगुरुद्वेषकः स्याद्देवदूषकः पुण्यक ग
र्मप्रवृत्तस्य प्रतिषेधी क्रिमिर्भवेत् २२ देवद्रव्यापहारी स्यान्मनुष्यो वायुभक्षकः तटाकारामभेत्ता स्यादंगहीनस्तु मानवः मर्यादाभेदको दासो
भवेन्नात्र विचारणा परदाराभिगामी तु वानरोगी भवेन्नरः २४ मधुप्रमेही चोष्ट्रादिगंता नात्र विचारणा पतिव्रताभिगंता तु सूकरः स्यात्तु मानवः
परापवादनिरतो व्यसनी चालसः सदा अतिपातकदोषेण भवेयुः क्रिमयो नराः २६ तथा पातकदोषेण विद्वराहो न संशयः उपपातकदोषेण तथा

२५

स्०:य०भे० भ्यानःसदानरः पातकैरपरैःक्षुद्रैर्जायतेहसुदुर्योनिषु महापातकपूर्वैश्चपातकैरखिलैःसदा २९ स्वस्वरूपापरिज्ञानाद्बाध्यतेखलुमानवः स
स्वस्वरूपपरिज्ञानात्कर्मभिर्नसबध्यते स्वस्वरूपंतुशुद्धंहिसततंसर्वदेहिनां स्वस्वरूपंतुचिन्मात्रंसर्वदासर्वदेहिनां ३० नैवदेहादिसंघातःपरवद्दृष्टि
८१ गोचरः दृश्यरूपेणयद्रूपंदृश्यतेदेहपूर्वकं तस्मान्नैवदृश्यत्वाद्देहादिस्तंनयाखलु दृश्यत्वंदेहपूर्वस्यसमंमतंसर्वदेहिनां ३२ दृश्यत्वंदृष्टपूर्वंतुलोकेदृष्टं
हिचेतनैः द्रष्टुर्नास्तिहिदृश्यत्वंदृश्यत्वेद्रष्टृतानहि ३३ दृश्यरूपस्यकुड्यादेर्द्रष्टृतानहिदृश्यते अंशभेदेनदृश्यत्वंद्रष्टृत्वंचेतिचेन्मतं ३४ अंशभेदे
तुसांशत्वात्कुड्यवन्नश्वरात्मकं अंशभेदेपिदृश्यांशःसमानःकुड्यवस्तुनां द्रष्ट्रंशःकेवलःसाक्षादात्मैवस्यान्नसंशयः द्रष्ट्रंशेपिचकर्तृत्वमुपाधिजनि
तंसदा ३६ दृश्याभिव्यक्त्यापेक्षंवानस्वतःपंडितोत्तमाः स्वतःकर्तृत्वमस्यापिविद्यतेयदिचात्मनः नहिदर्शनरूपेणपरिणामीभवेद्धिसः परिणामीन
चात्मास्यात्सर्वथामृत्तिकादिवत् ३८ अविलंबनमस्त्येतत्तस्मिन्नहिविद्यते चिद्धिहीनंजडंनैवविभातिमुनिपुंगवाः स्वतःप्रकाशहीनस्यप्रकाशोनो
पपद्यते चित्प्रकाशात्मसंबंधादपिचेत्संनभासते ४० तस्याभावान्नतस्यैत्याविद्यतेहिचित् चिच्चिदेवसदाविभानदृश्यैवहिकेनचित् ४१ या ८९
दृग्दृश्यत्वहीनासासर्वदाभासतेखलु साकदाचिन्नभातीतियदिस्यान्मुनिपुंगवाः ४२ नहिनैवविभातीतिविभानंकेनसिद्ध्यति नभातीतिविभा
प्रतीत्या

नंतुनभातमितिचेन्मतं तर्हिभानंहिनाभानंतद्ज्ञानंभानमेवहि भानंभानांतरेणैवमभातिद्विजपुंगवाः ४४ भानरूपेणभानंतुसदैकंनहिनद्वयं भा
नंभानंसदास्वेनभासाभातिनचान्यतः ४५ यत्स्वयंभातितद्ज्ञानंस्वलुभासस्यभासकं अतःसर्वस्यसाक्ष्यस्यसाक्षिस्तःस्वयंप्रभः ४६ आत्मासा
क्ष्यगतैर्धर्मैःकर्मभिर्नसबध्यते दृग्रूपंदृश्यसंबद्धमितिवक्तुंनशक्यते संबंधस्यापिसाक्ष्यत्वात्संबंधोदृश्यवस्तुगः दृश्यभ्रंतस्यरजादेःखलुद
ष्टृसंगमः ४८ असंगोह्ययमित्येवब्रवीतिचपराश्रुतिः तस्मादात्मातुचिद्रूपःकर्मभिर्नसबध्यते चिद्रूपस्यात्मनःसाक्षाद्ब्रह्मतामाहहिश्रुतिः
ब्रह्मणःकर्मसंबंधाभावंचाहपराश्रुतिः ५० तथासतिकथंसोयंकर्मभिर्बध्यतेबुधाः तस्मादात्मास्वमोहेनसंसारीवप्रकाशितः वर्णाश्रमवया
वस्थाविशेषानात्मविद्यमान् अध्यस्याशेषवेदानांनियोज्यस्यात्रचस्वतः ५२ अज्ञानादन्यथाज्ञानंमनुष्यत्वाद्दिमानयं आत्मातुपरमात्मापि
कर्मभिर्बध्यतेऽवशः कर्मभिर्व्यवहारैश्चबद्धोपिस्वीयमायया वस्तुतःपरमात्मायंखलुतैर्ननिबध्यते ५४ स्वात्मनःसर्वसाक्षित्वंदेहादेर्व्यतिरिक्त
तां ब्रह्मत्वंचश्रुतेर्ज्ञात्वाकर्मभिर्नहिबध्यते ५५ सर्वसाक्षिणमात्मानंवर्णाश्रमविवर्जितं ब्रह्मरूपतयापश्यन्मुच्यतेभवबंधनात् ५६ अतःस्वात्मा
परिज्ञानाद्देहेहंमानमाश्रितः करोतिसर्वकर्माणिसोत्रंतज्ञानीनहिसंशयः ५७ ईदृशापरमाविद्याशंकरीभवनाशिनी प्रसादादेवजंतूनांशंकरेवहिजाय

१९ य॰वै॰ ने ५८ वागुद्भूतापराशक्तिर्याचिद्रूपापराभिधा वंदेतामनिशंभक्त्याश्रीकंठार्द्धशरीरिणीं ५९ इच्छासंज्ञाचयाशक्तिःपरिपूर्णाशिवापरा वंदेतामा
दरेणैवममेष्टफलदायिनीं ६० शक्तिर्यापरमासाक्षाद्बीजभूताखिलस्यच वंदेतामनिशंभक्त्यानकुलीशशिवान्वितां ६१ ऊर्ध्वरूपाप्यधोरूपा न
थाधस्तापिमध्यगा मध्यरूपापिचांतस्थायातांवंदेवरप्रदां ६२ विन्यासैर्वर्णसंकुलैर्विश्वविद्यालयात्मना विद्योतमानायावाचिवंदेतामाद
रेणतु ६३ एकधाचद्विधाचैवतथाषोडशधास्थिता द्वात्रिंशद्भेदभिन्नाचयातांवंदेपरात्मदां ६४ अकारादिक्षकारांतैर्वर्णैःस्वांतनिर्मलैः अशे
षशब्दैर्याभातितामानंदप्रदांनुमः ६५ लक्ष्मीवागादिरूपेणनर्तकीवविभातियाःतामाद्यंतविनिर्मुक्तामहंवंदेवराननां ६६ ब्रह्माद्यास्थावरांता
श्चयस्याएवसमुद्भवाः यस्यामेवविलीयंतेतस्यैनित्यंनमोनमः ६७ महदादिविशेषांतंजगद्यस्यांसमुद्भवं यस्यामेवलयंयातिवंदेतामंबिकाम
हं ६८ गुरुमूर्तिधरांगुह्यांगुह्यविज्ञानदायिनीं गुह्यभक्तजनप्रीतांगुहायांनिहितांनुमः ६९ यइदंपठतेस्तोत्रंसंध्ययोरुभयोरपि सर्वविद्याल
योभूत्वासयातिपरमांगतिं ७० इतिजनहितमेतत्स्तोत्रंदेव्याःप्रसादाद्धृष्टमखिलेशंभक्तिपूर्वंप्रणम्य मुनिगणमवलोक्यस्थाणुभक्तो
व्रततःस्वकपरशिवरूपेलीनबुद्धिर्बभूव ७१ इतिश्रीस्कंदपुराणेसूतसंहितायांयज्ञवैभवखंडेसप्तचत्वारिंशोध्यायः

इदंसतुर्थखंडं गुरु

८३

यत्वैभवखंडसमाप्तपूर्वार्धं
उत्तरार्धे ब्रह्मगीता सूतगीता च द्वे वा

४

८३

सूतगीताखंड चतुर्थउत्तरार्धं

स्वस्ति स्वस्ति श्रीगणेशाय नमः ॥ श्रीईश्वरं परमानंदमनंतं सत्यविग्रहं ॥ आत्मत्वेनैव पश्यंतं निस्तरंगसमुद्रवत् १ निर्विकल्पं सुसंपूर्णं सुप्रसन्नं शु
चिस्मितं भासयंतं जगद्भासा भानुमंतमिवापरं २ प्रणम्य मुनयः सूतं दंडवत्पृथिवीतले कृतांजलिपुटा भूत्वा तुष्टुवुः परया मुदा नमस्ते भग
१ वंछंभुप्रसादावाप्तवेदन नमस्ते भगवंछंभुचरणांभोजवल्लभ ४ नमस्ते शंभुभक्तानामग्रगण्य समाहित नमस्ते शंभुभक्तानामतीवहि
तबोधक नमस्ते वेदवेदांतपद्मखंडदिवाकर व्यासविज्ञानदीपस्य वर्तिभूताय ते नमः ६ पुराणमुक्तामालायाः सूत्रभू[illegible]ताय ते नमः अ
स्माकं भववृक्षस्य कुठाराय नमोस्तु ते कृपासागर सर्वेषां हितमस्तु नमोस्तु ते नमो विज्ञानदीपाय नमो ज्ञानगुणात्मने ८ मा[illegible]ताय मल्लो
नां व्यासशिष्याय ते नमः धर्मिष्ठाय नमस्तुभ्यं ब्रह्मनिष्ठाय ते नमः समाय सर्वजंतूनां सारभूताय ते नमः साक्षात्सत्यवरूणां तुस[illegible]नाय
नमो तेनमः १० नमोनमस्तुभ्यं पुनर्भूयो नमोनमः अस्माकं गुरवे सोत्रमः स्वात्मप्रदायिने एवं गोत्रर्षयस्तुत्वा सूतं सर्वहितप्रदं प्रश्नं प्रचक्रिरे सर्वे
सर्व लोकहितैषिणः १२ सोपि सूतस्ततः सिद्धस्वरूपानुभवात्मरात् उत्थाय स्वगुरुं व्यासं ध्यात्वा सर्वहितेरतं अस्मिन्नवसरे व्यासः साक्षात्स
त्यवतीसुतः भस्मोद्धूलितसर्वांगस्त्रिपुंड्रांकितमस्तकः १४ कृष्णाजिनी सोत्तरीय आषाढेन विराजितः रुद्राक्षमालाभरणो स्तत्रैवा
धा

विरभूत्स्वयं तदृष्ट्वा देशिकं द्वागां देशिकं करुणाकरं सूतः सत्यवतीसूनुं स्वशिष्यैः सहसत्तमैः १६ प्रणम्य दंडवद्भूमौ प्रसन्नेंद्रियमा
नसः यथार्हं पूजयामास दत्वा चासनमुत्तमं भगवानपि सर्वज्ञः साक्षात्सत्यवतीसुतः प्राह गंभीरया वाचा स्वशिष्यं मतिसत्तमः १८ भद्रम
स्तु सुसंपूर्णं सूत शिष्यम मास्तिक नवैषामपि किं कार्यमायातं कृहि मेनघ एवं व्यासवचः श्रुत्वा सूतः पौराणिकोत्तमः उवाच मधुरं वाक्यं लो
त्री कानां हितमुत्तमं २० सूत उ० इमे हि मुनयः शुद्धाः सत्यधर्मपरायणाः मद्दीनाश्रवले चैषामस्ति श्रद्धा महत्तरा भवत्प्रसादे सत्येव शक्यते
सा विभाषितुं यदि मे सत्त्रो भगवन्वक्तुं ज्ञापयाद्य मां २२ इति सूतवचः श्रुत्वा भगवान्करुणानिधिः त्वदीयामद्य तां गीतां वदेषामर्थिनां प्रभो
इत्युक्त्वा शिष्यमालिंग्य दर्शयंतस्य संस्थितान् सांबं सर्वेश्वरं ध्यात्वा निरीक्ष्यैनं कृपाबलात् २४ स्थापयित्वा महादेवं हृदये तस्य सुस्थिरं तस्यमू
र्धानमाघ्राय भगवानगमद्गुरुः सोपि सूतः पुनः सांबं ध्यात्वा देवं त्रियंबकं प्रणम्य दंडवद्भूमौ स्मृत्वा व्यासं च सद्गुरुं २६ कृतांजलिपुटो भूत्वा
मंत्रमाद्यषडक्षरं जपित्वा श्रद्धया साक्षान्निरीक्ष्य मुनिपुंगवान् कृतप्रणामो मुनिभिः स्वगीतां मतिनिर्मलां वक्तुमारभते सूतः सर्वलोक
हितेरतः २८ इति स्कंदपुराणे सूतसंहितायां यज्ञवैभवखंडे सूतगीतायां प्रथमोध्यायः १ सूत उ० शृण्वंतु ब्रह्मविच्छ्रेष्ठाः भाग्यवंतः समा
हिताः वक्ष्यामि परमं गुह्यं विज्ञानं वेदसंमतं १ अस्ति कश्चित्स्वतः सिद्धः सत्यज्ञानसुखाद्वयः विश्वस्य जगतः कर्ता यत्प्रकाशविलक्षणः आ
काशादीनि भूतानि पंच तेषां प्रकीर्तिताः गुणाः शब्दादयः पंच कर्मेंद्रियाणि च ज्ञानेंद्रियाणि पंचैव प्राणाद्यास्तथा वायवः मनो बुद्धिरहंकारश्चि
पंच

स्यात् तत्त्वेति चतुष्टयं ४ तेषां कारणभूतैका विद्यापद्दिंशकः पशुः विश्वस्य जगतः कर्ता पशोरन्यः शिवः ५ आत्मानः पशवः सर्वे प्रोक्ता अज्ञानिनः
सदा अज्ञानमात्मनामेषामनादेव स्वभावतः ६ संसारबीजमज्ञानं संसार्यज्ञः पुमान्यतः ज्ञानात्तस्य निवृत्तिः स्यात्सकाशात्तमसो यथा अज्ञा
२ र नाकारभेदेना विद्याख्येनैकेकेवलं पश्चनामात्मनां भेदः कल्पितो न स्वभावतः ८ अज्ञानाकारभेदेन मायाख्येनैव केवलं विभागः कल्पितो
विभोः परमात्मत्व लक्षणः घटाकाशमहाकाशविभागः कल्पितो यथा तथैव कल्पितो भेदो जीवात्मपरमात्मनोः १० यथा जीवबहुत्वं तु कल्पि
तं मुनिपुंगवाः तथा परबहुत्वं च कल्पितं न स्वभावतः यथोच्चावचभावस्तु जीवभेदेतु कल्पितः तथोच्चावचभावश्च परभेदे च कल्पितः १२
देहेन्द्रियादिसंघातवासनाभेदभेदिता अविद्या जीवभेदस्य हेतुर्नान्यः प्रकीर्तितः गुणानां वासनाभेदभेदिता या द्विजर्षभाः माया सा
परभेदस्य हेतुर्नान्यः प्रकीर्तितः १४ यस्य माया गतं सत्त्वं शरीरं स्यात्तमोगुणः संहाराय त्रिमूर्तीनां स रुद्रः स्यान्न चापरः तथा यस्य तमः सा
क्षात्शरीरं सात्त्विको गुणः पालनाय त्रिमूर्तीनां स विष्णुः स्यान्न चापरः १६ रजो यस्य शरीरं स्यात्तद्वोला दनाय च त्रिमूर्तीनां स वै ब्रह्मा भवे
द्विमान् न चापरः रुद्रस्य विग्रहं शुक्लं कृष्णं विष्णोश्च विग्रहं ब्रह्मणो विग्रहं रक्तं चिंतयेद्भुक्तिमुक्तये १८ शौक्ल्यं सत्त्वगुणो ज्ञानं रागो ज्ञानं रजो
गुणात् काष्ण्यं तमोगुणो ज्ञानमिति विद्यात्समासतः १९ परतत्त्वैकता बुध्या ब्रह्माणं विष्णुमीश्वरं परतत्त्वतया वेदा वदंति स्मृतयोपि च
२० पुराणानि समस्तानि भारतप्रमुखान्यपि परतत्त्वैकतावुध्या तत्परं प्रवदंति च ब्रह्मविष्ण्वादिरूपेण केवलं मुनिपुंगवाः ब्रह्मविष्ण्वा २

मं

दयस्त्वेव न परं तत्त्वमास्तिकाः २२ तथापि रुद्रः सर्वेषामुत्कृष्टः परिकीर्तितः स्वशरीरतया यस्मान्मनुते सत्त्वमुत्तमं रजसस्तमसः सत्त्वमुत्
कृष्टं हि द्विजोत्तमाः सत्त्वात्सुखं च ज्ञानं च प्रपंचि चिरयरंपरं २४ परतत्त्वप्रकाशस्तु रुद्रस्यैव महत्तरः ब्रह्मविष्ण्वादिदेवानां न तथा मुनिपुंग
वाः परतत्त्वतया रुद्रः स्वात्मानं मनुते भृशं परतत्त्वप्रकाशेन न तथा देवतांतरं २६ हरिब्रह्मादिरूपेण स्वात्मानं मन्वते भृशं हरिब्रह्माद
यो देवा न तथा रुद्र आस्तिकाः रुद्रः कथंचित्कार्यार्थं मनुते रुद्ररूपतः न तथा देवताः सर्वा ब्रह्मस्फुर्त्यल्पता बलात् २८ ब्रह्मविष्ण्वादयो देवाः
स्वात्मानं मन्वते जसा न कश्चित्तत्त्वरूपेण न तथा रुद्र आस्तिकाः ब्रह्मविष्ण्वादयो देवाः स्वात्मानं मन्वते जसा कथंचित्तत्त्वरूपेण न तथा रुद्र
आस्तिकाः ३० तत्त्वबुद्धिः स्वतः सिद्धा रुद्रस्यास्य तपोधनाः हरिब्रह्मादिबुद्धिस्तु तेषां स्वाभाविकी मता हरिब्रह्मादिदेवान्ये पूजयंति यथाव
लं अचिरान्नपरप्राप्तिस्तेषामस्ति क्रमेण हि ३२ रुद्रं ये वेदविच्छ्रेष्ठाः पूजयंति यथाबलं तेषामस्ति परप्राप्तिरचिरान्न क्रमेण तु रुद्राकारतया रुद्रो
वरिष्ठो देवतांतरात् इति निश्चयबुद्धिस्तु नराणां मुक्तिदायिनी ३४ गुणाभिमानिनो लेर इति बुद्धिस्तु सत्यं संसारकारणं उत्कृष्ट हरिब्रह्मादिदेवताः व
रिष्ठाः परतत्त्वात्र विशेषेण रुद्रो विष्णुर्विनामहः इति निश्चयबुद्धिस्तु सत्यं संसारकारणं ३६ रुद्रो विष्णुप्रजानाथः स्वराट् सम्राट् पुरंदरः परतत्त्वमिति
ज्ञानं नराणां मुक्तिकारणं अमात्यराजबुद्धिस्तु नरोपाय कल्पायहि तस्माद्ब्रह्म मतिर्मुख्या सर्वत्र न हि संशयः ३८ तथापि रुद्रे विमेदः परत
त्त्वमनिर्देश्य वरिष्ठा न तथान्येषु परस्फूर्त्यल्पता बलात् अस्ति रुद्रस्य विभेदा अंतः सत्त्वं बहिस्तमः विष्णोरंतस्तमः सत्त्वं बहिरस्ति रजोगुणः

त

सू॰सं॰ ४० अंतर्बहिश्च विप्रेंद्रा अखिलं स्यात्प्रजायते॥ अतीवैष्वगुणं सत्वं मनुष्या विवदंति च॥ हरिः श्रेष्ठो हरः श्रेष्ठ इत्यहो मोहवैभवं॥ सत्वाभावात्स
ज्ज्ञानाभावाद्वरिष्ठं नैव मन्वते॥ ४२ अनेकजन्मसिद्धानां श्रौतस्मार्तानुवर्तिनां॥ हरिः श्रेष्ठो हरेः साक्षादिति बुद्धिः प्रजायते॥ महापापवतां नॄ
णां हरिः श्रेष्ठो हरादिति॥ बुद्धिर्विजायते तेषां सदा संसारिणां वहि॥ ४४ निर्विकल्पे परे तत्वे श्रद्धा येषां विजायते॥ अयत्नसिद्धा परमा मुक्तिस्तेषां
न संशयः॥ निर्विकल्पं परं तत्वं नाम साक्षाच्छिवः परः॥ सोयं साक्षात्त्रिनेत्रश्च चंद्रार्द्धकृतशेखरः॥ ४६ स्वात्मतत्वसुखस्फूर्तिप्रमोदान्नाडवृत्ती
यः॥ रुद्रविष्णुप्रजानाथैरुपास्यो गुणमूर्तिभिः॥ ईदृशी परमा मूर्तिर्यस्यासाधारणी सदा॥ नहि सा ह्यास्पदं तत्वं नान्यस्य सत्यमेव हि तं ४८ विष्णुं
ब्रह्माणमन्यं वा स्वमोहान्मन्वते परं॥ न तेषां मूर्तिरेषास्ति तत्त्वेन परं पदं॥ तस्मादेषा परा मूर्तिर्यस्यासाधारणा भवेत्॥ स शिवः सच्चिदानंदः साक्षा
त्तत्वं न चापरः॥ ५० ब्रह्माविष्ण्वीश्वरुद्रश्च विभक्ता अपि पंडिताः॥ परमात्मविभागस्या न जीवव्यूहसंस्थिताः॥ अविद्योपाधिको जीवो न मायोपा
धिकः खलु॥ मायोपाधिकचैतन्यं परमात्मा हि नापरं॥ ५२ मायाकार्यगुणच्छन्ना ब्रह्मविष्णुमहेश्वराः॥ मायोपाधिपरव्यूहा न जीवव्यूहसंस्थिताः॥
परमात्मविभागत्वं ब्रह्मादीनां द्विजर्षभाः॥ समानमपि रुद्रस्तु वरिष्ठो नात्र संशयः॥ ५४ ब्रह्माविष्ण्वीश्वरुद्रस्य स्वासाधारणरूपतः॥ स्वभ
त्या चात्मना चापि कुर्वीत एव सेवनं॥ रुद्रस्यैव स्वरूपेण विष्णोश्च वरुणस्तथा॥ सेवनं नैव कुर्वीत विभूतेर्वा द्वयोरपि ५६ केवलं कृपया रुद्रो लो
कानां हितकाम्यया॥ स्वविभूत्यात्मना विष्णोर्ब्रह्मणश्चापरस्य च॥ करोति सेवां हे विप्राः कदाचित्सत्यमीरितं॥ न तथा ब्रह्मणा विष्णुर्न ब्रह्मा ३

न पुरंदरः॥ ५८ एतावन्मात्रमालंब्य रुद्रं विष्णुं प्रजापतिं॥ मन्वते हि समं मर्त्या माययापरिमोहिताः॥ केचिदेषां महायासात्साम्यं वांछंति मोहिताः
हरेरजस्य चोत्कर्षं हराद्वांछंति केचन॥ ६० रुद्रेण साम्यमन्येषां वांछंति च विमोहिताः॥ ते महापातकैर्युक्ता यास्यंति नरकार्णवं॥ रुद्रादुत्कर्षम
न्येषां ये वांछंति विमोहिताः॥ पच्यंते नरके तीव्रे सदा तेन हि संशयः॥ ६२ केचिद्द्वैतमाश्रित्य वैडालव्रतिका नराः॥ साम्यं छिद्रत्वेपि रुद्रेण सर्वेषां प्र
वदंति विमोहिताः॥ देहाकारेण चैकत्वे सत्यपि द्विजपुंगवाः॥ शिरसा पादयोः साम्यं सर्वथा नास्ति हि द्विजाः॥ ६४ यथास्यापानयोः साम्यं छिद्रत्वेपि
न विद्यते॥ तथैकत्वेपि सर्वेषां रुद्रसाम्यं न विद्यते॥ विष्णुप्रजापतींद्राणामुत्कर्षं शंकरादपि॥ प्रवदंतीव वाक्यानि श्रौतानि प्रतिभांति च॥ ६६ पौराणि
कानि वाक्यानि स्मार्तानि प्रतिभांति च॥ तानि तत्वात्मना तेषामुत्कर्षं प्रवदंति हि॥ विष्णुप्रजातींद्रेभ्यो रुद्रस्योत्कर्षमास्तिकाः॥ वदंति यानि वाक्यानि
तानि सर्वाणि वै द्विजाः॥ ६८ प्रवदंति स्वरूपेण तथा तत्वात्मनापि च॥ नैवं ब्रह्मादिदेवानामिति तत्त्वव्यवस्थितिः॥ बहुनोक्तेन किं ज्ञानी वा त्रिमूर्तीनां १
विभूतयः॥ वरिष्ठा हि विभूतिभ्यस्त्वेव रिष्ठा न संशयः॥ ७० तेषु रुद्रो वरिष्ठश्च ततो मायी परः शिवः॥ मायाविशिष्टात्सर्वज्ञः सांबः सत्यादिलक्षणं व
रिष्ठो मुनयः साक्षाच्छिवो नात्र विचारणा॥ शिवाद्वरिष्ठो नैवास्ति मया सत्यमुदीरितं॥ ७२ शिवस्वरूपमालोड्य प्रवदामि समासतः॥ शिवादन्यत
याभातं शिव एव न संशयः॥ शिवादन्यतयाभातं शिवं यो वेद वेदतः॥ स वेद परमं तत्त्वं नास्ति संशयकारणं॥ ७४ यः शिवं सकलं साक्षाद्वेदांतवा
क्यतः॥ समुक्तो नात्र संदेहः सत्यमेव मयोदितं॥ भासमानमिदं सर्वं भानमेवेति वेद यः॥ स मानरूपं देवेशं याति नात्र विचारणा॥ ७६ प्रतीतम

स

प्रतीतं
खिलं शंभुं तर्केण स्वप्रमाणतः सानुभूत्या च यो वेद स एव परमार्थवित् ७७ जगद्रूपतयाप्यस्य तत्त्वं नैव प्रपश्यति प्रतीतमखिलं ब्रह्म संपश्य
त्यहि संशयः ७८ अप्रतीतं च सत्यं च परः शिवः इति वेदान्तवाक्यानां निष्ठा का सुदुर्लभा ७९ इति सकलं तत्पया मयोदितं वः श्रुतिवचसा
कथितं यथा तथैव यदि हृदये निहितं समस्तमेतत् परमगतिर्भवतामिहैव सिद्धा ८० इति श्रीसूतसंहितायां यज्ञवैभवखंडे सूतगीतायां द्वि
तीयोध्यायः २ सूत उ० शिवात्सत्यपरानंदप्रकाशैकस्वलक्षणात् आविर्भूतमिदं सर्वं चेतनाचेतनात्मकं १ अद्वितीयो विकारी च निर्मलः
स शिवः परः तथापि सृजति प्राज्ञाः सर्वमेतच्चराचरं मणिमंत्रौषधादीनां स्वभावोपि न शक्यते किमु वक्तव्यमाश्चर्यं विभोरस्य परात्मनः ३ श्रु
तिः सनातनी साक्षी सर्वमानोत्तमोत्तमा माह चाद्वैतनैर्मल्यं निर्विकारत्वमात्मनः ४ सर्गस्थित्यंतमप्याह चेतनाचेतनस्य च अतींद्रिया
र्थविज्ञाने मानितः श्रुतेर्मानं तत् श्रुतिरेव हि श्रुत्यैकगम्ये स्वस्मार्थे स तर्कः किं करिष्यति मानानुग्राहकस्तर्को न स्वतंत्रः कदाचन ६ श्रु
तिः सनातनी शंभोरभिव्यक्ता न संशयः शंकरो न प्रमाणेन निर्वक्तव्यः परे जनाः ७ यदा सा नाभिव्यक्तैव तदा मानवती वसा स्वतश्च परतो दोषो ना दो
स्ति यस्माद्द्विजर्षभाः स्वतो दोषेण नैवास्य विघ्नेस्त्वस्मद्दर्शने अस्ति चेद्वक्तारस्य लोप एव प्रसज्यते ८ परतश्च न दोषोऽस्ति परस्याभावतो द्विजाः
स्वतो दुष्टोपि शब्दस्तु मानमेवाप्रसंगमात् १० इति वार्तापि वार्तैव मुनीशाः स्वस्मदर्शने स्वतो दुष्टः कथं मानं भवत्याप्यस्य संगमात् यत्संबंधेन
यो भावो यस्य प्राज्ञाः प्रसिध्यति स तस्य भ्रांतिरेव स्यान्न स्वभावः कथंचन १२ जपाकुसुमलौहित्यं विभाति स्फटिके स्वतः तथापि तस्य लौहि ४

त्यं भ्रांतिरेव न वास्तवं वह्निपाकजलौहित्यं मृत्तिकायां न वास्तवं लौहित्यं तेजसां शस्तु नेष्टिकायां निरूपणे १४ अन्यत्रान्यस्य धर्मस्तु प्रती
तो भवि भ्रमो मतः आप्तापेक्षी तु शब्दस्तु प्रामाण्याय न सर्वथा अनाप्तयोगाच्छब्दस्य प्रामाण्यं मुनिपुंगवाः स्वतः सिद्धं तिरोभूतं तस्य नाशाय हि
केवलं १६ यदा सा शंकरेणोक्ता तदापि श्रुतिरास्तिकाः प्रमाणं सुतरामामतमप्येव महेश्वरः सर्वदोषविहीनस्य महाकारुणिकस्य च सर्वज्ञस्य
व शुद्धस्य कथं दोषः प्रकल्प्यते १८ सर्वदोषविशिष्टस्य निर्घृणस्य दुरात्मनः अल्पज्ञस्य च जीवस्य दर्शनान्नाभिहिंसनेमाः १९ यस्य स्मरणमा
त्रेण समलो निर्मलो भवेत् वृत्तस्य तपोनिष्ठः कथं समलिनो भवेत् २० अतः पक्षद्वयेनापि वेदो मानं न संशयः वेदेनादिशिवत्तस्य व्यंजकः प
प दिं६ रमार्थतः अभिव्यक्तिमपेक्ष्यैव प्रमाणेनोच्यते शिवः तस्माद्वेदोऽर्थोऽयथार्थो नात्र संशयः २२ इहतावन्मया प्रोक्तम द्वितीयः परः शिवः तथापि तेन
सकलं निर्मितं तत्स एव हि चित्स्वरूपः शिवश्चैव त्वं जगत्सर्वं चराचरं तथा सति विरुद्धं तज्जगद्धेतुः कथं भवेत् २४ इत्येवमादि चोद्यस्य हि जंतोर्नास्ति
संभवः यत्र वेदविरोधस्यात्तत्र बोधस्य संभवः चोदनालक्षणे धर्मे नियथा चोद्यसंभवः तथा न चोदनागम्ये शिवे चोद्यस्य संभवः २६ वाध्यवा १६
धकभावस्तु व्याधिभेषजयोर्यथा शास्त्रेण गम्यते तद्वदयमर्थोपि नान्यतः ईश्वरस्य स्वरूपे च जगत्सर्गादिषु द्विजाः अतींद्रियार्थेष्वन्येषु
मानं नः श्रुतिरेव हि २८ अथवा देवदेवस्य सर्वदुर्घटकारिणी शक्तिरस्ति तया सर्वं घटते मायया नघाः प्रतीतिसिद्धा सा माया न तत्त्वतोऽत्र न संशये
यः तया दुर्घटकारिण्या सर्वं तस्योपपद्यते ३० सातिश्चतु महामाया सर्वदुर्घटकारिणी वेदमानेन संसिद्धा सर्वसंज्ञा स्वमेव हि ३१

५

सू·य·सू चोद्यानर्हं तु वेदार्थे चोद्यं कुर्वन्त्यनल्पधः अतः सर्वं परित्यज्य वेदमेकं समाश्रयेत् ३२ रूपावलोकने चक्षुर्यथासाधारणं भवेत् तथाध
र्मादिविज्ञाने वेदोसाधारणः परः रूपावलोकने स्वेदं यथा घ्राणं न कारणं तथा धर्मादिबुद्धस्तु हिंसास्त्रं कोन कारणं ३४ तस्माद्वेदेन दि
ते नैव प्रकारेण महेश्वरः अद्वितीयः स्वयं शुद्धस्तथापि हि जगन्ननः आविर्भूतं तिरोभूतं तस्य एव सकलं जगत् वैभवं तस्य विज्ञातुं नश
क्यं भाषितुं मया ३६ स एव साहसी साक्षात्सर्वरूपतया स्थितः परिज्ञातुं च वक्तुं च समर्थो नापरः सुमान् यथा यः पावकेनेद्धं भातीव दहती
पच तथा वेदशिखैर्निद्धः सर्वं वस्त्ववभासते ३८ अयो वा यवसं क्रान्तो यथा दहति पावकः तथा वेदसुसंक्रान्तः शिवः सर्वार्थसाधकः
तथापि वेदरहितः स्वयं धर्मादिवस्तूनि न प्रमाणं विनानेन वेदेऽपि द्विजपुंगवाः ४० तस्माद्देवो महेशोद्वः प्रमाणैः सर्ववस्तूनि अन्यथान
जडः शास्त्रातीन्द्रियार्थस्य साधकः मेरुपार्श्वे तपस्तप्त्वा पुरा शंभुं जगद्गुरुं अयमर्थो मया ज्ञातस्तस्य प्रसादतः ४२ तदाज्ञयैव विप्रेन्द्राः संहि लत
पो नेयं मेरिता अहं सुरोपि युष्माकं महतामपि देशिकः अभवं स शिवस्याज्ञा लंघनीया न केनचित् शिवस्याज्ञा बलाद्धि तुर्जायते न प्रिय
नेपि च ४४ ब्रह्मा सर्वजगत्कर्ता विराट् सम्राट् स्वराडपि स्वरोऽन्तरवः हुमन्त्रब्रह्मविष्णवादयोऽभवन् तस्माद्गुरुत्वं मे विप्रा युज्यते न
हि संशयः शिष्यत्वं चापि युष्माकं स्वतंत्रः खलु शंकरः ४६ महादेवस्य भक्तोऽस्त्रं न हन्ता अपि देहिनः स्वतंत्रा वेदविद्रेशाः किं पुनः स
महेश्वरः स्वातंत्र्याद्धि शिवेनैव विधिसृष्टं विना मन्त्रं ब्रह्मणश्च शिरश्छिन्नं विष्णोरपि तथैव च ४८ स्वातंत्र्याद्धि तेनेन मुनीन्द्रा ब्रह्म ५

वादिनः तत्प्रसादान्मया सर्वं विहितं करबिल्ववत् प्रसादबलतः साक्षात्स्यार्थः कथितो मया प्रसादेन विना वक्तुं को वा शक्तो मुनीश्वराः
तः ५० तस्मात्सर्वं परित्यज्य श्रद्धया परया सह मदुक्तं परमाद्वैतं विद्याद्देहोहितं बुधाः विज्ञानेन विनान्येन नास्ति मुक्तिर्न संशयः अतो
यूयमपि मदाज्ञातो भवताद्वैतवादिनः ५२ परमाद्वैतविज्ञानं सिद्धं स्वानुभवेन च श्रुतिस्मृतिपुराणाद्यैस्तर्कैर्वेदानुसारिभिः परमाद्वैत
विज्ञानमेव मास्त्वं यथास्थितं नान्यत्तर्कैश्च हंतव्यमिदमाम्नायवाक्यजं ५४ विनैव परमाद्वैतं भेदं केचन मोहिताः कल्पयंति नराशं
भुः सद्वितीयो भविष्यति आम्नायार्थं महाद्वैतं नैव जानंति ये जनाः वेदसिद्धं महाद्वैतं को वा विज्ञातुमर्हति ५६ भिन्नाभिन्नतया द्वैतं परमाद्वैतल
क्षणं कल्पयंति महामोहात्केचित्तच्च न संगतं भेदाभेदौ विभेदांशे मिथ्या भवति सत्तमाः भेदानिरूपणादेव धर्म्यादेरनिरूपणात् ५८ न
स्वाच्चासीश्वरादन्यत् किंचिदप्यस्ति कोत्तमाः द्वितीयाद्वै भयं जंतोर्भवतीत्याह हि श्रुतिः को मोहस्तत्र कः शोक एकत्वमनुपश्यतः इतिचा
हहि साक्षाच्छ्रुतिरद्वैतमास्तिकाः ६० एकत्वमेव वाक्यार्थो नापरः परमास्तिकाः स्मृतिनिंदविरुद्धं तं भेदो यदि विवक्षितः ६१ अतीवशुद्ध
चित्तानां केवलं करुणाबलात् परमाद्वैतमाम्नायात्संभाति श्रद्धया सह ६२ शिवभट्टारकस्यैव प्रसादे पुष्कले सति परमाद्वैतमाभाति यथाव
त्वान्येहेतुना न भाति परमाद्वैतं प्रसादरहितस्य तु दुर्लभः खलु देवस्य प्रसादः परमास्तिकाः ६४ अतश्च वेदोदितवर्त्मनैव विहाय चाह
तरजन्मबुद्धिं विमुक्तिकामः परमाद्वितीयं समाश्रयेद्देवशिवस्वरूपं ६५ इति श्रीसूतसं· यज्ञवै· सूतगीतायां तृतीयोध्यायः ३

सू॰य॰स॰ सूत उवाच॰ ईश्वरो जगतः कर्ता मायया स्वीयया पुरा अभेदेन स्थितः पूर्वकल्पवासनयान्वितः १ कालकर्मानुगुण्येन स्वाभिन्नस्वीयमायया
अभिन्नोपि तया स्वस्य भेदं कल्पयति प्रभुः २ कल्पितोयं द्विजा भेदो नाभेदस्य बाधने सह कल्पितानामवस्तुत्वाद्विरोधश्च न सिध्यति ३ पु
६ नःपूर्वं स्वकल्पस्ववासनावशतोनघः ईक्षिता पूर्ववद्भूत्वा स्वशक्त्या परया पुनः ४ मायया गुणभेदेन रुद्रं विष्णुं पितामहं सृष्ट्वा तु प्राविशत्ते ता
षामंतर्यामितया हरः ५॰ तेषां रुद्रः परः भेदात्परतत्त्ववदेव तु करोति सर्गस्थित्यंतं रुद्ररूपेण सत्तमाः ६ संहरत्यविशेषेण जगत्सर्वं
चराचरं विष्णुरप्यास्तिकाः साक्षात्पराभेदेन केवलं करोति॰ विष्णुरूपेण हे द्विजाः पालयत्यविशेषेण जगत्सर्वं चराचरं ८ ब्रह्मापि मुनि
शार्दूलाः पराभेदेन केवलं करोति॰ ब्रह्मरूपेण सत्तमाः करोति विविधं सर्वं जगत्सर्वं यथा तथा सृष्ट्यादित्रितयं तत्त्वपरस्यैव शिवस्य
तु १० सर्वान्तःकरणानां तु समष्टेः स्थिरास्तिकाः त्रिमूर्तीनां हरस्यैव प्राधान्येन न संशयः प्राणानामपि सर्वेषां समष्टेः स्थितिकाः रास्ति
अपि रुद्रस्य तस्यैव प्राधान्येन न संशयः १२ सर्वज्ञानेंद्रियाणां तु समष्टीनां जनिर्द्विजाः त्रिमूर्तीनां ह॰ १३ सर्वकर्मेंद्रियाणां तु समष्टीनां
जनिर्द्विजाः त्रिमूर्तीनां॰ १४ तथापि परमं तत्त्वं त्रिमूर्तीनां तु कारणं ब्रह्मविष्णुमहेशानां स्रष्टा नुपकरोति च उपचारतया तेपि संहारद्
तिशश्चिताः तत्रापि तत्त्वतः सृष्ट्वा ब्रह्मैवाद्वयमास्तिकाः १६ व्यष्टयस्तु समष्टिभ्यो जायंते ब्रह्मणानघाः समष्टिषु विजायंते देवताः पूर्व
कल्पवत् समष्टिव्यष्टिरूपाणां स्रष्टानां पालको हरिः रुद्रस्तेषां तु संहर्ता द्विजा रूपांतरेण च १८ या देवतांतःकरणसमष्टेः पूर्वकल्पव
६

ता
त् विज्ञाता समुनिश्रेष्ठा रुक्मगर्भ इतीरितः १९ ज्ञानानां समष्टेर्या सत्त्वात्मसमाह्वयः दिग्वाय्वर्कजलाध्यक्षपृथिव्याख्यास्तु देवताः २०
जायंते क्रमशः श्रोत्रप्रमुखेषु समष्टिषु पादपाण्यादिषु प्राज्ञाः कर्मेंद्रियसमष्टिषु त्रिविक्रमेंद्रप्रमुखा जायंते देवताः क्रमात् समष्टिषु विज्ञा
तायां देवतास्ता यथाक्रमं २२ व्युष्टिभूतेंद्रियाणां तु नियंत्र्यो देवता द्विजाः मारुतस्त्वगधिष्ठाता दिग्देवी कर्णदेवता नेत्राभिमानी सूर्यः स्याज्जि
ह्वायां वरुणस्तथा घ्राणाभिमानिनी देवी पृथिवीति प्रकीर्तिता २४ अग्निर्वागभिमानी स्यादुपस्थस्य प्रजापतिः पायोर्मित्रोभिमान्यास्तां पाद
स्यापि त्रिविक्रमं इंद्रो हस्तनियंतास्याच्छिवः सर्वनियामकः मनो बुद्धिरहंकारश्चित्तं चेति चतुर्विधं २६ स्यादंतःकरणं प्राज्ञाः क्रमात्तेषां हि देवताः
ताः चंद्रो वाचस्पतिर्विप्राः साक्षात्कालाग्निरुद्रकः शिवो वेति मायाभोक्ताः साक्षाद्देहांतपारगाः आकाशादीनि भूतानि स्थूलानि पुनरास्ति
काः २८ जायंते सूक्ष्मभूतेभ्यः पूर्वकल्पे यथा तथा अंडभेदास्तथा लोकभेदास्तेषु च चेतनानि चान्यं अचेतनानि चान्यानि भौतिकानि च पूर्व
वत् विजायंते च भोगार्थं चेतनानां शरीरिणां ३० ओंकारः प्रणवः सर्वं शिवो भोजयिता परः सुखदुःखादिसंसारैर्भोगैः सर्वमिदं सुराः स्व
७ प्नवद्देवदेवस्य मायैव विनिर्मितं मायया निर्मितं सर्वं मायैव हि निरूपणे ३२ कारणव्यतिरेकेण कार्यं नेति हि दर्शितं मायापि कारणत्वेन कल्पि
ता मुनिपुंगवाः अधिष्ठानातिरेकेण नास्ति तत्त्वनिरूपणे व्यवहारदृशा माया कल्पना नैव वस्तुतः ३४ वस्तुतः परमाद्वैतं ब्रह्मैवास्ति न चेतरत्
मायारूपतया साक्षाद्ब्रह्मैव प्रतिभासते ३५ जगज्जीवादिरूपेणाप्यहो देवस्य वैभवं स्वस्वरूपातिरेकेण ब्रह्मणो नास्ति किंचन तथापि स्वाति

रेकेरणभातिहृदे वैवैभवं जगदात्मतयापश्यन्ध्यानेन विमुच्यते ३७ सर्वमेतत्परं ब्रह्म पश्यन्स्वानुभवेन तु मुच्यते घोरसंसारात्स
एव न संशयः ३८ सर्वमेतत्परं ब्रह्म विदित्वा सुदृढं बुधाः मानतर्कानुभूत्यैव गुरुतया च कप्रसादतः ज्ञानमाकृष्टबाहुल्यात् ज्ञानं च सात्म
नैव तु स्वात्मना केवलेनैव तिष्ठन्मुच्येत बंधनात् ४० य एवं वेद वेदार्थं स मुच्येत स तु बंधनात् सोयानक्रमतश्चैव पश्यन्नात्मानमद्वयं सर्वं
जगदिदं विप्राः पश्यन्नपि न पश्यति भासमानमिदं सर्वं भानरूपं परं पदं ४२ पश्यन्वेदान्तमानेन सद्य एव विमुच्यते एवमात्मानमद्व
तमपश्यन्नेव पश्यतः जगदात्मतया भानमपि स्वात्मैव केवलं विदित्वैवं महायोगी जगद्भानेपि निश्चलः ४४ यथा भातमिदं सर्वम
नु जानाति चात्मना निषेधति च तत्सिद्धिरनुज्ञानस्य केवलं तदसिद्धिर्निषेधोस्य सिद्धसिद्धी च तस्य नः प्रकाशात्मतया साक्षात्स्थि ते
तिरेवास्य केवलं ४६ विद्यतेनैव विज्ञानं नान्यज्जगत्सदा प्रकाशात्मतया साक्षात्स्थितिरित्यपि भाषणं अहं वदामि मोहेन तत्र च तस्मिन्न विद्यते
तस्य निष्ठा मया वक्तुं विज्ञातुं च न शक्यते ४८ शब्दमात्रेण यत्किंचिज्जल्प्यते भ्रान्तचेतसा ४९ इति गुह्यमिदं कथितं मया निखिलोपनि
षद्धृदयंगमं हर यद्‌कं जलोचन पालितं विहितं यस्विदं विदं वसः ५० इति श्रीस्कंदे सूतसं॰ यज्ञवै॰ सूतगीतायां चतुर्थः सर्गः ४ सूत उ॰
वक्ष्यामि परमं गुह्यं युष्माकं मुनिपुंगवाः विज्ञानं वेदसंभूतं भक्तानामुत्तमोत्तमं रुद्रविष्णुप्रजानाथप्रमुखाः सर्वचेतनाः स्वरसेनाहमि
त्याहुरिदमित्यपि च स्वतः २ इदं बुद्धिश्च बाह्यार्थे त्वहं बुद्धिस्तथात्मनि प्रसिद्धा सर्वजंतूनां विवादोत्र न कस्यचन इदमर्थे घटादौ देह ७

तानंत

नात्मत्वं सर्वदेहिनां अहमर्थेन तथा सत्त्वमपि सिद्धं स्वभावतः ४ एवं समस्तजंतूनामनुभूतिर्व्यवस्थिता भ्रान्ता अपि न कुर्वन्ति वि
वादं चात्र सत्तमाः एवं व्यवस्थिते ह्यर्थे सति बुद्धिमतां वराः संसारविषवृक्षस्य मूलछेदनकांक्षिभिः ६ यत्र यत्रेदमित्येषा बुद्धिर्दृष्टा
स्वभावतः तत्र तत्र त्वनात्मत्वं विज्ञातव्यं विचक्षणैः यत्र यत्राहमित्येषा बुद्धिर्दृष्टा स्वभावतः तत्र तत्र तथात्मत्वं विज्ञात
व्यं मनीषिभिः ८ शरीरे दृश्यते सर्वैरिदं बुद्धिस्तथैव च अहं बुद्धिश्च विप्रेन्द्रा न तस्ते भिन्नगोचरे शरीरालंबना बुद्धिरिदमित्यस्ति को
तमाः चिरत्वालंबना साक्षादहं बुद्धिर्न संशयः १० इदमर्थशरीरे तु याहमित्युदिता मतिः सा महाभ्रान्तिरेव स्यात्तस्मिन्स्तद्धृत्वद्धितः ८
अचिद्रूपमहंबुद्धेः पिंडनालंबनं भवेत् मत्पिंडादिषु दृष्टत्वात्ततो नात्मैव विग्रहः १२ अचित्त्वादिंद्रियाणां च प्राणस्य मनसस्तथा अलंबनत्वं
नास्त्येव बुद्धेश्चाहमिति प्रति बुद्धेरचित्संगात्स्वदृष्टत्वाज्जन्मनाशयोः अचिद्रूपस्य कुड्यादेः खलु जन्मविनाशनं १४ अहंकारस्य चा
चित्ताचित्तस्य च तथैव च आलंबनत्वं नास्त्येव सदाहंप्रत्ययं प्रति सर्वप्रत्ययरूपेण सदाहंकार एव हि विवर्तते ततो हंकारस्त्वनात्मेव शरी
रवत् १६ परिणामस्वभावस्य क्षीरादेर्द्विजपुंगवाः अचेतनत्वं लोकेस्मिन्प्रसिद्धं खलु सत्तमं तस्माच्चिद्रूप एवात्माऽहंबुद्धेरर्थ आस्तिका
: अचिद्रूपमिदं बुद्धेर्नास्त्येवार्थ इतीरितः १८ सत्यपि प्रत्ययाद्येषु प्रत्यगात्मा स्वयंप्रभः वृत्त्यधीनतया नैव विभाति घटकुड्यवत् सहवृ
त्तिमनुमाय वृत्तेः साक्षितया स्थितः वृत्त्यानिवर्त्यमज्ञानं प्रसतेस्व न तेजसा २० अनुप्रविष्टचैतन्यसंबंधाद्धि रास्तिकाः जडरूपं

घटाद्यर्थावभासस्य स्यात्स्वरूपवत् अतोहंप्रत्ययार्थोपि नान्यात्मा स्याद्घटादिवत् स्वयंप्रकाशरूपेण साक्षात्सैव केवलं २३ यत्संबंधाद
सते हंवृत्तिः प्रत्यक्त्वेनावभासते कथं प्रत्ययार्थो न प्रकाशः स्यात्स्वयंप्रभः अहंवृत्तिः स्वतः सिद्धचैतन्ये द्वावभासते तत्संबंधादहंकारः प्रत्यगी
वप्रकाशते २४ आत्माहंप्रत्ययाकारसंबंधभ्रांतिमात्रतः कर्ता भोक्ता सुखी दुःखी ज्ञाता निर्भासते २५ वस्तुतस्तस्य नास्त्येव चिन्मा प्रति
त्रात्परं वपुः चिद्रूपमेव स्वाज्ञानादन्यथा प्रतिभासते २६ सर्वदेहेष्वहंरूपः प्रत्ययोयः प्रकाशते तस्यार्थश्चिद्रूप एवात्मा साक्षादद्येन चाप
रः गौरिति प्रत्ययस्यार्थो यथा गोत्वं तु केवलं तथाहंप्रत्ययस्यार्थश्चिद्रूपात्मैव केवलं २८ व्यक्तिसंबंधरूपेण गोत्वं भिन्नं प्रतीयते चि
दहंकारसंबंधाद्भेदेन प्रतिभाति च यथैवैको गोशब्दो भिन्नार्थो व्यक्तिभेदतः तथैवैकोप्यहंशब्दो भिन्नार्थो व्यक्तिभेदतः ३० यथा प्रती
गौ त्या गोव्यक्तिशब्दार्थो न तत्त्वतः तत्त्वतो गोत्वमेवार्थः साक्षाद्द्विजवराः तथा प्रतीत्याहंकारो हंशब्दार्थो न तत्त्वतः तत्त्वतः प्रत्यगात्मैव
स एवाखिलसाधकः ३२ एकत्वेपि पृथक्त्वेन व्यपदेशोपि युज्यते अंतःकरणभेदेन साक्षिणः प्रत्यगात्मनः रुद्रविष्णुप्रजानाथप्र
मुखाः सर्वचेतनाः चिन्मात्रात्मन्यहंशब्दं प्रयुंजते हि तत्त्वतः ३४ सुषुप्तिस्मृतिसिद्धोयं सुषुप्तौ दुःखितो जनः सुषुप्तकालीनस्वात्म
न्यहंशब्दं द्विजोत्तमाः प्रयुंक्ते तत्र देहादिविशेषाकारभासनं नहि केवलचैतन्यं सुषुप्तेः साधकं स्वतः ३६ प्रतिभाति नतः सुप्तिश्चिन्मा
त्रे प्रत्यगात्मनि अहंशब्दः प्रवृत्तिः स्यान्नतु सोपाधिकात्मनि यथायो दहतीत्युक्ते वह्निर्दहति केवलं नायस्तद्वदहंशब्दश्चैतन्यस्यैव वा ८

ले

दादेवसर्वेषां सर्वसिद्धिर्महेशितुः ५६ प्रसादे शांभवे सिद्धे सर्वं शंभुतया सतः विभाति नान्यथा विप्राः सत्यमेव मयोदितं यदा शंभुतया सर्वं
विभाति स्वत एव तु तदा हि शांभवः साक्षात्प्रसादः सत्यमीरितं ५८ शिवादन्यतया किंचिदपि भाति यदा द्विजाः तदा न शंकरे बोधः संजात इति
मे मतिः शिवादन्यतया सर्वं प्रतीतमपि पंडिताः तत्त्वदृष्ट्या शिवं सर्वं सुस्थिरं परिपश्यति ६० शिवाकारेण वा नित्यं प्रपंचाकारतोपि वा जी
वाकारेण वा भांतं यत्तद्ब्रह्मैव चिंतयेत् शंभुरेव सदा भाति सर्वाकारेण नापरः इति विज्ञानसंपन्नः शंकरः ६२ शंभुरूपतया सर्वं य
स्य भाति स्वभावतः न तस्य वैदिकं किंचिन्नांत्रिकं वापि लौकिकं यथाभातस्वरूपेण शिवं सर्वं विचिंतयेत् योगी चरति लोकान्नामुक्त
राधनान्यथा ६४ स्वस्वरूपातिरेकेण निषिद्धं विहितं तु वा न पश्यति महायोगी भाति स्वात्मतयाखिलं चंडालगेहविप्राणां गृहे
वा परमार्थवित् भक्ष्यभोज्यादिवैषम्यं न किंचिदपि पश्यति ६६ यथेष्टं वर्तते योगी शिवं सर्वं विचिंतयेत् तादृशो हि महायोगी कोवा
तस्य निवारकः बहुनोक्तेन किं साक्षाद्देशिकस्य निरीक्षणात् प्रसादाद्देवरुद्रस्य परशक्तेस्तथैव च ६८ श्रुतिभक्तिबलात् [illegible] परिपा
केवलादपि शिवरूपतया सर्वं स्वभावादेव पश्यति शिवः सर्वमिति ज्ञानं शंकरं शोकमोहनुत् अयमेव हि वेदार्थो नापरः सत्यमी
रितं ७० श्रुतौ भक्तिर्गुरौ भक्तिः शिवे भक्तिश्च देहिनां साधनं सत्यविद्यायाः सत्यमेवमयोदितं ७१ सोपानक्रमतो लब्धं विज्ञानं यस्य सु
स्थिरं तस्य मुक्तिः परा सिद्धा सत्यमेवमयोदितं ७२ नित्यमुक्तस्य संसारो भ्रांतिसिद्धः सदा खलु तस्माज्ज्ञानेन नाशः स्यात्संसारस्य नक ९

सा

चकः ४९ मतीत्यावह्निसंबंधाद्यथायोदाहकं तथा चित्संबंधादहंकारोहंशब्दार्थः प्रकीर्तितः चैतन्येनाहसंस्पर्शाद्देहादेभ्यो नचेतसः अहं
शब्दः प्रयोगः स्यात्तथाहं मत्ययोपि च ५० इत्थं विवेकेनतः साक्ष्यं देहादिभ्यः पूर्वकं अंतःकरणमात्मानं विभज्य स्वात्मनः पृथक् सर्वसाक्षिण
मात्मानं स्वयंज्योतिः स्वलक्षणं सत्यमानंदमद्वैतमहमस्मीति चिंतयेत् ५२ ब्रह्मविष्णुमुखा नाम समस्ताः सर्वचेतनाः अहमेव परं ब्रह्मेत्याहुरन्या
नमेव हि ते तु चिन्मात्रमद्वैतमहमर्थतया भ्रमात् अतोहमहमद्वैतं ब्रह्मेत्याहुर्न देहतः ५४ चिन्मात्रं सर्वगं सत्यं संपूर्णसुखमद्वयं साक्षा
द्ब्रह्मैव नैवान्यदिति तत्त्वविदां स्थितिः शास्त्रं सत्यचिदानंदमनंतं वस्तु केवलं शुद्धं ब्रह्मेति संप्राह वेदविदां वरः ५६ प्रत्यगात्मायमद्वं
द्वः साक्षी सर्वस्य सर्वदा सत्यज्ञानसुखानंदलक्षणः सर्वदानघाः अनीषं सत्यगात्मैव स्वानुभूत्येकगोचरः शास्त्रसि[illegible] परं ब्रह्म नापरं परमार्थ
८ तः ५८ एवं तर्कप्रमाणाभ्यामाचार्योक्त्या च मानवः अविज्ञाय शिवात्मैक्यं संसारे पतति भ्रमात् ५९ शास्त्राचार्योपदेशेन तर्कैः शास्त्रानु
सारिभिः सर्वसाक्षितयात्मानं सम्यग्ज्ञात्वा स्थिरः सुस्थिरः ६० स्वात्मनोन्यतयाभातं समस्तमविशेषतः स्वात्ममात्रतया बुद्ध्वा पुनः स्वा
त्मानमद्वयं शुद्धं ब्रह्मेति निश्चित्य स्वयं स्वानुभवेन च निश्चयं च स्वचिन्मात्रे विलाप्याविक्रिये द्वये ६२ विलापनं च चिद्रूपं बुद्ध्वा केवलरूप
तः स्वयं तिष्ठेद्यः साक्षाद्ब्रह्मवित्तमो मुनिः ईदृशी परमा निष्ठा श्रौती स्वानुभवात्मिका देशिकालोकनेनैव केवलेन हि सिध्यति ६४ दे
शिकालोकनं चापि प्रसादात्पारमेश्वरात् सिध्यत्ययत्नतः साक्षात्सत्यमेव मयोदितं सत्यं सत्यं पुनः सत्यमुद्धृत्य भुजमुच्यते प्रसा

र्णण ज्ञानलाभाय वेदोक्तप्रकारेण समाहितः महाकारुणिकं साक्षाद्गुरुमेव समाश्रयेत् ७४ इति श्रीस्कंदपुराणे सूतसंहितायां यज्ञवै
सूतगी० पंचमोध्यायः ५ सूत उवाच वक्ष्यामि परमं गुह्यं सर्वशास्त्रार्थसंग्रहं यं विदित्वा द्विजा मर्त्यो न पुनर्जायते भुवि १ साक्षात्
रतरं तत्त्वं सच्चिदानंदलक्षणं सर्वेषां नः सदा साक्षादात्मभूतमविस्मृतः २ दुर्दर्शमेव सूक्ष्मत्वाद्देवतानां महतामपि दृढं स्वात्मतया भातं स
सदा परिपश्यति विष्णुः कदाचित्तत्त्वं कथंचित्परिपश्यति तथा कथंचिद्ब्रह्मापि कदाचित्परिपश्यति ४ त्रिमूर्तीनां तु यज्ज्ञानं ब्रह्मैक
विषयं परं तस्यापि साधकं तत्त्वं साक्षित्वान्नैव गोचरं प्रसादादेव तस्यैव परतत्त्वस्य केवलं देवा रुद्रो विपश्यंति तत्रापि ब्रह्मसाधकं ६
अतः प्रसादसिध्यर्थं परया श्रद्धया सह ध्येयमेव परं तत्त्वं हृदयांभोजमध्यमे त्रिमूर्तीनां तु रुद्रोपि शिवं परमकारणं सदात्म्यात्मनाभी
त्या ध्यायंति द्विजपुंगवाः ८ त्रिमूर्तीनां तु विष्णुश्च शिवं परमकारणं सदात्म्यात्मना भीत्या ध्यायंति द्विजपुंगवाः ९ त्रिमूर्तीनां विरिंचो
पि शिवः परमकारणं सदात्म्यात्मना भीत्या ध्यायंति द्विजपुंगवाः १० ब्रह्मविष्णुर्महेशानां त्रिमूर्तीनां विचक्षणाः त्रिमूर्तिरूपादेवाश्च ध्यायं
ति भीतिसंयुताः ११ एतत्काठिन्यवन्मूर्तिः सच्चिदानंदलक्षणं शिवाद्वैतमेवासि शिवरूपं हि सा सदा १२ ब्रह्मविष्णुमहेशाद्याः शिवध्या
नपरा अपि परमात्मविभागस्थानजीवव्यूहसंस्थिताः ब्रह्मविष्णुमहेशानामाविर्भावा अपि द्विजाः परमात्मविभागस्थानजीवव्यूहसंस्थि
ताः १४ परतत्त्वं परं ब्रह्म जीवात्मपरमात्मनोः औपाधिकेन द्विधाभूतमिव स्थितं पुण्यपापवृता जीवा रागद्वेषमलावृताः जन्मनाश

भेदेन

या॰२

सू॰य॰सू॰गी॰ भिन्नताश्च सदा संसारिणो वशाः १६ ब्रह्मविष्णुमहेशानां नयानेषां द्विजर्षभाः आविर्भावविशेषाणां तुल्यपापादयो न हि आज्ञया परतत्त्व
स्य जीवानां हितकाम्यया आविर्भावतिरोभावौ नेषां केवलमात्मनिश्चयः १९ हरिब्रह्महरास्तेषामाविर्भावाश्च सुव्रताः सदा संसारिभि
१० श्रीमु जीवैरुपास्याभुक्तये उपास्यत्वे समानेपि हरः श्रेष्ठो हरेरजात् न समो न निहीनश्च नास्ति संदेहकारणं २० निहीनं वा समं वापि हरि
णा ब्रह्मणा हरं ये पश्यंति सदा ते तु पच्यंते नारकानले हरिब्रह्मादिदेवेभ्यः श्रेष्ठं पश्यंति ये हरं ते महाघोरसंसारान्मुच्यंते नात्र संशयः
२२ प्राधान्येन परं तत्त्वं स्मर्तव्यं हरिणा योगिभिः ध्येयं मुमुक्षुभिर्नित्यं हृदयांभोजमध्यमे कार्यभूता हरिब्रह्मप्रमुखाः सर्वदेवताः अप्रधा
नतया ध्येया न प्रधानतया सदा २४ सर्वैश्वर्येण संपन्नः सर्वेशः सर्वकारणं शंभुरेव सदा सांबो न विष्णुर्न प्रजापतिः तस्मात्तत्कारणं ध्ये
यं प्राधान्येन मुमुक्षुभिः न कार्यं केन चित् क्वापि ब्रह्मविष्णुमहेश्वराः २६ शिवंकरत्वं सर्वेषां देवानां चेद्द्विजोत्तमाः स्वविभूतिप्रदे
श्यैव न परब्रह्मवत् सदा शिवंकरत्वं संपूर्णं शिवस्यैव परात्मनः सांतमूर्तिधरस्यास्य जगतः कारणस्य हि २८ अतोपि साक्षिबोध्येयः प्रा
धान्येन शिवंकरः सर्वमन्यत्परित्यज्य दैवतं परमेश्वरात् २९ साक्षात्परशिवस्यैव शिवत्वेनाधिकापतेः देवताः सकला ध्येया न प्राधान्येन
सर्वदा ३० शिखा याथर्वणी साध्वी सर्ववेदात्ममौलगा अस्मिन्नर्थे समाप्ता या श्रुतयश्चापरा अपि यथा साक्षात्परं ब्रह्म प्रतिभासक
लस्य च तथैवाथर्वणो वेदः प्रतिष्ठा वाखिलश्रुतेः ३२ कं दृष्टारं तथा विद्वुः शांतिं सारमदाद्रुमः स्कंधशाखा अकाराद्या वर्णा यद्वत्तथैव तु १०

यः

तारं कंदः श्रुतेर्ज्ञानिः शाखिराथर्वणो द्रुमः स्कंधशाखास्त्रयो वेदाः पर्णाः स्मृतिपुराणकाः ३४ अंगानि शाखावरणं तत्कोलस्यैव रक्षकाः पु
ष्पं शिवपरिज्ञानं फलं मुक्तिः परामता बहुनोक्तेन किं विप्राः शिवो ध्येयः शिवंकरः सर्वमन्यत्परित्यज्य दैवतं भुक्तिमुक्तये ३६ सर्वमुक्तं समासेन
सारात्सारतरं बुधाः शिवध्यानं मुदा यूयं कुरुध्वं यत्नतः सदा ३७ इति श्रीस्कांदे सूतसं॰ यज्ञवै॰ सूतगीतायां षष्ठोध्यायः ६ सूत उ॰
रहस्यं संप्रवक्ष्यामि समासेन न विस्तरात् शृणुत श्रद्धया विप्राः सर्वसिध्यर्थमुत्तमं १ देवताः सर्वदेहेषु स्थिताः सत्यतपोधनाः सर्वेषां का
रणं साक्षात्परतत्त्वमपि स्थितं पंचभूतात्मके देहे स्थूले षाट्कौशिके सदा पृथिव्यादिक्रमेणैव वर्तंते पंचदेवताः ३ कार्यं ब्रह्मा महीभागे कार्ये वि
ष्णुर्जलांशके कार्यरुद्रोग्निभागे च वाय्वंशे चेश्वरः परः आकाशांशशरीरस्य स्थितः साक्षात्सदाशिवः शरीरस्य बहिर्भागे विराडात्मा स्थितः सदा
५ अंतर्भागे स्वराडात्मा सम्राड्देहस्य मध्यमे ज्ञानेंद्रियसमाख्येषु श्रोत्रादिषु यथाक्रमात् ६ दिग्वायर्कजलाध्यक्षभूमिसंज्ञाश्च देवताः
कर्मेंद्रियसमाख्येषु पादपाण्यादिषु क्रमात् त्रिविक्रमेंद्रवह्न्याख्या देवताश्च प्रजापतिः मित्रसंज्ञाश्च वर्तंते प्राणे सूत्रात्मसंज्ञितः ८ हिर
ण्यगर्भो भगवानंतःकरणसंज्ञिते तद्वत् स्थाप्रभेदेषु चंद्रमा मनसि स्थितः बुद्धौ बृहस्पतिर्विप्राः स्थितः कालाग्निरुद्रकः अहंकारे संवस्थितो शि
मस्तु सुद्रदेवता १० भूतप्रेतादयः सर्वे देहस्यास्थिषु संस्थिताः पिशाचा राक्षसाः सर्वे स्थिताः स्नायुषु सर्वशः मज्जाख्ये पितृगंधर्वास्त्वस्मा
सृक्स्थिरेषु च वर्तंते संसिद्धा देवताः सकला द्विजाः १२ त्रिमूर्तीनां तु यो ब्रह्मा तस्य घोरतनुर्द्विजाः दक्षिणाक्षिणि जंतूनां मंतभागे रविर्बहिः

त

त्रिमूर्तीनां तु यो ब्रह्मा तस्य स्थानं तनुर्द्विजाः वर्तते वामनेत्रेण नाभिगे वा हि निग्णकरः १४ त्रिमूर्तीनां तु यो विष्णुः स कंठे वर्तते सदा अंतःशंनन
११ नु घोरा तनुर्वासे द्विजर्षभाः त्रिमूर्तीनां तु यो रुद्रो हृदये वर्तते सदा अंतःशंनननु घोरा ततनुर्वासे द्विजर्षभाः १६ सर्वेषां कारणं यत्तद्
ब्रह्म सत्यादिलक्षणं ब्रह्मरंध्रमहास्थाने वर्तते सततं द्विजाः चिच्छक्तिः परमा देहमध्यमे सुप्रतिष्ठिता मायाशक्तिर्ललाटाग्रभागे व्योमांबु
जादधः १८ नादरूपा पराशक्तिर्ललाटस्य तु मध्यमे भागे विंदुमयी शक्तिर्ललाटस्यापरांशके विंदुमध्ये तु जीवात्मा सूक्ष्मरूपेण वर्तते हृ
दये स्थूलरूपेण मध्यमेन तनुमध्यमे २० देवी सरस्वती साक्षाद्ब्रह्मपत्नी सनातनी जिह्वाग्रे वर्तते नित्यं सर्वविद्याप्रदायिनी विष्णुपत्नी महा
लक्ष्मीर्वर्तते नाभिदेशे सदा रुद्रपत्नी तु रुद्रेण पार्वती सह वर्तते २२ सर्वत्र वर्तते साक्षाच्छिवः सांबः सनातनः सत्यादिलक्षणः शुद्धः सर्वदेवन
दे मस्कृतः २३ सम्यग्ज्ञानवतां देहे देवताः सकला अमूः प्रत्यगात्मतया भांति देवतारूपतोऽपि च २४ वेदमार्गैकनिष्ठानां विमूढानां तु विग्रहे
देवतारूपतो भांति द्विजाः प्रत्यगात्मना तांत्रिकाणां शरीरे तु देवताः सकला अमूः वर्तंते न प्रकाशेन द्विजेंद्राः शुद्धभावतः २६ यथाजा
तजनानां तु शरीरे सर्वदेवताः तिरोभूता न यांति स्वं वर्तंते मुनिसत्तमाः अतस्त्वभोगमोक्षार्थी शरीरे देवतामयं स्वकीयं परकीयं च पूजयेत्तु
विशेषतः २८ नावमानं सदा कुर्यान्मोहतो वापि मानवः यदि कुर्यात्प्रमादेन पतत्येव भवांबुधौ दुर्जनमपि सर्वं च पूजयेद्देवतात्मना देवतारूप
तः पश्यन्मुच्यते भवबंधनात् ३० मोहेनापि सदा नैव कुर्यादप्रियभाषणं यदि कुर्यात्प्रमादेन हंति तं देवतापरा नक्षतं विग्रहे कुर्याद ११

स्त्रशस्त्रनखादिभिः तथा नलोहितं कुर्याद्यदि कुर्यात्पतत्यधः ३२ स्वदेहे वा न कुर्याद्दंकनं नरः यदि कुर्याच्च चक्राद्यैः पतत्येव न संशयः रहस्यं
सर्वशास्त्राणां मया प्रोक्तं समासतः शरीरं देवतारूपं भज ध्येयमास्तिकाः ३४ इति सूतसंहितायां यज्ञ० सूतगीतायां सप्तमोऽध्यायः
सूत उ० अथ वक्ष्ये समासेन सर्ववेदांतसंग्रहं यं विदित्वा नरः साक्षान्निर्वाणमधिगच्छति १ परात्परतरं तत्त्वं शिवः सत्यादिलक्षणः
तस्यासाधारणी मूर्तिरंबिकासहिता सदा स्वस्वरूपमहानंदप्रमोदा तांडवप्रिया शिवादिनामान्येवास्य नामानि मुनिपुंगवाः ३ ब्रह्मा
५ विष्णुश्च रुद्रः परतत्त्वविभूतयः त्रिमूर्तीनां तु तु रुद्रस्तु वरिष्ठो ब्रह्मणो हरेः ४ संसारकारणं माया सा सदसद्विलक्षणा प्रतीत्यैव तु सद्भाच
स्तस्या नैव प्रमाणतः ५ सोऽपि ब्रह्मातिरेकेण वस्तुतो नैव विद्यते तत्त्वज्ञानेन मायाया बाधो नान्येन कर्मणा ६ ज्ञानं वेदांतवाक्योत्थं
ब्रह्मात्मैकत्वगोचरं तच्च देवप्रसादेन गुरोः साक्षान्निरीक्षणात् जायते शक्तिपातेन वाक्याद्देवाधिकारिणां ज्ञानेच्छाकारणं दानं यज्ञा
श्च विविधा अपि ८ तथा सिद्धसर्ववेदानां वेदांतानां तथैव च पुराणानां समस्तानां स्मृतीनां भारतस्य च वेदांगानां च सर्वेषामपि वेदा
र्थपारगाः अध्यापनं चाध्ययनं वेदार्थस्मरणं तथा १० उपेक्षा देहयात्रार्थे लौकिकेष्वखिलेष्वपि शांतिदांत्यादयो धर्मा ज्ञानस्यांगावि
सुव्रताः ज्ञानांगेषु समस्तेषु भक्त्या लिंगे शिवार्चनं प्रतिष्ठा देवदेवस्य शिवस्थाननिरीक्षणं १२ शिवभक्तस्य पूजा च शिवभक्तस्तथैव च
रुद्राक्षधारणं भक्त्या कर्णे कंठे तथा करे अग्निरित्यादिभिर्मंत्रैर्भस्मनैवावगुंठनं त्रिपुंड्रधारणं चापि ललाटादिस्थलेषु च १४ वेदवेदांत

स्क॰ पु॰ सू॰ निषस्य महाकारुणिकस्य च गुरोः शुश्रूषणं नित्यं वरिष्ठं परिकीर्तितं चिन्मात्रस्य परस्य स्यादंसाख्यस्य मनोजयः षडक्षरस्य नारेवरि स्य
ष्टः परिकीर्तितः १६ अविमुक्तसमाख्यं च स्थानं व्याघ्रपुराभिधं श्रीमद्दक्षिणकैलाससमाख्यं च सुशोभने मार्गो नरोदिताचारा स्मार्त्तैर्भिः ५
सुशोभनः स्मार्त्तश्रौतः परो धर्मः श्रौतात्क्षेत्रेऽन्न विद्यते १८ अंतादृष्टं धर्मादौ शिवे परमकारणे श्रुतिरेव सदा मानं स्मृतिस्तदनुसारिणी
आस्तिक्यं सर्वधर्मस्य कंदमूलं प्रकीर्तितं मतिविद्धक्रिया त्यागः कं दस्यापि च कारणं २० शिवः सर्वमिति ज्ञानं सर्वज्ञानोत्तमोत्तमं न
तुल्यं तत्परं चापि न किंचिदपि विद्यते वक्तव्यं सकलं प्रोक्तं मया निश्रद्धयासह अतःपरं तु वक्तव्यं न पश्यामि मुनीश्वराः २२ इत्युक्तो भगवान्स्कं
दो मुनीनां भावितात्मनां सांबं सर्वेश्वरं ध्यात्वा भक्त्या परवशोऽभवत् अथ परशिवभक्त्या स चिदानंदपूर्णं परशिवमनुभूय स्वात्मरूपेण सूतः
मुनिगणमवलोक्य माह साक्षाद्गुणाब्धिर्जनपदहितरूपं वेदितव्यं तु किंचित् २४ श्रुतिपथगलितानां मानुषाणां तु तंत्रं गुरुररिवलेशः सर्वविद्या गुरु
हर्षभुः श्रुतिपथनिरतानां तत्र नैवास्ति किंचिद्दिमकरमिह सर्वं पुष्कलं सत्यमुक्तं २५ श्रुतिरपि मनुजानां वर्णधर्मं वभाषे परगुरुरखिलेशः मा
हतंत्रेषु तद्वत् श्रुतिपथगलितानां वर्णधर्मं घृणाब्धिः श्रुतिपथनिरतानां नैव तत्सेवनीयं २६ श्रुतिपथनिरतानामाश्रमाय द्यदुक्ताः धाता
रखिलेशस्तद्वदाहाश्रमांश्च श्रुतिपथगलितानां मानुषाणां तु तत्र हरिरपि मुनिमुख्याः माहतंत्रे स्वकीये २७ विधिरपि मनुजानां
माह वर्णाश्रमांश्च श्रुतिपथगलितानामेव तंत्रे स्वकीये श्रुतिपथनिरतानां तेन संसेवनीयाः श्रुतिपथसममार्गो नैव संसारमोक्तं २८ १२

हरहरिविधिपूजा कीर्तिता सर्वतंत्रे श्रुतिपथनिरतानां यद्रदुक्तानुपूजा श्रुतिपथगलितानामेव तंत्रोक्तपूजा श्रुतिपथनिरतानां सर्ववेदोदितैव
२९ श्रुतिपथगलितानां सर्वतंत्रेषु लिंगं कथितमखिलदुःखध्वंसकं तेत्र तत्र श्रुतिपथनिरतानां तत्सदा नैव धार्यं श्रुतिरपि मनुजानामा
हलिंगं विशुद्धं ३० शिवागमोक्ताश्रमनिष्ठमानवस्त्रिपुंड्रलिंगं तु सदैव धारयेत् तदुक्तमंत्रेण ललाटमध्यमे महाहरेणोव सितेन भस्मना
३१ विष्णवागमोक्ताश्रमनिष्ठमानवस्तथैव पुंड्रांतरमूर्ध्वरूपकं त्रिशूलरूपं चतुरस्रमेव वा मृदा ललाटे तु सदैव धारयेत् ३२ ब्रह्माग
मोक्ताश्रमनिष्ठमानवो ललाटमध्येऽपि च वर्तुलाकृतिं तदुक्तमंत्रेण सितेन भस्मनाम्हदाथवा चंदनतः सधारयेत् ३३ अश्वत्थपत्रस
दृशं हे सौरिवंदनेन मध्ये ललाटमतिशोभनमादरेण बुद्धागमेषु निवरा यदि संस्कृताश्चेन्मृदा रिणा सततमेव तु धारयेच्च ३४ ऊर्ध्वपुंड्रत्रयं नित्यं धा
रयेद्ब्रह्मनाम्हदा ललाटे हंगमे नित्यं चंदनेनाथवा नरः सितेन भस्मना तिर्यक् त्रिपुंड्रस्य च धारणं सर्वांगेषु मिश्रानां तत्तन्मंत्रेण शोभने ३६
शिवागमेषु निष्ठानां धार्यं तिर्यक् त्रिपुंड्रकं एकमेव सदा भक्त्या नैव पुंड्रांतरं बुधाः वेदमार्गैकनिष्ठानां वेदोक्तेनैव वर्त्मना ललाटे भस्मना तिर्य
क् त्रिपुंड्रं धार्यमेव हि ३९ ललाटे भस्मना तिर्यक् त्रिपुंड्रस्य तु धारणं विना पुंड्रांतरं मोहाद्धारयन्पतति द्विजः विष्णवागमादितंत्रेषु दीक्षितानां वि
धीयते शंखचक्रगदापूर्वैरंकनं नान्यदेहिनां ४० दीक्षितानां तु तंत्रेषु नराणामंकनं द्विजाः उपकारकमेवोक्तं क्रमेण मुनिपुंगवाः पुंड्रांत
रस्य तंत्रेषु धारणं दीक्षितस्य तु उपकारकमेवोक्तं क्रमेण मुनिपुंगवाः ४२ वेदमार्गैकनिष्ठस्तु मोहेनाप्यंकितो यदि पतत्येव न संदेहस्तथा पुंड्रा

सू॰य॰गी॰ तरादपि ४३ नोक्तं नंदिग्रहे कुर्याद्वेदपंथानमाश्रिताः। शुद्धान्तरं न मा द्याविल ललाटे नैव धारयेत् ४४ तंत्रोक्तेन प्रकारेण देवतायाः प्रतिष्ठिता साऽपि

१३ वंद्या सुसेव्या वा पूजनीया च वैदिकैः शुद्धमेव हि सर्वत्र देवतारूपमास्तिकाः तत्र तंत्रोक्तपूजा तु तंत्रनिष्ठस्य केवलं ४६ तंत्रेषु दीक्षितो मर्त्यो

वैदिकं न स्पृशेत्सदा वैदिकश्चापि तंत्रेषु दीक्षितं न स्पृशेत्सदा राज्ञा तु वैदिकान्सर्वान्तांत्रिकान्निखिलानपि असंकीर्णतया नित्यं स्थापये

न्मतिमत्तमाः ४८ अन्नपानादिभिर्वस्त्रैः सर्वान्राजाभिरक्षयेत् वैदिकांस्तु विशेषेण ज्ञानिनं तु विशेषतः महादेवसमो देवो यथा नास्ति श्रुतौ

स्मृतौ तथा वैदिकतुल्यस्तु नास्ति त्रावलं विषु ५० शिवज्ञानसमं ज्ञानं यथा नास्ति श्रुतौ स्मृतौ तथा वैदिकतुल्यस्तु नास्ति त्रावलं विषु

यथा वाराणसीतुल्या पुरी नास्ति श्रुतौ स्मृतौ तथा वैदिकतुल्यस्तु नास्ति त्रावलं विषु ५२ षडक्षरसमो मंत्रो यथा नास्ति श्रुतौ स्मृतौ तथा

वैदिकतुल्यस्तु नास्ति त्रावलं विषु यथा भागीरथीतुल्या नदी नास्ति श्रुतौ स्मृतौ तथा॰ ५४ ओदनेन समं भोज्यं यथा लोके न विद्यते

तथा वै॰ ५६ रुद्रदेवो महादेवो यथा सर्वैः प्रपूज्यते तथा वै वैदिको मर्त्यैः पूज्यः सर्वजनैरपि आदित्येन विहीनं तु जगदंधं यथा भवेत् तथा

वैदिकहीनं तु जगदंधं न संशयः प्राणेंद्रियादिहीनं तु शरीरं कुणपं यथा तथा वै॰ ५८ अहो वैदिकमाहात्म्यं मया वक्तुं न शक्यते वेद एव

तु माहात्म्यं वैदिकस्याब्रवीत्पुरा स्मृतयश्च पुराणानि भारतादीनि सुव्रताः वैदिकस्य तु माहात्म्यं प्रवदंति सदा सुराः ६० वेदोक्तं तांत्रिकास्सर्वे

स्वीकुर्वंति हि द्विजर्षभाः ॰पजीवंति तंत्रोक्तं वेदः साक्षात्सनातनः इत्युक्त्वा भगवान्सूतः स्वगुरुं व्याससंज्ञितं स्मृत्वा भक्त्या दशो भ्रत्वाप

पात सुविस्तरवत् ६२ अस्मिन्नवसरे श्रीमान्मुनिः सत्यवतीसुतः शिष्यस्नेहेन कृपया तत्रैवाविरभूत्स्वयं तं दृष्ट्वा मुनयः सर्वे संतोषाकुलमानसाः निश्चेष्टा

नितरां भक्त्या प्रणम्य करुणानिधिं ६४ स्तोत्रैर्बहुभिरानंदं व्यासं सत्यवतीसुतं पूजयामासुरत्यर्थं वन्यपुष्पफलादिभिः भगवानपि सर्वज्ञः क

रुणासागरप्रभुः उवाच मधुरं वाक्यं मुनीनालोक्य सुव्रतान् ६६ व्यास उ॰ शिवमस्तु मुनीन्द्राणां नाशिवं तु कदाचन अहो भाग्यमहो भाग्यं मया

वक्तुं न शक्यते श्रूयतां मुनयः सर्वे भाग्यवंतः समाहिताः प्रसादाद्देवदेवस्य शंभोः कारुणिकस्य च ६८ पुराणानां समस्तानामहं कर्ता पुरा भवं

मत्प्रसादादयं सूतस्तत्त्वभवद्गुरुवत्सलः रुद्रस्याज्ञाबलाद्देवशंभोः कारुणिकस्य च पुराणसंहिताकर्ता देशिकश्चाभवद्भुवि ७० पुराकृतेन पुण्येन

भवंतोऽपीश्वराज्ञया सूतादस्मादृतेऽरण्ये श्रुतवंतो यथातथं ७२ कृतार्थोऽहं प्रसादश्च सूतो द्रुतं किं न करिष्यति आज्ञया केवलं शंभोरहं वेदार्थवेदने

७३ संपूर्णः सर्ववेदांतवाक्यानामर्थनिश्चये समर्थश्च नियुक्तश्च सूत्रारंभकृतेऽपि च आज्ञया देवदेवस्य भवतामपि योगिनां ज्ञाने गुरुर्गुरुश्चाहम्

भवं सुनिपुंगवाः ७४ भवंतोऽपि शिवज्ञाने वेदसिद्धे विशेषतः भक्त्या परमया युक्ता निष्ठा भवत सर्वदा इत्युक्त्वा भगवान्व्यासः स्वशिष्यं सूतमुत्तमं उ

पाश्लिष्य देवेशं स्मृत्वा न त्रागमद् दुरः ७६ पुनश्च सूततः सर्वज्ञः स्वशिष्यानवलोक्य च प्राह गंभीरया वाचा भवतां शिवमस्त्विति ७७ मयोक्ता परमा

गीता पठिता येन तस्य तु आयुरारोग्यमैश्वर्यं विज्ञानं च भविष्यति ७८ शिवप्रसादः सुलभो भविष्यति न संशयः गुरुत्वं च मनुष्याणां भविष्यति न संश

यः ७९ विद्यारूपा च या शिवा देवदेवस्य सन्मानं दानं तस्य विस्तररूपा तस्या वाचः सर्वलोके क्रमात्तु भक्त्या नित्यं चांबिकायाः प्रसादात् ८० गुरुप्रसा

सू·य·स्त·गी दादपिसु ज्ञनामया शिवमसादादपि चोत्तमोत्तमात् विनायकस्यापि महाप्रसादात्षडाननस्यापि महाप्रसादात् ८१ यज्ञवैभवसमाह्वयः कृतः सर्ववे
दमथनेन सत्तमाः अत्र मुक्तिरपि शोभना परा सुस्थितैव नहि तत्र संशयः ८२ यज्ञवैभवसमाह्वयं परं खंडमत्र विमलं पठेन्नरः सत्यबोधसुखलक्षणं
१४ शिवं सत्यमेव ज्ञ्हाति मया निहि ८३ मदुक्तसंहिता परा समस्तदुःखदा शिलीनरस्य मुक्तिदायिनी शिवप्रसादकारिणी समस्तवेदसारतः सुनिर्मिता
ति शोभना महत्तरानुभूतिमद्भिरादृता न चापरैः ८४ मदुक्तसंहितातु यातया विरुद्धमस्ति चेदनर्थकं हि तद्बुधा वचः प्रयोजनायन श्रुतिप्रमाणरूपि
णी सुसंहितामयोदिता श्रुतिप्रमाणमेव सा महाजनस्य संततं ८५ मदुक्तसंहितामिमामतिप्रियेण मानवः पठन्प्रयाति संसृतिं प्रयाति शंकरं परं अ
तश्च शोभनामिमामहर्निशं समाहितः श्रुतिप्रमाणवत्सदैव दर्शितः स्वमुक्तये ८६ पुराणसंहितामिमामतिप्रियेण वः पुमांहरत्येति संसृतिं पुनर्नया
तियाति शंकरं परानुभूतिरद्वया विजायते च तस्य सा शिवा च वा चिन्त्यति प्रियेण शंकरोपि च ८७ सत्यबोधसुखपूर्णलक्षणं तत्त्वमर्थविभवं सनातनं
मत्स्वरूपमशुभापहं शिवं भक्तिगम्यममलं सदा नुमः ८८ या नुमतिरमलास होदिता वेदमाननिरता शुभावहा तामतीव सुखदेमहं शिवां केशवा
द्विजनसेवितां नुमः ८९ वेदपद्मनिकरस्य भास्करं देवदेवमहदंशं गुणनिधिं व्यासमिष्टफलदं गुरुं नुमः शोकमोहविषवेगभेषजं ९० येवेदवेदां
तधनामहाजनाः शिवाभिमानेक निरस्तकिल्बिषाः नमामि वाचा शिरसा हृदा च तान्भवाहिवेगस्य निवारकान्नहं ९१ इति श्रीस्कंदपुराणे
सूतसंहितायां यज्ञवैभवखंडस्योपरिभागे सूतगीतासूपनिषत्सु अष्टमोध्यायः ८ श्रीसांबसदाशिवार्पणमस्तु समाप्तं यज्ञवै
१४

भवखंडं संवत् १८०४१ शाके १७०६ [illegible] समाप्तं
१५

यत्तवैभवत्वं इस्वोताराधिसमाप्तं·
समाप्ताह्तसंहिता·